# अथ द्वितीयो निःश्वासः

'' रात्रिर्गमिष्यति भविष्यति सुप्रभातम्
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे,
हा हन्त! हन्त!! नलिनीं गज उज्जहार।।''

(स्फुटकम्)

**अन्वयः –** ''रात्रिः गमिष्यति सुप्रभातं भविष्यति, भास्वान् उदेष्यति पङ्कजश्रीः हसिष्यति'' कोशगते द्विरेफे इत्थं विचिन्तयति 'हा हन्त! हन्त! गजः नलिनीम् उज्जहार।

**व्याख्या –** ''रात्रिः=रजनी, गमिष्यति=यास्यति, सुप्रभातम्=शोभनं प्रातः, भविष्यति=सम्पत्स्यते, भास्वान्=सूर्यः, उदेष्यति= उद्गमिष्यति (च) पङ्कजश्रीः=कमलशोभा, हसिष्यति=विकसिष्यति, कोशगते= कमलकलिका– सम्पुटिते, द्विरेफे=भ्रमरे, इत्थम्=एवम्, विचिन्तयति=चिन्तनपरे (सति), हा हन्त! हन्त!= हा कष्टम्, (कश्चन) गजः=हस्तिः, नलिनीम्=मृणालिनीम्, उज्जहार=उत्पाटयामास।

**विशेषः –** मुक्तकेन अनेन द्वितीयनिःश्वासस्था कथा सूच्यते। तदनुसारमत्र भ्रमरायमा ।णेऽपजलखानः आहवद्यूतेन शत्रूणां कालरात्रिरूपस्य शिवस्यावसानं निजस्योन्नतिरूपं प्रभातञ्च कामयते, परं गजायमानो महाराजः शिवस्तं सगणं हनिष्यतीति सूच्यते। इदं पताकास्थानकमपि वक्तुं शक्यते। अत्र विषादोऽलंकारः।

**मूलम् – इतस्तु स्वतन्त्र–यवनकुल–भुज्यमान–विजयपुराधीश–प्रेषितः पुण्य– नगरस्य समीपे एव प्रक्षालित–गण्डशैल– मण्डलायाः, निर्झरवारिधारा पूरपूरितप्रबलप्रवाहायाः–पश्चिम–पारावार–प्रान्त–प्रसूत–गिरि–ग्राम–गुहा–गर्भ– निर्गताया अपि प्राच्यपयोनिधिचुम्बनचञ्चुरायाः, रिङ्गत–तरङ्ग–भङ्गोद्भूतावर्त्त–शत–भीमायाः, भीमायाः नद्याः, अनवरत– निपतद् बकुल–कुल–कुसुमकदम्ब– सुरभीकृतमपि नीरं वगाहमान–मत्त–मतङ्ग्ज–मद–धाराभिः कटूकुर्वन्, हय–हेषा–ध्वनि– प्रतिध्वनि–बधिरीकृत–गव्यूति–मध्यगाध्वनीनवर्गः, पटकुटीरकूटविहित– शारदाम्भोधर–विडम्बनः, निरपराध–भारताऽभिजन–जनपीडन–पातक–पटलैरिव समुद्धूयमान– नीलध्वजैरुपलक्षितः, विजयपुरेश्वरस्यान्यतमः सेनानीः अपजलखानः प्रताप– दुर्गादविदूर एव शिववीरेण सहाऽऽहवद्यूतेन चिक्रीडिषुः ससेनः तिष्ठति स्म।**

**प्रसंगः –** गद्यांशेऽस्मिन् विजयपुरनरेशेन प्रेषितस्य शिववीरेण युयुत्सोः अपजलखानस्य चित्रणं विद्यते –

**व्याख्या –** (विजयपुराधीशप्रेषितः तदीयः सेनानीः अपजलखानः शिववीरेण सह आहवद्यूतेन चिक्रीडिषुः ससेनस्तिष्ठति स्म' इति मुख्यं वाक्यम्) इतस्तु=अपरतस्तु, स्वतन्त्र–यवनकुल–भुज्यमान–विजय–पुराधीश–प्रेषितः =स्वच्छन्दम्लेच्छवंशशास्यमानविजयपुरेश्वरप्रहितः, पुण्यनगरस्य= पूनापत्तनस्य, समीपे एव= निकटे एव, प्रक्षालितगण्डशैलमण्डलायाः= धौतपर्वतच्युत– स्थूलोपलमण्डलायाः, निर्झरवारिधारापूरपूरितप्रबलप्रवाहायाः=निर्झरजलप्रवाहसमूह– भरिततीव्रवेगायाः, पश्चिमपारावार–प्रान्तप्रसूतगिरिग्रामगुहागर्भनिर्गतायाः= पाश्चात्यसागराञ्चलोद्भूतपर्वतसमूहगह्वरमध्यभागनिःसृतायाः, अपि, प्राच्यपयोनिधिचुम्बन– चञ्चुरायाः=पूर्वसमुद्रचुम्बनचञ्चलायाः, रिङ्गत्तरङ्गभङ्गोद्भूतावर्त्तश– तभीमायाः= प्रवहद्वीचित्रुटनोत्पन्नपयोभ्रमशतभीषणायाः 'भीमायाः'=एताख्यनद्याः, अनवरतनिपतद्बकुल कुलकुसुमकदम्बसुरभीकृतम् अपि=सततपतद्वञ्जुलसमूह– पुष्पनिकरसुगन्धीकृतम् अपि, नीरम्=जलम्, वगाहमान–मत्त–मतङ्ग्ज– मदधाराभिः= स्नानरतक्षीब– द्विपदानप्रवाहैः, कटूकुर्वन्= कटुरसतां प्रापयन्, हयहेषाध्वनिप्रतिध्वनि– बधिरीकृतगव्यूतिमध्यगाध्वनीनवर्गः= घोटकरवप्रतिरवबधिरीकृतकोशद्वयाभ्यन्तर–वर्तिपान्थसमूहः, पटकुटीरकूटविहितशारदाम्भोधरविडम्बनः=उपकार्यासमूह– कृतशरन्मेघानुकरणः, निरपराध

ाभारताऽभिजन–जनपीडनपातकपटलैः= निर्दोषभारतीयजनतोत्पीडनदुरितव्रातैः इव, समुद्धूयमाननीलध्वजैः= आन्दोल्यमानकृष्णपताकाभिः, उपलक्षितः= प्रतीयमानः, विजयपुरेश्वरस्य= बीजापुरनरेशस्य, अन्यतमः=एकतमः, सेनानीः=सेनापतिः, अपजलखानः=एतदाख्यः, प्रतापदुर्गात्=एताख्यदुर्गात्, अविदूरे एव=समीपे एव, शिववीरेण, सह=साकम्, आहवद्यूतेन= युद्धदुरोदरेण, चिक्रीडिषुः= क्रीडितुमिच्छुः, ससेनः=सेनया सहितः, तिष्ठति स्म=स्थितो वर्तते।

**समासविग्रहाः** – स्वतन्त्रं च तद् यवनकुलम्, स्वतन्त्रयवनकुलम्, भुज्यमानं च तद् विजयपुरम् भुज्यमानविजयपुरम् (कर्म.) स्वतन्त्रयवनकुलेन भुज्यमान– विजयपुरम् स्वतन्त्रयवनकुलभुज्यमानविजयपुरम् (तृ.त.) तस्य अधीशः, तेन प्रेषितः। गण्डशैलानां मण्डलानि गण्डशैलमण्डलानि (ष.त.), प्रक्षालितानि गण्डशैलमण्डलानि यया सा, (बहु.) तया। पश्चिमश्चासौ पारावारः पश्चिमपारावारः (कर्म.) तस्य प्रान्तं, पश्चिमपारावारप्रान्तः गिरीणां ग्रामः गिरिग्रामः, पश्चिमपारावारप्रान्ते गिरिग्रामः तस्य गुहाः, तासां गर्भः, तस्मात् निर्गता (तत्पु.) तस्याः। प्राच्यश्च पयोनिधिः (कर्म.) तस्य चुम्बनम्, प्राच्यपयोनिधिचुम्बने चञ्चुरा (स. त.) तस्याः। रिङ्गत्तरङ्गभङ्गोद्भूताः, ते च आवर्ताः, तेषां शतानि, तैः भीमा, तस्याः रिङ्गत्तरङ्गोद्भूतावर्तशतभीमायाः। बकुलानां कुलम् तस्य पुष्पाणि, निपतन्ति च तानि बकुलकुलपुष्पाणि, निपतद्बकुलकुलपुष्पाणि, अनवरतं निपतद्बकुलकुलपुष्पाणि अनवरतनिपतद्बकुलकुलपुष्पाणि, तेषां कदम्बः, तेन सुरभीकृतम् (तत्पु.) मत्तश्चासौ मतङ्गजः, वगाहमानाश्च ते मत्तमतङ्गजाः, तेषां मदः तस्य धाराभिः (कर्म. तत्पु.)। हयानां हेषाध्वनिः, तेषां प्रतिध्वनिः, (ष.त.) अध्वनीनानां वर्गः अध्वनीनवर्गः, गव्यूतिमध्यगश्चासौ अध्वनीनवर्गः गव्यूतिमध्यगाध्वनीनवर्गः (कर्म.) हयहेषाध्वनिप्रतिध्वनिभिः बधीरीकृतः गव्यूतिमध्यगाध्वनीनवर्गः येन सः (कर्म. गर्भः बहु.)। पटकुटीराणां कूटाः पटकुटीरकूटाः, शरदि भवः शारदाः, स चासौ अम्भोधरः तेषां विडम्बना शारदाम्भोधरविडम्बना, पटकुटीरकूटै विहिता शारदाम्भोधरविडम्बना येन स (कर्मगर्भः बहु.)। भारताभिजनाश्च ते जनाः, निरपराध ाश्च ते भारताभिजनजनाः (कर्म.) तेषां पीडनम्, तस्य पातकम्, तेषां पटलम्, तैः (ष.त.)। समुद्धूयमानाश्च ते नीलध्वजाः (कर्म.), तैः। आहव एव द्यूतम् (कर्म.) तेन।

**व्याकरणम्** – भुज्यमान–भुज्+यक्+शानच्। प्रक्षालित–प्र+क्षाल्+ णिच्+क्त। निर्गता–निर+गम्+क्त+टाप्। निपतद्–नि+पत्+शतृ। सुरभीकृत–सुरभि+ च्वि+कृ+क्त। कटूकुर्वन्–कटु+च्वि+कृ+शतृ+सु। बधिरीकृत–बधिर+ च्वि+कृ+क्त। वगाहमान–अव+गाह्+शानच् ('अव' इत्यस्य विकल्पेन 'अ' कारलोपः)। चिक्रीडिषुः–क्रीडितुमिच्छुः क्रीड्+सन्+उ+सु।

**विशेषः** – अत्र सुदीर्घसमासां पाञ्चालीरीतिमाश्रित्य कविना भीमानद्याः अतीव स्वाभाविकं चित्रणं कृतमस्ति। 'निरपराधभारतौँउपलक्षित 'इत्यत्रोत्प्रेक्षा। 'भीमायाः भीमायाः' इत्यत्र यमकालंकारः।

**सरलार्थः** – इतस्तु यवनकुलशासितेन विजयपुरनरेशेन प्रेषितः तदीयः एक सेनानीः शिववीरेण सह युद्धेच्छया प्रतापदुर्गसमीपे सेनया सह तिष्ठति स्म। यश्च मत्तगजानां मदेन 'भीमा' इत्याख्याया नद्याः जलं कटु कुर्वन् आसीत्; सा च भीमा नदी पुण्यनगरसमीपे गण्डशैलान् प्रक्षालनपरा, निर्झराणां वारिधाराभिःपूर्णा (अत एव) प्रबलवेगवती, पश्चिमसमुद्रतटोद्भूतपर्वतशिखराणां गुहागर्भाद् निःसृता अपि पूर्वसमुद्रचुम्बने चञ्चला, उत्पततां तरङ्गाणां भङ्गैः उद्भूतैः शतावर्तैः भीषणा च आसीत् (''कीदृशं जलं कटु कुर्वन् आसीत् इत्याह) यदीयं जलं निरन्तरं पततां बकुलपुष्पाणां समूहेन सुगन्धितं कृतमासीत् यच्च जलक्रीडायै प्रविष्टानां मत्तगजानां मदेन कटु क्रियते। (अन्यच्च असौ किं कुर्वन् आसीत्ँइत्याह)। असौ हयहेषाध्वनिप्रतिध्वनिभिः क्रोशद्वयमध्यगान् पान्थान् बधिरीकुर्वन् पटकुटीरैः शरत्कालिक– मेघच्छविमुपहसन्, निर्दुष्टभारतीयजनतोत्पीडनेन उत्पन्नैः पापपटलैः इव समुद्धूयमानैः ध्वजैः प्रतीयमानश्च आसीत्।

**मूलम् – अथ जगतः प्रभाजालमाकृष्य, कमलानि सम्मुद्रय, कोकान् सशोकीकृत्य, सकल–चराचर–चक्षुःसञ्चारशक्तिं शिथिलीकृत्य, कुण्डलेनेव निजमण्डलेन पश्चिमामाशां भूषयन्**

**वारुणी–सेवनेनेव माञ्जिष्ठ–मञ्जिम–रञ्जितः, अनवरतभ्रमण–परिश्रम–श्रान्त इव सुषुप्सुः, म्लेच्छ–गण–दुराचार–दुःखा– ऽऽक्रान्तवसुमती–वेदनामिव समुद्रशायिनि निविवेदयिषुः, वैदिक–धर्म–ध्वंस–दर्शन–सञ्जात–निर्वेद इव गिरिगहनेषु प्रविश्य तपश्चिकीर्षुः, घर्म– ताप–तप्त इव समुद्रजले सिस्नासुः, सायं समयमवगत्य सन्ध्योपासनमिव विधित्सुः, ''नास्ति कोऽपि मत्कुले; यः सकण्ठग्रहं धर्म–ध्वंसिनो यवनहतकान् यज्ञियादस्माद् भारत–गर्भान्निस्सारयेत्'' इति चिन्ताऽऽक्रान्त इव कन्दरि–कन्दरेषु प्रविविक्षुर्भगवान् भास्वान् क्रमशः क्रूरकरानपहाय, दृश्यपरिपूर्णमण्डलः संवृत्य, श्वेतीभूय, पीतीभूय, रक्तीभूय च गगनधरातलाभ्यामुभयत आक्रम्यमाण इवाण्डाकृतिमङ्गीकृत्य, कलि–कौतुक–कवलीकृत–सदाचार–प्रचारस्य पातक–पुञ्ज– पिञ्जरितधर्मस्य च यवनगण–ग्रस्तस्य भारतवर्षस्य च स्मारयन् अन्धतमसे च जगत् पातयन्, चक्षुषामगोचर एव सञ्जातः।**

**प्रसङ्गः –** अत्र प्रकृतिवर्णनतत्परः कविः अलंकृतवाचा अस्तं गच्छन्तं भगवन्तं भानुमन्तं वर्णयति।

**व्याख्या –** अथ=अनन्तरम्, जगतः=लोकस्य, प्रभाजालम्=प्रकाशपुञ्जम्, आकृष्य=आकत्रञ्च्य, कमलानि=पद्मानि, सम्मुद्र्य=मुकुलीकृत्य, कोकान्= चक्रवाकान्, सशोकीकृत्य=दुःखितान् कृत्वा, सकलचराचरचक्षुः– सञ्चारशक्तिम्= अखिलचराचरनेत्रक्रियाक्षमताम्, शिथिलीकृत्य=स्वल्पीकृत्य, पश्चिमाम्=वारुणीम्, आशां=दिशाम्, कुण्डलेन=कर्णभूषणेन, इव, निजमण्डलेन= स्वविम्बेन, भूषयन्=अलटक्तर्वन्, वारुणीसेवनेन= पश्चिमदिग्गमनेन मदिरासेवनेन वा, माञ्जिष्ठ– मञ्जिमरञ्जितः= माञ्जिष्ठरक्तिमारक्तः, इव=यथा, अनवरत–भ्रमण– परिश्रम–श्रान्तः= सततसञ्चलनखेदखिन्नः (अत एव) सुषुप्सुः=स्वप्तुमिच्छुः, इव=यथा, म्लेच्छगणदुराचार–दुःखाऽऽक्रान्त–वसुमतीवेदनां=यवन–निकर– कदाचार–पीडाऽऽक्रान्तवसुधाम्,समुद्रशायिनि=भगवति विष्णौ, निविवेदयिषुः= निवेदितुमिच्छुः, वैदिक–धर्मध्वंस–दर्शन–सञ्जात–निर्वेदः=सनातनधर्म– नाशावलोकनोत्पन्नव्यथः (अत एव) गिरिगहनेषु=पर्वतदुर्गमेषु, प्रविश्य=प्रवेशं विधाय तपश्चिकीर्षुः= तपस्तप्तुमिच्छुः, इव, घर्म–ताप–तप्तः= आतपोष्णतापीडितः, समुद्रजले= सागरजले सिस्नासुः=स्नातुमिच्छुः इव, सायं समयं=सूर्यास्तवेलाम्, अवगत्य=ज्ञात्वा, सन्ध्योपासनम्=सान्ध्यव्रतम्, विधित्सुः=चिकीर्षुः, इव, ''मत्कुले=आर्यवंशे, (किम् ?) कोऽपि=कश्चिदपि, नास्ति=न विद्यते, यो जनः, धर्मध्वंसिनः=धर्मनाशकान्, यवनहतकान्= दुष्टम्लेच्छान् यज्ञियात्,=परमपवित्रात्, अस्मात्=एतस्मात्, भारतगर्भात्= भारतमध्यात्, सकण्ठग्रहं=अर्द्धचन्द्रं दत्वा, निस्सारयेत्,=बहिःकुर्यात्'' इति चिन्ताऽऽक्रान्त इव=चिन्तनपीडित इव, 'कन्दरिकन्दरेषु=पर्वतगुहासु, प्रविविक्षुः=प्रवेष्टुमिच्छुः, भगवान् भास्वान्=भगवान् सूर्यः, क्रमशः=क्रमेण, क्रूरकरान्=तीक्ष्णकिरणान् अपहाय=परित्यज्य, दृश्यपरिपूर्णमण्डलः= दर्शनीयसकलबिम्बः, सम्वृत्य=भूत्वा, श्वेतीभूय=धवलीभूय, पीतीभूय= पीतो भूत्वा, रक्तीभूय=रक्तो भूत्वा, च, गगनधरातलाभ्याम्=आकाश–भूतलाभ्याम्, उभयतः, आक्रम्यमाणः= आक्रान्त, इव अण्डाकृतिं= वर्तुलाकारम्, अङ्गीकृत्य,=स्वीकृत्य, कलिकौतुककवलीकृत–सदाचार–प्रचारस्य= कलिकौतूहलविनष्टसद्व्रतप्रचारस्य, पातकपुञ्जपिञ्जरितधर्मस्य= अघौघपीतधर्मस्य, यवनगणग्रस्तस्य= म्लेच्छव्रात–पीडितस्य, भारतवर्षस्य= भारतस्य, च, स्मारयन्=स्मरणं कारयन्, (खेदपूर्वकस्मरणे षष्ठी), अन्धतमसे=प्रगाढान्धकारे, च, जगत्=संसारम् पातयन्=मज्जयन्, चक्षुषाम्= नेत्राणाम्, अगोचरः=अदृश्यः, एव, सञ्जातः=अभूत्।

**समास–विग्रहाः –** सकलाश्च ते चराचराः (कर्म.) तेषां चक्षूंषि, तेषां संचारः, तस्य शक्तिः, ताम् (ष.त.)। माञ्जिष्ठश्चासौ मञ्जिमा (कर्म.), तेन रञ्जितः (तृ.त.)। अनवरतञ्च तद् भ्रमणं (कर्म.), तस्य परिश्रमः, तेन श्रान्तः। म्लेच्छानां गणः, (ष.त.) म्लेच्छगणः, तस्य दुराचाराः तैः दुःखाकान्ता, म्लेच्छगणदुराचार–दुःखाक्रान्ता, सा चासौ वसुमती (कर्म.) तस्याःवेदना, ताम् (ष.त.)। वैदिकश्चासौ– धर्मः (कर्म.) वैदिकधर्मः, तस्य ध्वंसः तस्य दर्शनम् (बहु.)। कलेः कौतुकम् कलिकौतुकम् (ष.त.), सदाचारस्य प्रचारः, सदाचारप्रचारः (ष.त.) कवलीकृतश्चासौ सदाचारप्रचारः (कर्म.) कवलीकृतसदाचारप्रचारः, कलिकौतुकेन कवलीकृतसदाचार–प्रचारः यस्य सः (बहु.)। पातकानां पुञ्जः (ष.त.) पातकपुञ्जः, तेन पिञ्जरितः धर्मः यस्य

सः (बहु.)।

**व्याकरणम् –** सम्मुद्र्य सम्+मुद्र्+क्त्वा+ल्यप्। सशोकीकृत्य– (सह)+शोक+ च्वि+कृ+ल्यप्। शिथिलीकृत्य–शिथिल+च्वि+कृ+ल्यप् समुद्रशायिनि– समुद्र+शीङ्.+णिनि+ङि.। निविवेदयिषुः– नि+विद्+सन्+उ+सु। चिकीर्षुः–कृ+ सन्+उ+सु। सिस्नासुः– स्ना+सन्+उ+सु। विधित्सुः–वि+धा+सन्+उ+सु। यज्ञियात्–यज्ञ+घ(इय)। निस्सारयेत्–निस्+सृ+ णिच्+लिङ्.+तिप्। प्रविविक्षुः प्र+विश्+सन्+उ+सु। आक्रम्यमाणः–आ+ क्रम्+यक्+शानच्+सु। स्मारयन्–स्मृ+णिच्+शतृ+सु। पातयन्–पत्+ णिच्+शतृ+सु। अगोचरः –नञ्+गो+चर्+अच्+सु। सञ्जातः–सम्+ जनि+क्त+सु।

**विशेषः –** सूर्यास्तवर्णनव्याजेनात्र कविः यवनदुराचारपराकाष्ठां वर्णयति; उत्प्रेक्षाचमत्कृतिश्चात्र मणिकाञ्चसंयोगं जनयन्ती कवेः प्रतिभापाटवं प्रस्तौति। यवनदुराचारपीडितायाः भुवो वेदनां क्षीरसागरशायिने भगवते विष्णवे निवेदनाय भगवान् भास्वान् अस्तं गच्छति इति प्रधानो वाक्यार्थः। भुवः भारहरणाय भगवान् स्वयं भूमौ अवतरति इति पौराणिकी संगतिरप्यत्र विद्यते। उत्प्रेक्षाचमत्कारेण सार्द्धं सानुप्रासा स्वभावोक्तिरप्यत्र विलसति। वर्णनेन अनेन दैन्यभावोऽभिव्यज्यते। सन्नन्तप्रयोगाणां कौशलमपि द्रष्टव्यमस्ति।

**सरलार्थः –** (भगवान् सूर्यः अस्तं गतः कथमिवेति वर्णयन्नाह) अनन्तरं जगतः प्रकाशसमूहम् आकृष्य, कमलानि मुकुलितानि विधाय, चक्रवाकान् सशोकान् विधाय, चराचराणां दर्शनशक्तिं शिथिलां कृत्वा, कुण्डलेन इव निजमण्डलेन पश्चिमदिशां भूषयन्, वारुणीसेवनेन माञ्जिष्ठमञ्जिम– रञ्जित इव, सततभ्रमणेन श्रान्तः (अत एव) स्वप्तुमिच्छुः इव, म्लेच्छदुराचाराणां दुःखेन आक्रान्तायाः भुवो वेदनां समुद्रशायिने भगवते विष्णवे निवेदयितुमिच्छुरिव, सनातनधर्मध्वंसदर्शनेन सञ्जातव्यथः (अत एव) गिरिगहनेषु प्रविश्य तपश्चरितुमिच्छुः इव आतपसंतप्तः (अत एव) समुद्रजले स्नातुमिच्छु इव "मन्ये मत्कुले एतादृशः कोऽपि नास्ति; यो धर्मध्वंसिनः इमान् यवनान् यज्ञयोग्याद् अस्मात् भारतदेशात् कण्ठं गृहीत्वा बहिः निस्सारयेत्" इति चिन्तया आक्रन्त इव, पर्वतगह्वरेषु प्रवेष्टुमिच्छुः भगवान् सूर्यः क्रमशः श्वेतो भूत्वा पीतो भूत्वा रक्तो भूत्वा च गगनभूतलाभ्याम् उभयत आकृष्यमाण इव गोलाकृतिं प्राप्य कलियुग–प्रभावेण ग्रासीकृतसदाचारप्रचारस्य पापपुञ्जपिञ्जरित धर्मस्य यवनगणग्रस्तस्य भारतवर्षस्य च स्मारयन् प्रगाढान्धकारे संसारं पातयन् नेत्राणाम् अगोचरो जातः।

**मूलम् – ततः संवृत्ते किञ्चिदन्धकारे धूपधूमेनेव व्याप्तासु हरित्सु भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत–प्रत्यागतञ्च विदधानः, प्रताप–दुर्ग– दौवारिकः, कस्यापि पादक्षेपध्वनिमिवाऽश्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीपप्रकाशेऽवतमसवशादागन्तारं कम्प्यनवलोकयन्, गम्भीर–स्वरेणैवमवादीत्–"कः कोऽत्र भोः? कः कोऽत्र भोः?" इति।**

**अथ क्षणानन्तरं पुनः स एव पादध्वनिरवाश्रावीति भूयः साक्षेपमवोचत् – "क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः?"**

**प्रसङ्ग :–** महाकविरत्र द्वाररक्षणतत्परस्य द्वौवारिकस्य चित्रणं करोति।

**व्याख्या –** ततः=तदनन्तरम्, किञ्चित्=ईषत्, अन्धकारे=तिमिरे, संवृत्ते=जाते, धूपधूमेन=ग्रीष्म धूमेन, इव, हरित्सु=दिशासु, व्याप्तासु=आच्छादितासु, भुशुण्डीं=एतदाख्यमाग्नेयास्त्रम्, स्कन्धे=अंशे, निध ााय=संस्थाप्य, निपुण= सम्यक्, निरीक्षमाणः=अवलोकयन्, आगतप्रत्यागतञ्च=गमनागमनञ्च, विदधानः=कुर्वाणः, प्रताप–दुर्ग–दौवारिकः=प्रतापाख्यस्य दुर्गस्य द्वारपालः, कस्यापि=कस्यचिदपि, पादक्षेपध वनिमिव=पदन्यासशब्दमिव, अश्रौषीत्= अशृणोत्। ततः=श्रवणानन्तरम्, स्थिरीभूय=स्थिरोभूत्वा, पुरतः=अग्रे, पश्यन्=विलोकयन्, दीपप्रकाशे=प्रदीपालोके, अवतमसवशात्=ईषदन्ध– कारकारणात्, आगन्तारम्=आगच्छन्तम्, कमपि=कमपि जनम्, अनवलोकयन्=अपश्यन् गम्भीरस्वरेण=गभीरशव्देन (उच्चैः) एवम्=इत्थम् अवादीत्=अवदत्–भोः कः कः अत्र?=अयं कोऽस्ति? भोःकःकःअत्र?=रे कोऽयमागच्छति?,

अथ=अनन्तरम्, क्षणानन्तरम्=किञ्चित्कालानन्तरम्, स एव=पूर्वश्रुत एव, पादध्वनिः=चरणक्षेपशब्दः, पुनः=भूयः, अश्रावि=श्रुतः, (द्वाः स्थेन) इति, भूयः=पुनः, साक्षेपम्=सकोपम्, अवोचत्=अवदत्, एष कः=अयं कः, बधिरः= श्रोतुमशक्तः, माम्=द्वारपालम्, अनुत्तरयन्=उत्तरमददत्, मुमुर्षुः=मर्तुमिच्छुः अथवा आसन्नमरणः समायाति=इतः आगच्छति।

**समासविग्रहाः –** धूपस्य धूमः धूपधूमः (ष.त.), तेन। आगतञ्च प्रत्यागतञ्च आगतप्रत्यागतम् (समाहारद्वन्द्वः) पादयोः क्षेपः, तस्य ध्वनिः पादक्षेप– ध्वनिः (ष.त.), तम्।

**व्याकरणम् –** संवृत्ते–सम्+वृत्+क्त+ङि। निरीक्षमाणः– निर्+ईक्ष्+ शानच्+सु। विदधानः – वि+धा+शानच्+सु। आगन्तारम् – आङ्+गम्+तृच्+अम्। अश्रौषीत् – श्रु+लुङ्+तिप्। मुमुर्षुः – मृ+सन्+उ+सु 'आशंसायां सन् वक्तव्यः इति नियमात्।

**विशेषः –** अत्र द्वारपालस्य जागरूकता शिववीरस्य कूटनीतिनिपुणत्वं सूचयति। "धूपधूमेनेव" इत्यत्र उत्प्रेक्षा, पादक्षेपध्वनिमिव इत्यत्र चोपमा।

**सरलार्थः –** ततः किञ्चिद् अन्धकारे जाते धूपधूमेन इव दिशासु व्याप्तासु स्कन्धे भुशुण्डीं निधाय निपुणं पश्यन् आगतं प्रत्यागतं च कुर्वन् प्रतापदुर्गद्वारपालः कस्यापि पादक्षेपध्वनिमिव ध्वनिम् अश्रृणोत्। ततः स्थितो भूत्वा दीपप्रकाशे सत्यपि ईषदन्धकारवशात् आयान्तं कमपि जनमपश्यन् (असौ) गम्भीरस्वरेण एवम् अवदत् – कोऽयमागच्छतीति? ततश्च क्षणानन्तरं पुनः तमेव ध्वनिं श्रुत्वा असौ भूयः सक्रोधमवदत् – यत् क एष बधिरः माम् उत्तरम् अददत् मर्तुमिच्छुः इत आयाति?

**मूलम् – ततो "दौवारिक। शान्तो भव, किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि?" इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ "तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्य्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिः पृष्टोऽपि प्रत्युत्तरमददद् हन्तव्य इति" इत्येवं भाषमाणेन द्वाःस्थेन "क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि" इति कथयन्, द्वादशवर्षेण केनापि भिक्षुवटुनाऽनुगम्यमानः, कोऽपि काषायवासाः धृततुम्बीपात्रः, भस्मच्छुरित–ललाटः, रुद्राक्षमालिका–सनाथित–कण्ठः, भव्यमूर्तिः संन्यासी दृष्टः। ततस्तयोरेवमभूदालापः–**

**प्रसङ्गः –** अत्र द्वारपालस्य आगन्तुः जनस्य च संवादं वर्णयति कविः–

**व्याख्या –** ततः=द्वारपालप्रश्नोत्तरम् "दौवारिक!=द्वारपाल!, शान्तो भव=मौनमाकलय, बधिरः=एडः, इति, मुमूर्षुः=मर्तुमिच्छुः, इति च, किमिति=किमर्थम्, व्यर्थम्=निष्प्रयोजनम्, वदसि=कथयसि?," इति=एवम्, वक्तारं=वादिनम्, (जनम्) अपश्यतैव=अनलोकयतैव, मन्द्रस्वरमेदुरा=गम्भीरस्वरसान्द्रस्निग्धा, वाणी=वाक्, आकर्णि=श्रुता। अथ=अनन्तरम्, "तत्, किम्, भवता=त्वया, अद्यापि=अधुनापि, प्रभुवर्य्याणां=शिववीराणाम्, आदेशः=आज्ञा, न अज्ञायि=न ज्ञातः, यत्, दौवारिकेण=द्वारपालेन, प्रहरिणा=रक्षकेण, वा=अथवा, त्रिः=त्रिवारम्, पृष्टोऽपि=प्रश्नविषयीकृतोऽपि, प्रत्युत्तरं=प्रतिवचनम् अददत्=अयच्छन्, हन्तव्यः=मारणीयः, इति" इत्येवम्=इत्थम्, भाषमाणेन=कथयता, द्वाःस्थेन=द्वारपालेन, "क्षम्यताम्=क्षमा कर्त्तव्या, एषः=अयम्, आगच्छामि=आयामि, आगत्य च=समेत्य च, निखिलं=सकलम्, (वृत्तान्तम्), निवेदयामि=वदामि," इति=एवम्, कथयन्=वदन्, केनापि= केनचिदपि, द्वादशवर्षेण, भिक्षुबटुना=भिक्षुबालेन, अनुगम्यमानः= अनुसर्यमाणः, कोऽपि=कश्चिदपि, काषायवासाः=धृतकषायवस्त्रः, धृततुम्बीपात्रः= गृहीततुम्बीभाजनः, भस्मच्छुरितललाटः= भूतिलिप्तभालः, रुद्राक्षमालिका– सनाथितकण्ठः=रुद्राक्षस्रक्शोभितगलः, भव्यमूर्तिः= दर्शनीयाकृतिः, संन्यासी=यतिः, दृष्ट=विलोकितः। ततः=तदनन्तरम्, तयोः=द्वारपालसंन्यासिनोः, एवम्=इत्थम्, आलापः=संवादः, अभूत्=सञ्जातः।

**समासविग्रहाः –** कषायं वासः यस्य सः कषायवासाः (बहु.)। धृतं तुम्बीपात्रं येन सः धृततुम्बीपात्रः (बहु.)। भस्मना छुरितम्, भस्मच्छुरितम्, भस्मच्छुरितं ललाटं यस्य सः, भस्मच्छुरितललाटः। रुद्राक्षाणां मालिका (ष.त.) तया सनाथितः (तृ.त.) रुद्राक्षमालिकासनाथितः कण्ठः यस्य सः (बहु.)।

**व्याकरणम् –** वक्तारम्=वच्+तृच्+अम्। अपश्यता – नञ्+दृश्+शतृ+टा। आकर्णि– आ+कर्ण्+लुङ्+तिप्। अज्ञायि – ज्ञा+लुङ्+तिप्। आदेशः – आङ्+दिश्+ घञ्+सु। अददद् – नञ्+दा+शतृ+सु। हन्तव्य हन्+तव्यत्+सु। भाषमाणेन– भाष्+शानच्+टा। आगत्य – आ+गम्+क्त्वा > ल्यप्। अनुगम्यमानः – अनु+गम्+यक्+शानच्+सु। दृष्टः – दृश्+क्त+सु।

**विशेषः –** संवादात्मकेऽस्मिन् गद्यांशे कर्मवाच्यप्रचुरा सहजा भावाभिव्यक्तिः अस्ति।

**सरलार्थः –** ततः "भो द्वारपाल! (त्वं) व्यर्थमेव 'मुमूर्षु' इति 'बधिर' इति च किमर्थ वदसि" इति वक्तारम् अपश्यन् एव (असौ) गम्भीरां वाचमश्रृणोत्। ततश्च "किं भवान् प्रभुवर्य्याणाम् आदेशम् अधुनापि न जानाति? यद् द्वारपालेन प्रहरिणा वा त्रिवारं पृष्टोऽपि (कश्चिद् जनः) अनुत्तरयन् आगच्छति चेत् हन्तव्यो भवति इति वदन् द्वारपालः, भवान् क्षम्यताम्, एषोऽहम् आगच्छामि, आगत्य च सर्वं निवेदयिष्यामि "इति कथयन्तं कमपि संन्यासिनं पश्यति स्म। यश्च केनापि द्वादशवर्षेण भिक्षुवटुना अनुगम्यमानः काषायवस्त्र धारी तुम्बीपात्रोपेतः भूतिविभूषितभालः कण्ठे धृतरुद्राक्षमालश्चासीत्। ततः तयोः इत्थम् संवादोऽभूत्।

**मूलम – संन्यासी–कथमस्मान् संन्यासिनोऽपि कठोर भाषणैस्तिरस्करोषि?**

**दौवारिकः – भगवन्! भवान् संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयमददेवाऽऽयातीत्याक्रुश्यते।**

**संन्यासी– सत्यं क्षान्तोऽयमपराधः, परमद्यावधि संन्यासिनः, ब्रह्मचारिणः, पण्डिताः, स्त्रियः, बालाश्च न किमपि प्रष्टव्याः, आत्मानमपरिचाययन्तोऽपि प्रवेष्टव्याः।**

**दौवारिक :– संन्यासिन्! संन्यासिन्! बहूक्तम्, विरम, न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे। किन्तु यो वैदिकधर्मरक्षाव्रती, यश्च संन्यासिनां ब्रह्मचारिणां तपस्विनां च संन्यासस्य ब्रह्मचर्यस्य तपसश्चान्तरायाणां हन्ता, येन च वीरप्रसविनीयमुच्यते कोङ्कणदेश–भूमिः, तस्यैव महाराज–शिववीरस्याऽऽज्ञां वयं शिरसा वहामः।**

**प्रसंगः –** अत्र कविः द्वारपालसंन्यासिनोः संवादं वर्णयति –

**व्याख्या –** संन्यासी– अस्मान्=मादृशान्, संन्यासिनः अपि=साधून् अपि, कठोरभाषणैः= परुषवचनैः, कथम्=केन हेतुना, तिरस्करोषि=परिभवसि? दौवारिकः– भगवन्=हे महात्मन्! भवान्=त्वम्, संन्यासी=विरक्तः, तुरीयाश्रमवासी= चतुर्थाश्रमसेवी, इति=अस्मात्, प्रणम्यते=नम्यते, परन्तु=किन्तु, प्रभूणाम्=स्वामिनाम्, आज्ञाम्=आदेशम् उल्लङ्घ्य=अतिक्रम्य, निजपरिचयम्=स्वपरिचितिम्, अददत्=अयच्छन्, एव, (भवान्) आयाति=आगच्छति, इति=अस्माद्धेतोः, आक्रुश्यते=कुप्यते। संन्यासी सत्यम्=अवितथम्, अयम्=एषः, अपराधः =आगः, क्षान्तः=मर्षितः (अस्ति इति शेषः) परम्=किन्तु, अद्यावधि=अतः परम्, संन्यासिनः=तुरीयाश्रमवासिनः, ब्रह्मचारिणः=ब्रह्मचर्यसेविनः, पण्डिताः=विद्वांसः, स्त्रियः=नार्यः, बालाः=बालकाः, च, किमपि=किञ्चिदपि, न=नैव, प्रष्टव्याः= प्रश्नविषयभूताः कर्त्तव्याः, आत्मानम्=निजम्, अपरिचाययन्तः=परिचयमयच्छन्तः, अपि, प्रवेष्टव्याः=प्रवेष्टुं योग्याः कार्याः। दौवारिकः–संन्यासिन्=तपस्विन्! संन्यासिन्=तपस्विन्। बहूक्तम्=अधिकं भाषितम्, विरम=मौनं चर, दौवारिकाः=द्वारपालाः, वयम् ब्रह्मण अपि=विधातुरपि, आज्ञाम्=आदेशम्, न प्रतीक्षामहे=प्रतीक्षां न कुर्मः, किन्तु=परन्तु, यः=यः शिववीरः, वैदिकधर्मरक्षाव्रती= सनातनधर्मरक्षणशीलः, (अस्ति) यः, च, संन्यासिनाम्= तुरीयाश्रमसेविनाम्, ब्रह्मचारिणाम्=वटूनाम्, तपस्विनाम्=तपोरतानाम्, च, संन्यासस्य=वैराग्यस्य, ब्रह्मचर्यस्य= ब्रह्मचारिव्रतस्य, तपसः=तपश्चरणस्य, च, अन्तरायाणाम्=विघ्नानाम्, हन्ता=नाशकः, (अस्ति) येन=शिववीरेण, च, इयम्=एषा, कोङ्कणदेशभूमिः= कोङ्कणदेशभूः, वीरप्रसविनी=वीरप्रसूः, उच्यते=कथ्यते, तस्य एव=पूर्वोक्तस्य एव, महाराजशिववीरस्य=नृपश्रेष्ठस्य शिववीरस्य, आज्ञाम्=आदेशम् वयम्=दौवारिकाः, शिरसा=मूर्ध्ना, वहामः= धारयामः।

**समासविग्रहाः –** कठोरञ्च तद्भाषणम् कठोरभाषणम् (कर्म.), तैः। वैदिकश्चासौ धर्मः (कर्म.) वैदिकध

ार्मः, तस्य रक्षा, वैदिकधर्मरक्षा, तस्याः व्रती (ष.त.)। वीराणां प्रसविनी वीरप्रसविनी (ष.त.)।

**व्याकरणम् –** प्रणम्यते– प्र+नम्+य+लट्+त। उल्लंङ्घ्य – उत्+लङ्घ्+क्त्वा > ल्यप्। आक्रुश्यते – आङ्+क्रुश्+यक्+त। प्रवेष्टव्याः – प्र+विश्+तव्यत्+ जस्। उच्यते– वच्+यक्+लट्+त।

**विशेषः –** अत्र राजविषयिणी रतिर्व्यज्यते। सप्रसादा वैदर्भी च रीतिरस्ति। द्वारपालस्य कर्त्तव्यनिष्ठा द्योत्यते। अत्र यथासंख्योऽलंकारोऽस्ति।

**सरलार्थ :–**

**संन्यासी** – अस्मान् संन्यासिनः अपि त्वं कठोरभाषणेन कथं तिरस्करोषि?

**दौवारिकः** – भवान् संन्यासी अस्ति, चतुर्थाश्रमसेवी चास्ति अतः भवन्तं प्रणमामि, किन्तु स्वामिनामादेशम् उल्लंघ्य स्वपरिचयमददद् इत आयाति तस्मात् कुप्यते।

**संन्यासी** – उचितमस्ति, (तव), अयमपराधः (मया) मर्षितः, तथापि अद्यारभ्य संन्यासिनः, ब्रह्मचारिणः, पण्डिताः, स्त्रियः बालाश्च न किमपि (त्वया) प्रष्टव्याः, स्वपरिचयमयच्छन्तः अपि प्रवेष्टव्याः।

**दौवारिकः** – संन्यासिन्! संन्यासिन्! बहुभाषितम्, विरम, दौवारिका वयं विधातुराज्ञामपि न मन्यामहे। किन्तु सनातनधर्मरक्षिणः संन्यासिनां संन्यासस्य, ब्रह्मचारिणां ब्रह्मचर्यस्य तपस्विनां तपसश्च विघ्नानां हर्तुः, येन च वीरप्रसविनीयं कोङ्कणदेश–भूमिः उच्यते, तस्यैव महाराज–शिववीरस्यैव आज्ञां शिरसा वहामः।

**मूलम् – संन्यासी – अथ किमप्यस्तु, पन्थानं निर्दिश, आवां शिववीरनिकटे जिगमिषावः।**

**दौवारिकः – अलमालप्यापि तत्, प्राह्ने महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेश–समयो भवति न तु रात्रौ।**

**संन्यासी – तत् किं कोऽपि न प्रविशति रात्रौ?**

**दौवारिकः – (साक्षेपम्) कोऽपि कथं न प्रविशति? परिचिता वा प्राप्त–परिचयपत्रा वा आहूता वा प्रविशन्ति, न तु भवादृशाः; ये तुम्बीं गृहीत्वा द्वाराद् द्वारम्–इति कथयन्नेव तत्तेजसेव घर्षितो मध्य एव विरराम।**

**संन्यासी – (स्वगतम्) राजनीति–निष्णातः शिववीरः। सर्वथा दौवारिकता–योग्य एवायं द्वारपालः स्थापितोऽस्ति। परीक्षितमप्येनमेकस्मिन् विषये पुनः परीक्षिष्ये तावत्। (प्रकटम्) दौवारिक! इत आयाहि, किमपि कर्णे कथयिष्यामि।**

**दौवारिकः – (तथा कृत्वा) कथ्यताम्।**

**प्रसंगः –** महाकविरत्र द्वारपालसंन्यासिनोः संवादं वर्णयति –

**व्याख्या –** संन्यासी – अथ=अनन्तरम्, किमप्यस्तु=किमपि भवतु, पन्थानं=मार्गम्, निर्दिश=सूचय, आवाम्, शिववीरनिकटे=शिववीरान्तिके, जिगमिषावः= गन्तुमिच्छावः।

दौवारिकः – तत्=तस्मात्, आलप्यापि अलम्=नैतद्वाच्यम्, भवादृशानां=त्वादृशानाम्, प्रवेशसमयः=प्रवेशकालः, प्राह्णे=पूर्वाह्णे, महाराजस्य= शिववीरस्य सन्ध्योपासनसमये=सन्ध्यावन्दनकाले, भवति, न तु रात्रौ=निशायां न (भवति)।

संन्यासी – तत्किम्=तर्हि किम्, रात्रौ=निशायाम्, कोऽपि=कश्चिदपि, न=नैव, प्रविशति=प्रवेशं करोति?

दौवारिकः – (साक्षेपम्=सकोपम्) कोऽपि=कश्चिदपि, कथं=कस्मात्, न प्रविशति=नहि प्रवेशं करोति, परिचिताः=परिज्ञाताः, प्राप्तपरिचय– पत्राः=लब्धाभिज्ञानपत्रकाः, वा=अथवा आहूताः=आमन्त्रिताः, प्रविशन्ति=प्रवेशं कुर्वन्ति, न तु, भवादृशाः=त्वादृशाः, ये=जनाः, तुम्बीम्=तुम्बीपात्रम्, गृहीत्वा=आदाय, द्वाराद्द्वारम्=प्रतिद्वारम्, इति=एवम्, कथयन्=ब्रुवन्, एव, तत्तेजसा=तद्दीप्त्या, धर्षितः=पराभूतः, इव, मध्ये एव=अन्तरा एव, विरराम=मौनमालम्बत।

संन्यासी – (स्वगतम्=मनसि) शिववीरः, राजनीति–निष्णातः= नृपनयनिपुणः (अस्ति)। सर्वथा=सर्वप्रकारेण; दौवारिकतायोग्यः= द्वारपालकर्मनिपुणः, एव, अयम्=एषः, द्वारपालः=दौवारिकः, स्थापितोऽस्ति= नियुक्तोऽस्ति। परीक्षितमपि=निरीक्षितमपि, पुनः=भूयः, एकस्मिन् विषये= अन्यस्मिन् विषये, परीक्षिष्ये=परीक्षां करिष्ये, तावत्=तावत्कालपर्यन्तम्। (प्रकटम्=प्रकाशम्) दौवारिक!=द्वारपाल!, इत आयाहि=अत्रागच्छ, किमपि=किञ्चिद् अपि, कर्णे=श्रोत्रे, कथयिष्यामि=वक्ष्यामि।

दौवारिकः – (तथा=तेन प्रकारेण, कृत्वा=विधाय) कथ्यताम्=उच्यताम्।

**समास–विग्रहाः –** शिववीरस्य निकटम् (ष.त.), तत् शिववीरनिकटम्, तस्मिन्,। परिचयस्य पत्रम्, परिचयपत्रम् (ष.त.), प्राप्तं परिचयपत्रं यैस्ते (बहु.)। राज्ञां नीतिः राजनीतिः (ष.त.), राजनीतौ निष्णातः, राजनीतिनिष्णातः, (स. तपु.)।

**व्याकरणम् –** निर्दिश – निर्+दिश्+लोट्+सिप्, जिगमिषावः – गम्+सन्+लट् +वस्। निष्णातः – नि+स्ना+क्त+सु।

**विशेषः –** संवादात्मकेऽस्मिन् गद्ये द्वारपालस्य कर्त्तव्यपरायणता प्रशस्याऽस्ति। 'तत्तेजसा घर्षित इव' इत्यत्रोत्प्रेक्षा।

**सरलार्थ :–**

संन्यासी – अथ किमप्यस्तु, पन्थानं दर्शय, आवां शिववीरस्य समीपे गन्तुमिच्छावः।

दौवारिकः – तूष्णींभव, त्वादृशानां प्रवेशकालः महाराजस्य प्रातः सन्ध्यो– पासनसमये भवति, न तु निशायाम्।

संन्यासी – तदा रात्रौ न कश्चित् प्रविशति?

दौवारिक – (सक्रोधम्) कोऽपि कथं न प्रविशति? परिचिताः परिचय– पत्रधारिणः आमन्त्रिताः वा प्रविशन्ति, न तु त्वादृशाः, ये तुम्बीभाजनं गृहीत्वा प्रतिद्वारम्– इति वदन् एव तत्तेजसा पराभूत इव मध्य एव विरराम।

संन्यासी – (आत्मगतम्) शिववीरो राजनीतिनिपुणोऽस्ति। सर्वथा दौवारिककर्मणि कुशलोऽयं द्वारपालो नियोक्तोऽस्ति। परीक्षितमपि पुनः एकस्मिन् विषये परीक्षिष्ये। (प्रकाशम्) दौवारिक! इत आगच्छ, किमपि कर्णे वक्ष्यामि।

दौवारिकः – (तथा कृत्वा) कथ्यताम्।

**मूलम् –**

**संन्यासी – निरीक्षस्व, त्वमधुना दौवारिकोऽसि, प्राणानगणयन् जीविकां निर्वहसि, त्वं सहस्रं वाऽयुतं वा मुद्रा राशीकृताः कदापि प्राप्स्यसीति न कथमपि सम्भाव्यते।**

**दौवारिकः – आम्, अग्रे कथ्यताम्।**

**संन्यासी – वयं च संन्यासिनो वनेषु गिरिकन्दरेषु च विचरामः, सर्वं रसायन–तत्त्वं विद्मः।**

**दौवारिकः – स्यादेवम्, अग्रे अग्रे?**

**संन्यासी – तद् यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेः,तदधुनैव परिष्कृतं पारद–भस्म तुभ्यं दद्याम्; यथा त्वं गुञ्जामात्रेणापि द्वापञ्चाशत्सङ्ख्याक– तुलापरिमितं ताम्रं जाम्बूनदं विधातुं शक्नुयाः।**

**प्रसंगः –** अत्र संन्यासी उत्कोचलोभेन द्वारपालं परीक्षितुमिच्छति –

**व्याख्या –** संन्यासी "निरीक्षस्व=पश्य, त्वम्=द्वारपालः, अधुना=सम्प्रति, दौवारिकः= द्वारपालः, असि, प्राणान्=असून्, अगणयन्=अविचारयन्, जीविकाम्=वृत्तिम्, निर्वहसि=धारयसि, त्वम्, सहस्रं वाऽयुतं वा=प्रभूतम्, मुद्राः=रुप्यकाणि, राशीकृताः=संगृहीताः, कदापि, प्राप्स्यति=लप्स्ये, इति, कथमपि=केनापि प्रकारेण, न सम्भाव्यते=न संभवति।

दौवारिकः – आम्=सत्यम्, अग्रे=पुरतः, कथ्यताम्–उच्यताम्।

संन्यासी – वयं संन्यासिनः=वयं वीतरागिणः, वनेषु=अरण्येषु, गिरिकन्दरेषु= पर्वतगह्वरेषु, च, विचरामः=भ्रमामः, सर्वं=निखिलम्, रसायनतत्त्वम्= औषधिविशेषसामर्थ्यम्, विद्मः=जानीमः।

दौवारिकः – एवम् स्याद्=कदाचिदेवं भवेत्, अग्रे अग्रे=अतः परं वद।

संन्यासी – तत्=तस्मात्, यदि=चेत्, त्वम् माम्=संन्यासिनम्, प्रविशन्तम्=अन्तः गच्छन्तम्, न प्रतिरुन्धेः=न रुणत्सि, तत्, अधुना एव=इदानीमेव, परिष्कृतम्, पारदभस्म=रसभसितम्, तुभ्यम्=द्वारपालाय, दद्याम्=यच्छेयम्, यथा=येन, त्वम् गुञ्जामात्रेण=गुञ्जापरिमितेन, द्वापञ्चाशत्संख्याकतुलापरिमितम्= एतावत्तुलापरिमाणम्, ताम्रम्=शुल्वम्, जाम्बूनदम्=सुवर्णं, विधातुम्=कर्तुम्, शक्नुयाः=समर्थो भवेः।

**समासविग्रहाः –** गिरीणां कन्दराः (ष.त.) तेषु।

**व्याकरणम् –** अगणयन्–नञ्+गण्+णिच्+शतृ+सु। प्रतिरुन्धेः– प्रति+ रुधि+विधिलिङ्+सिप्। प्रविशन्तम्– प्र+विश+शतृ+अम्।

**विशेषः –** अत्र संन्यासी लोभेन द्वारपालं वञ्चयितुमिच्छति, सेयं कूटनीतिः राजनीतेरङ्गमस्ति।

**सरलार्थः–** संन्यासी कथयति– पश्य, त्वं सम्प्रति द्वारपालोऽसि, प्राणान् उपेक्ष्य जीविकां निर्वहसि, त्वं कदापि विपुलं धनं प्राप्स्यसि इति न संभवति। तदा द्वारपालः ब्रूते–सम्यक्, अतः परं ब्रूहि। संन्यासी अवदत्–वयं संन्यासिनः वनेषु पर्वतगुहासु च भ्रमामः, सर्वं रसायनतत्त्वं च जानीमः। दौवारिकः कथयति–एवं भवेद् नाम, अग्रे वद तदा संन्यासी ब्रूते–तस्मात् यदि त्वं मां दुर्गे प्रविशन्तं न रुणत्सि तदाहं तुभ्यं पारदभस्म दास्यामि, स्वल्पेन येन त्वं विपुलं ताम्रं स्वर्णं कर्तुं समर्थो भवेः।

**मूलम् – हंहो! कपटसंन्यासिन्!! कथं विश्वासघातं स्वामिवञ्चनं च शिक्षयसि ? ते केचनान्ये भवन्ति जार–जाताः, ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानमन्धतमसे पातयन्ति, न वयं शिवगणास्तादृशाः। (संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय कस्त्वम्? कुतः आयातः? केन वा प्रेषितः ?**

**संन्यासी – (स्मित्वेव) अथ त्वं मां कं मन्यसे ?**

**दौवारिकः – अहं तु त्वामस्यैव ससेनस्याऽऽयातस्य अपजलखानस्य–**

**संन्यासी – (विनिवार्य मध्य एव) धिग् धिग्!**

**दौवारिकः – कस्याप्यन्यस्य वा गूढचरं मन्ये। तदादेशं पालयिष्यामि प्रभुवर्यस्य। (हस्तमाकृष्य) आगच्छ दुर्गाध्यक्ष–समीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति।**

**ततः संन्यासी तु – "त्यज, नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि, दयस्व दयस्व" –इति सहस्रधा समचकथत्, तथापि दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः।**

**प्रसङ्गः –** गद्येऽस्मिन् प्रलोभनेन परीक्षणतत्परं संन्यासिनं द्वारपालः प्राह–

**व्याख्या –** हंहो!= अरे!, कपटसंन्यासिन्=छलपरायण!, (माम्) विश्वासघातं= कृतघ्नत्वम्, स्वामिवञ्चनम्=प्रभुच्छलनम्, च, कथं=कस्मात्, शिक्षयसि=पाठयसि, ते केचन अन्ये=ते केऽपि अपरे, जारजाताः= परपुरुषोत्पन्नाः, भवन्ति=सन्ति, ये=नीचजनाः, उत्कोचलोभेन= अनुचितधनतृष्णया, स्वामिनम्=प्रभुम्, वञ्चयित्वा=छलयित्वा, आत्मानं=स्वम्, अन्धतमसे=घोरनरके, पातयन्ति=निमज्जितं कुर्वन्ति, वयं=दौवारिकाः, शिवगणाः= शिववीरानुचराः, तादृशाः=तत्समाः, न= नैव। (संन्यासिनः= छद्मवेषधारिणः, हस्तं=करम्, धृत्वा=समादाय) इतस्तु=इत आगच्छ, सत्यम्=तथ्यम्, कथय=ब्रूहि, कस्त्वं=कोऽसि, कुत आयातः= कस्मात्स्थानाद् आगतः ? वा, केन प्रेषितः=केन जनेन प्रहितः ?

संन्यासी – (स्मित्वेव=ईषद् विहस्येव) अथ=तावत् त्वम्=द्वारपालः, मां= संन्यासिनम्, कं, मन्यसे=जानासि?

दौवारिकः– अहम्=द्वारपालः, तु, त्वां, संन्यासिनम्, ससेनस्य= सेनासमन्वितस्य, आयातस्य=आगतस्य,

अस्य=समीपस्थस्य, अपजलखानस्य एव.............

संन्यासी – (विनिवार्य=अवरुध्य, मध्य एव=अन्तरा एव) धिग्–धिग् !

दौवारिकः – वा=अथवा, कस्यापि, अन्यस्य=अपरस्य, गूढचरं=गुप्तचरम्, मन्ये=जानामि,। तत्=तस्मात्, प्रभुवर्य्यस्य=स्वामिनः आदेशम्= आज्ञाम्, पालयिष्यामि=पालनं करिष्यामि, (हस्तं=करम्, आकृष्य=गृहीत्वा), दुर्गाध्यक्षसमीपे= दुर्गपतिसविधे, आगच्छ=आयाहि, स एव=दुर्गाध्यक्ष एव, अभिज्ञाय=ज्ञात्वा, त्वया=भवता यथोचितम्=यथायोग्यम्, व्यवहरिष्यति= आचरिष्यति।

ततः=तदनन्तरम्, संन्यासी=परिव्राट्, तु –''त्यज=मुञ्च, अहम्= संन्यासी, पुनः=भूयः न आयास्यामि= न आगमिष्यामि, अहम्, पुनः एवम्= इत्थम्, न, कथयिष्यामि=वक्ष्यामि (त्वम्) महाशयः=दयालुः, असि, दयस्व=दयां कुरु, दयस्व=दयां कुरु'' इति=एवम्, सहस्रधा=अनेकधा, समचकथत्=अवदत्, तथापि= पुनरपि, दौवारिकः, तु, तम्=संन्यासिनम्, आकृष्य=गृहीत्वा, नयन् एव्=कर्षयन्नेव, प्रचलितः=प्रस्थितः।

**समासविग्रहाः –** विश्वासस्य घातम् विश्वसघातम् (ष.त.)। स्वामिनो वञ्चनम् स्वामिवञ्चनम् (ष.त.)। दुर्गाध्यक्षस्य समीपे दुर्गाध्यक्षसमीपे (ष.त.)।

**व्याकरणम् –** विनिवार्य–वि+नि+वृ+णिच्+क्त्वा >ल्यप्। समचकथत्– सम्+कथ्+ लुङ्.+तिप्। नयन्=नी+शतृ+सु।

**विशेषः –** गद्येऽस्मिन् द्वारपालस्य निर्लुब्धता सूच्यते।

**सरलार्थः –** दौवारिकः कथयति–रे कपटसंन्यासिन्! त्वं माम् विश्वासघातं स्वामिप्रतारणं च शिक्षयसि? स्वामिवञ्चकाः ते केचन अन्ये एव जाल्मा भवन्ति, ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानं घोरनरके पातयन्ति, वयं शिवानुचराः तथाविधाः न स्मः। (संन्यासिनं गृहीत्वा) इतः आगच्छ, सत्यं वद, त्वं कोऽसि, कुतश्च आगतोऽसि, केन जनेन वा प्रेषितोऽसि? संन्यासी सस्मितमवदत्–त्वं मां कं मन्यसे ? दौवारिकोऽवदत्-अहं तु त्वाम् ससेनस्य अस्यैव अपजलखानस्य.......। संन्यासी मध्ये एव तं विनिवार्य धिग्धिगिति अवदत्। ततः दौवारिकः अवदत्–अथवा अन्यस्य गुप्तचरं मन्ये। तस्मात् स्वामिन एवादेशं पालयिष्यामि, (हस्तेन गृहीत्वा) दुर्गाध्यक्षसमीपे आगच्छ, स एव वास्तविकरूपेण ज्ञात्वा यथायोग्य व्यवहरिष्यति। ततः संन्यासी पुनः अवदत्– ''त्यज, अहं पुनः न आगमिष्यामि, न च एवं कथयिष्यामि त्वं दयालुः असि, दयस्व'' इति अनेकधा अवदत्; पुनरपि द्वारपालः तं गृहीत्वा नयन् एव प्राचलत्।

**मूलम् – अथ यावद् द्वारस्थ–स्तम्भोपरि संस्थापितायां काचमञ्जूषायां जाज्वल्य मानस्य प्रबलप्रकाशस्य दीपस्य समीपे समायातः, तावत् संन्यासिनोक्तम् ''दौवारिक! अपि मां पूर्वमपि कदाऽप्यद्राक्षीः?'' ततो दौवारिकः पुनस्तं निपुणं निरीक्षमाणो मन्द्रेण स्वरेण, अरुणापाङ्गाभ्यां लोचनाभ्याम्, गौरतरेण वर्णेन, चुम्बितयौवनेन वयसा, निर्भीकेण हारिणा च मुखमण्डलेन पर्यचिनोत्। भुशुण्डी–समुत्तोलनकिण–कर्कश–करग्रहमपहाय, सलज्ज इव च नम्रीभूय, प्रणमन्नुवाच– ''आ! कथं श्रीमान् गौरसिंह आर्यः? क्षम्यतामनुचितव्यवहार एतस्य ग्राम्यवराकस्य।'' तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः समवोचत्– ''दौवारिक! मया बहुशः परीक्षितोऽसि, ज्ञातोऽसि यथायोग्य एव पदे नियुक्तोऽसि चेति। त्वादृक्षा एव प्रभूणां पुरस्कारभाजनानि भवन्ति, लोकद्वयञ्च विजयन्ते। तव प्रामाणिकतां जानीत एवाऽत्र भवान् प्रभुवर्य्यः, परमहमपि विशिष्य कीर्तयिष्यामि। निर्दिश तावत् कुत्र श्रीमान्? किञ्चानुतिष्ठति?**

**प्रसङ्गः –** अत्र निजपरिचयानन्तरं गौरसिंहो द्वारपालं प्रशंसति–

**व्याख्या –** अथ=अनन्तरम्, यावत्=यदा, द्वारस्थस्तम्भोपरि= द्वाःस्थस्थूणोपरि, संस्थापितायाम्=निहितायाम्, काचमञ्जूषायाम्=काचपेटिकायाम्, जाज्वल्यमानस्य=ज्वलनशीलस्य, प्रबलप्रकाशस्य=तीव्रद्युतिमतः, दीपस्य=प्रदीपस्य, समीपे=निकटे, समायातः=समागच्छत्, तावत्=तदा, संन्यासिना=साधुना, उक्तम्=कथितम्, ''दौवारिक!=द्वारपाल!, अपि=किम्, माम्=संन्यासिनम्, पूर्वमपि=पुराअपि,

कदापि=कस्मिन्नपि काले, अद्राक्षीः=अपश्यः?ततः तदनन्तरम्, दौवारिकः, पुनः=भूयः तम्=संन्यासिनम् निपुणम्=सम्यक्, निरीक्षमाणः=पश्यन्, मन्द्रेण स्वरेण=गभीरवाचा, अरुणापाङ्गाभ्याम्=रक्तनेत्रप्रान्ताभ्याम्, लोचनाभ्याम्= नेत्राभ्याम्, गौरतरेण वर्णेन=अतिगौरवर्णेन, चुम्बितयौवनेन=प्राप्तयौवनेन, वयसा=आयुषा, निर्भीकेण=भीतिरहितेन, हारिणा=मनोहारिणा, च, मुखमण्डलेन= आननबिम्बेन, पर्यचिनोत्=परिचितवान्। भुशुण्डी–समुत्तोलन–किण– कर्कश–करग्रहम्= भुशुण्डीसमुत्थापनव्रणजचिह्नकठोरहस्तग्रहणम्, अपहाय=विहाय, सलज्ज इव=लज्जित इव, च, नम्रीभूय=नतो भूत्वा, प्रणमन्=नमस्कुर्वन्, उवाच= प्राहैं"आः !=अरे !, कथम्=किम्, श्रीमान्=श्रीसम्पन्नः, आर्य गौरसिंहः, (अस्ति)? एतस्य=अस्य, ग्राम्यवराकस्य=क्षुद्रग्रामीणस्य, अनुचितव्यवहारः= अशिष्टाचरणम्, क्षम्यताम्=मर्ष्यताम्, तदवधार्य=तन्निशम्य, तस्य=द्वारपालस्य, पृष्ठे=पृष्ठभागे, हस्तं=करम्, विन्यस्यन्=स्थापयन्, संन्यासीरूपः= संन्यासीवेषः, गौरसिंहः, समवोचत्=अवदत्।

दौवारिक! मया=गौरसिंहेन बहुशः= अनेकवारम्, परीक्षितोऽसि= सम्यग्दृष्टोऽसि, ज्ञातोऽसि=अवगतोऽसि, यथायोग्ये=यथोचिते, पदे=स्थाने, एव, नियुक्तोऽसि=नियोजितोऽसि, च इति। त्वादृक्षाः= त्वत्तुल्याः एव, प्रभूणां=स्वामिनाम्, पुरस्कारभाजनानि=उपहारपात्राणि, भवन्ति जायन्ते, लोकद्वयम्=इहलोकं परलोकञ्च, विजयन्ते= जयन्ति।

अत्र भवान्=श्रीमान्, प्रभुवर्य्यः=स्वामिवरः, तव=भवतः, प्रामाणिकताम्= कर्त्तव्यपरताम्, जानीत एव= जानाति एव, परम्=तथापि, अहमपि, विशेष्य=विशेषरूपेण, (तान्) कीर्तयिष्यामि=प्रशंसां करिष्यामि, निर्दिश=ज्ञापय, तावत् कुत्र=कस्मिन् स्थाने श्रीमान्=श्रीसमन्वितः, (शिववीरः) किञ्च=अपरञ्च, अनुतिष्ठति=आचरति।

**समासविग्रहाः** – द्वारे तिष्ठति इति द्वारस्थः (उप.तत्पु.), स चासौ स्तम्भः (कर्म) तस्य उपरि (ष. त.)। अरुणौअपाङ्गौ ययोस्तौ अरुणापाङ्गौ (बहु.), ताभ्याम्। चुम्बितं यौवनं येन तत्, चुम्बितयौवनम् (बहु.) तेन। भुशुण्डयाः समुत्तोलनम् भुशुण्डीसमुत्तोलनम् (ष.त.), तस्माद् किणः, तेन कर्कशः भुशुण्डी–समुत्तोलनकिणकर्कशः, स चासौ करः (कर्म.) तस्य ग्रहः भुशुण्डीसमुत्तोलन– किणकर्कशकरग्रहः तम्। ग्राम्यश्चासौ वराकः ग्राम्यवराकः (कर्म.) तस्य।

**व्याकरणम्** – संस्थापितायाम्–सम्+स्था+पुक्+णिच्+क्त+टाप्+ङि.। जाज्वल्यमानस्य–ज्वल्+यङ्.+शानच्+ङस्। अद्राक्षीः–दृश्+लुङ्.+सिप्। निरीक्षमाणः– निर्+ईक्ष्+शानच्+सु। पर्यचिनोत्–परि+चिञ्+लुङ्.+तिप्। प्रणमन्–प्र+नम्+शतृ+सु। क्षम्यताम्–क्षम्+यक्+लोट्+त। विजयन्ते–वि+ जि+लट्+झि। अवधार्य–अव+धृ+क्त्वा ल्यप्।

**विशेषः** – गौरसिंहद्वारा पौनःपुन्येन कृतं परीक्षणं दौवारिकस्य दृढां स्वामिभक्तिं सूचयति।

**सरलार्थः** – अथ यावद् द्वारस्तम्भोपरिस्थापितायां काचपेटिकायां जाज्वल्यमानस्य तीव्रप्रकाशकरस्य दीपकस्य समीपे समायातः, तदा संन्यासी अवदत्– दौवारिक! किं त्वं माम् कदाचित् पूर्वमपि अपश्यः। तदा द्वारपालस्तं सम्यक् पश्यन् गभीरयावाचा स्पृष्टयौवनेन वयसा निर्भीकेण मनोहारिणा च मुखमण्डलेन (अयं गौरसिंह इति) अजानत्। तदा भुशुण्डीतोलनसंजातेन किणेन कर्कशस्य करस्य ग्रहणं त्यक्त्वा लज्जित इव नम्रो भूत्वा सप्रणामम् अवदत्–'अरे! किं श्रीमान् आर्यः गौरसिंहः अस्ति? क्षुद्रग्राम्यजनस्य इदमनुचितमाचरणं (भवान्) मर्षयतु।" तन्निशम्य तत्पृष्ठे हस्तं संस्थापयन् संन्यासिरूपो गौरसिंहः अवदत्–हे दौवारिक! अहं त्वां बहुवारं परीक्षितवान् अस्मि, ज्ञातं मया, भवान् योग्ये पदे एव नियुक्तोऽस्ति। तव सदृशा एव प्रभूणां पुरस्कारयोग्याः भवन्तिः, इहलोकं परलोकञ्च जयन्ति। श्रीमान् शिववीरः तव प्रामाणिकतां जानाति एव, परम् अहम् अपि विशेषेण कथयिष्यामि। निर्दिश तावत्, श्रीमान् शिववीरः कुत्र अस्ति? किञ्च करोति? इति।

**मूलम् – ततः पुनर्बद्धाञ्जलेर्दौवारिकस्य किमपि कर्णे कथितमाकर्ण्य प्रधानद्वारमुल्लङ्घ्य, नेदीयस्यामेकस्यां निम्बतरु–तल–वेदिकायां सहचरं समुपवेश्य, तुम्बीमेकतः संस्थाप्य, स्वाङ्गरक्षिकावरण–काषायवसनं चैकतो**

**निम्बशाखायाम्– वलम्बय्य, पट–खण्डेन पक्ष्मणोः कपोलयोः कर्णयोर्भ्रुवोश्चिबुके नासायां केशप्रान्तेषु च छुरितामिव विभूतिं प्राकञ्छ्य स्कन्धयोः पृष्ठे च लम्बमानान् मेचकान् कुञ्चितान् कचानाबध्य, सहचरपोटलिकात उष्णीषमादाय, शिरसि चाऽऽधाय, सुन्दरमुत्तरीयं चैकं स्कन्धयोर्निक्षिप्य, दौवारिक–निर्देशानुसारं श्रीशिववीरालंकृतामट्टालिकां प्रति प्रातिष्ठत।**

**प्रसगः –** अत्र साधुवेषं विहाय सज्जीभूय च गौरसिंहः द्वारपालनिर्देशानुसारं शिववीरं प्रति गच्छति–

**व्याख्या –** ततः=तदनन्तरम्, पुनः, बद्धाञ्जलेः=विहिताञ्जलेः, कर्णे=श्रोत्रे, किमपि=किञ्चिदपि, कथितम्=उक्तम्, आकर्ण्य=श्रुत्वा, प्रधानद्वारम्= मुख्यद्वारम्, उल्लङ्घ्य= अतिक्रम्य, नेदीयस्याम्= निकटतरवर्तिन्याम्, एकस्याम्, निम्बतरुतलवेदिकायाम्=अरिष्टपादपाधश्चत्वरे, सहचरम्= सहगामिनम्, समुपवेश्य=संस्थाप्य, तुम्बीम्=तुम्बीपात्रम्, एकतः=एकस्मिन् भागे, संस्थाप्य=संन्यस्य, स्वाङ्गरक्षिकावरणकाषायवसनम्= निजकञ्चुकाच्छादनकाषायाम्बरम्, च, एकतः=एकस्मिन् भागे, निम्बशाखायाम्= अरिष्टविटपे, अवलम्बय्य=अवलम्बितं कृत्वा, पटखण्डेन=लघुवस्त्रेण, पक्ष्मणोः=नेत्रलोम्नोः, कपोलयोः=गण्डप्रदेशयोः, कर्णयोः=श्रोत्रयोः, भ्रुवोः=भ्रूप्रदेशयोः, चिबुके= चिबुकप्रान्ते, नासायां=घोणायाम्, केशप्रान्तेषु=कचप्रदेशेषु, च, छुरितामिव= संलग्नामिव, विभूतिम् =भस्म, प्रोञ्छ्य=परामृज्य, स्कन्धयोः=अंसदेशयोः, पृष्ठे= पृष्ठभागे, च, लम्बमानान्=प्रसृतान्, मेचकान्=श्यामान्, कुञ्चितान्=वक्रान्, च, कचान्=केशान्, आबध्य=प्रसाध्य, सहचरपोटलिकातः=सहयात्रि– मञ्जूषायाः, उष्णीषम्=शिरोवेष्टनम्, आदाय=गृहीत्वा, शिरसि= मस्तके, च, आधाय=धारयित्वा, एकम्, सुन्दरम्=रम्यम्, उत्तरीयम्=प्रावरणम्, स्कन्धयोः=अंसयोः निक्षिप्य= धृत्वा, दौवारिकनिर्देशानुसारम्= द्वारपालसंकेतानुसारम्, श्री शिववीरलंकृताम्= श्री शिववीरशोभिताम्, अट्टालिकाम्=प्रासादम्, प्रति, प्रातिष्ठत=प्रस्थितः।

**समासविग्रहाः –** बद्धः अञ्जलिः, येन सः बद्धाञ्जलिः (बहु.) तस्य। निम्बस्य तरुः, तस्य तले, तत्र वेदिका, (तत्पु.), निम्बतरुतलवेदिका, तस्याम्। स्वस्य अङ्गरक्षिका, तस्याःआवरणम्, स्वाङ्गरक्षिकावरणम् च तद् काषायवसनम् स्वाङ्गरक्षिकावरणकाषायवसनम् (कर्म.)। निम्बस्य शाखा, तस्याम्। श्री शिववीरेण अलंकृता श्रीशिववीरालंकृता (तृ.त.) ताम्।

**व्याकरणम् –** कथितम्–कथ्+क्त+सु। उल्लङ्घ्य–उत्+लङ्घ+क्त्वा >ल्यप्। समुपवेश्य–सम्+उप+विश्+णिच्+क्त्वा >ल्यप्। संस्थाप्य– सम्+स्था+णिच्+क्त्वा >ल्यप्। प्रोञ्छ्य=प्र+उच्छ्+क्त्वा >ल्यप्।

**विशेषः –** अत्र गुप्तचरस्य गौरसिंहस्य वेषपरिवर्तनपाटवं शिववीरस्य कूटनीतिनिपुणत्वं सूचयति।

**सरलार्थः–** ततो बद्धकरे दौवारिकेण कर्णे कथितं श्रुत्वा गौरसिंहः प्रधानद्वारमतिकम्य समीपस्थस्य एकस्य निम्बतरोः अधःवेदिकायां सहचरम् उपवेश्य, तुम्बीपात्रं च एकतो निधाय स्वाङ्गरक्षिकावरणभूतं काषायं वस्त्रम् एकतो निम्बवृक्षशाखायाम् अवलम्बय्य, पटखण्डेन पक्ष्मणोः कपोलयोः कर्णयोः भ्रुवोः चिबुके नासायां केशेषु च छुरितामिव भूतिं परिमृज्य, अंसयोः पृष्ठभागे च लम्बमानान् श्यामलान् च केशान् प्रसाध्य, सहचरपोटलिकातः शिरोवेष्टनवस्त्रम् आदाय शिरसि धारयित्वा एकं रम्यमुत्तरीयकं स्कन्धयोः धृत्वा दौवारिकनिर्देशानुसारं श्रीशिववीरेण अलंकृतं प्रासादं प्रत्यचलत्।

**मूलम् – शिववीरस्तु कस्याञ्चिच्चन्द्रचुम्बिन्यां सान्द्र–सुधासार– संलिप्तभित्तिकायां धूपधूपितायां गजदन्तिकावलम्बितविविध–च्छुरिकाखड्गरिष्टिकायां स्वर्णपिञ्जर–परिलम्बमान–शुक–पिक–चकोर–सारिका–कलकूजितायामट्टालिकायां सन्ध्यामुपास्योपविष्ट आसीत्। परितश्च तस्यैव खर्वामप्यखर्वपराक्रमां श्यामामपि यशः समूह श्वेतीकृतत्रिभुवनां कुशासनाश्रयामपि सुशासनाश्रयां पठन– पाठनादिपरिश्रमानभिज्ञामपि नीतिनिष्णातां स्थूलदर्शनामपि सूक्ष्मदर्शनां ध्वंस–काण्डव्यसनिनीमपि धर्मधौरेयीं कठिनामपि कोमलाम्**

**उग्रामपि शान्तां शोभित– विग्रहामपि दृढ–सन्धि–बन्धां कलितगौरवामपि कलितलाघवां विशाल–ललाटां प्रचण्डबाहुदण्डां शोणापाङ्गां कम्बुग्रीवां सुनद्धस्नायुं वर्तुलश्यामश्मश्रुं धारिताकृतिमिव वीरतां विग्रहिणीमिव धीरतां समासादित–समर–स्फूर्तिं मूर्तिं दर्शं दर्शं परं प्रसादमासादयन्तस्तस्य वयस्याः कटानध्यवसन्।**

**प्रसङ्गः –** अत्र कविः कृतसन्ध्योपासनं सहचरैश्च परिवृतं शिववीरं वर्णयति –

**व्याख्या –** शिववीरस्तु, कस्याञ्चित्, चन्द्रचुम्बिन्यां=गगनचुम्बिन्याम्, सान्द्र–सुधासारसंलिप्तभित्तिकायाम्=प्रगाढधवलचूर्ण–द्रव्य–लिप्तभित्त्याम्, धूपधूपितायाम्=सुगन्धद्रव्यवासितायाम्, गजदन्तिकावलम्बितविविधच्छुरिका– खड्गरिष्टिकायाम्=भित्तिशङ्कुप्रलम्बितनानाकृपाणिकाकृपाणरिष्टिकायाम्, स्वर्णपिञ्जरलम्बमानशुक–पिकचकोरसारिका–कलकूजितपूजितायाम्= हिरण्यपिञ्जरलम्बित–कीर–कोकिलचलचञ्चुसारिकाकलरवपूर्णायाम्, अट्टालिकायाम्=प्रासादे, सन्ध्याम् उपास्य=सन्ध्यावन्दनं कृत्वा, उपविष्ट आसीत्=स्थित आसीत्। परितश्च=सर्वतश्च, तस्यैव=शिववीरस्यैव, खर्वाम्=वामनाम्, अपि, अखर्वपराक्रमाम्=अदम्यविक्रमाम्, श्यामामपि=कृष्णामपि, यशः समूहश्वेतीकृतत्रिभुवनाम्=कीर्तिसन्ततिधवलीकृतत्रैलोक्याम्, कुशासना– श्रयामपि=दर्भासनारूढामपि, सुशासनाश्रयाम्=सुन्दरप्रशासनाश्रयाम्, पठनपाठनादिपरिश्रमानभिज्ञामपि=अध्ययनाध्यापनादिश्रमापरिचितामपि, नीतिनिष्णाताम्=नयकुशलाम्, स्थूलदर्शनामपि=विशालनेत्रामपि, सूक्ष्मदर्शनाम्= तीक्ष्णबुद्धिसमन्विताम्, ध्वंसकाण्डव्यसनिनीमपि= म्लेच्छहिंसातत्परामपि, धर्मधौरेयीम्=धर्मधुरन्धराम्, कठिनामपि=परुषामपि, कोमलां=मृदुस्वभावाम्, शोभितविग्रहामपि=सुन्दरदेहामपि, दृढसन्धि– बन्धाम्= सुगठितावयवसंस्थानाम्, कलितगौरवामपि= धारितगाम्भीर्यामपि, कलितलाघवाम्=धृतचातुर्याम्, विशालललाटाम्=वृहद्भालाम् प्रचण्ड–बाहुदण्डाम्=बलिष्ठदोर्दण्डाम्, शोणापाङ्गाम्=रक्तनेत्रप्रान्ताम्, कण्बुग्रीवां= शङ्खकण्ठाम्, सुनद्धस्नायुं= सुश्लिष्टस्नायुम्, वर्तुलश्याम–श्मश्रुम्= वृत्ताकारकृष्ण–श्मश्रुम्, धारिताकृतिम्= धृतविग्रहाम्, वीरतां=शूरताम्, इव, विग्रहिणीम्=शरीरिणीम्, धीरतां=गम्भीरताम्, इव, समासादितसमरस्फूर्तिम्=लब्धयुद्धस्फूर्तिम्, मूर्तिम्=देहाकृतिम्, दर्शं दर्शं=पौनः पुन्येन दृष्ट्वा; परम्=अत्युत्कृष्टम्, प्रसादं=प्रसन्नताम् आसादयन्तः=प्राप्नुवन्तः, तस्य= शिववीरस्य, वयस्याः=सहचराः, कटान्=तृणासनानि, अध्यवसन्=विराजमाना आसन्।

**समास–विग्रहाः –** सान्द्रश्चासौ सुधासारः (कर्म.) सान्द्रसुधासारेण संलिप्ताः भित्तिकाः यस्याम् सा (बहु.) तस्याम्। छुरिकाश्च खड्गाश्च रिष्टिकाश्च छुरिकाखड्गरिष्टिकाः (द्वन्द्वः), विविधाश्च ताः छुरिकाखड्गरिष्टिकाः विविधच्छुरिकाखड्गरिष्टिकाः, गजदन्तिकायाम् अवलम्बिताः गजदन्तिकावलम्बिताः, गजदन्तिकावलम्बिताः विविधच्छुरिकाखड्गरिष्टिकाः यस्यां सा, तस्याम्। सुवर्णपिञ्जरेषु परिलम्बमानाः सुवर्णपिञ्जरपरिलम्बमानाः (स.त.) शुकाश्च पिकाश्च चकोराश्च सारिकाश्च शुकपिकचकोरसारिकाः (द्वन्द्वः) सुवर्णपिञ्जरपरिलम्बमाना च ताः शुकपिकचकोरसारिकाः, तासां कलकूजितम्, तैः पूजिता, तस्याम् (तत्पु.)। अखर्वः पराक्रमः यस्याः सा, ताम् (बहु.)। त्रयाणां भुवनानां समाहारः त्रिभुवनम् (द्विगुः), यशः समूहेन श्वेतीकृतम् यशःसमूहश्वेतीकृतम्, यशःसमूहश्वेतीकृतम् त्रिभुवनम् यया सा, यशः समूहश्वेतीकृतत्रिभुवनम् (बहु.), ताम्। ''कुशानाम् आसनम् कुशासनम्, कुशासनम् आश्रयः यस्याः सा, ताम्। धारिता आकृतिः यया सा, ताम् (बहु)।

**व्याकरणम् –** उपास्य–उप+आस्+क्त्वा ल्यप् निष्णाता–नि+स्ना+ क्त+टाप्+सु। धौरेयी= धुरा+ढ (एय)+ङीप्। धारिता–धृ+णिच्+क्त+टाप्+सु। दर्शं दर्शम्= दृश्+णमुल् वीप्सायां द्वित्वम्। अध्यवसन्–अधि+वस्+लङ्+झि।

**विशेषः –** अत्र गद्यांशे 'खर्वामप्यखर्वपराक्रमाम............. कलितलाधवाम्' इत्यत्र विरोधाभासालंकारः अस्ति। 'या मूर्तिः स्वयं खर्वा अस्ति सा कथम् अखर्वपराक्रमा' इति विरोधः, अतिशयपराक्रमशालिनी' इति

तत्परिहारः। एवमेवान्यत्र। चन्द्रचुम्बिन्याम्..........अट्टालिकायाम्' इत्यत्र अतिशयोक्तिः। 'धारिताकृतिमिव वीरताम्' इत्यत्रोत्प्रेक्षा।

**सरलार्थः –** शिववीरः सन्ध्यामुपास्य कस्याञ्चित् अट्टालिकायाम् उपविष्ट आसीत्। या च अत्युच्चत्वात् चन्द्रचुम्बिनी, गाढसुधाचूर्णलिप्ता, धूपवासिता, गजदन्तिकासु अवलम्बितानेकच्छुरिकाखड्गरिष्टिका, स्वर्णपिञ्जरेषु अवलम्बमानकीरकोकिलचकोरसारिकाणां कलरवेण कूजिता आसीत्। शिवं परितश्च तदीयां प्रभावकारिणीं देहाकृतिं दर्शं दर्शं प्रसन्नतामनुभवन्तस्तदीयाः सखायः कटेषु उपविष्टा आसन्। शिवस्य मूर्तिः (देहः) च खर्वा सत्यपि अखर्वपराक्रमा अर्थात् वामना सत्यपि परैः अनभिभवनीयपराक्रमा आसीत्। वर्णेन कृष्णा अपि यशः समूहेन त्रिभुवनं धवलयन्ती आसीत्। कुशासने विराजमाना अपि सुशासनस्य आश्रयभूता आसीत्। पठनपाठनादिश्रमेण अनभिज्ञा अपि नीतिकुशला आसीत्। विशाललोचना सत्यपि सूक्ष्मदर्शनशीला आसीत्। म्लेच्छहिंसनपराऽपि धर्मधुरन्धरा आसीत्। (दुराचारिणां कृते) उग्रा अपि (सज्जनानां कृते) शान्ता आसीत्। रमणीयशरीरधारिणी अपि सुदृढावयवसंस्थानयुता आसीत्। गौरवशालिनी सत्यपि चातुर्योपेता आसीत्। अन्यच्च या विशालललाटा, प्रचण्डबाहुदण्डा रक्तनेत्रप्रान्ता शङ्खग्रीवा सुनद्धस्नायूपेता वर्तुलकृष्णकूर्चयुक्ता चासीत्। (अत एव या) धृताकृतिः वीरतामिव, शरीरिणीं धीरतामिव च प्रतीयमाना आसीत्। या च सपरेण स्फूर्तिं लभमाना आस्ते।

**मूलम् – तेषु च अपजलखान–दमन–विषयक–वार्तामारिप्सुष्वेव कश्चिद् वेत्रहस्तः प्रतीहारः प्रविश्य, वेत्रं कक्षे संस्थाप्य, शिरो नमयित्वा, अञ्जलिं बद्ध्वा न्यवीविदत्– ''प्रभो! श्रीमान् गौरसिंहो दिदृक्षतेऽत्रभवन्तम्''– तदाकर्ण्य ''आम्! प्रवेशय प्रवेशय'' इति सानन्दं सोत्साहञ्च कथितवति महाराष्ट्रमण्डलाऽऽखण्डले, प्रतीहारो निवृत्य, सपद्येव तं प्रावीविशत्।**

**प्रसङ्गः –** अत्र प्रतिहारः गौरसिंहागमनं शिववीरं प्रति सूचयति–

**व्याख्या –** तेषु च=सहचरेषु, च, अपजलखान–दमनविषयक–वार्ताम्= अपजलखान– निग्रहसम्बन्धिवृत्तम्, आरिप्सुषु= आरब्धुमिच्छुषु (सत्सु), एव, कश्चित्=कोऽपि, वेत्रहस्त=वेत्रकरः, प्रतीहारः=द्वारपालः, प्रविश्य=प्रवेशं विधाय, वेत्रम्=वेत्रदण्डम्, कक्षे=कुक्षौ, संस्थाप्य=स्थापयित्वा, शिरः=मस्तकम्, नमयित्वा=अवनम्य, अञ्जलिं बद्ध्वा=बद्धाञ्जलिः सन्, न्यवीविदत्=न्यवेदीत्, ''प्रभो!=स्वामिन्! श्रीमान् गौरसिंहः=आर्यः गौरसिंहः अत्र भवन्तम्= श्रीमन्तम्, दिदृक्षते=द्रष्टुमिच्छति'', तदाकर्ण्य=तच्छ्रुत्वा, आम्=बाढम्, प्रवेशय–प्रवेशय= सत्वरं प्रवेशं कारय'' इति=एवम्, सानन्दम्,=सहर्षम्, सोत्साहम्= उत्साहपूर्वकम्, महाराष्ट्रमण्डलाऽऽखण्डले= महाराष्ट्रप्रदेशेश्वरे, कथितवति=उक्तवति, प्रतीहारः=द्वारपालः, निवृत्य=परावृत्य, सपद्येव= सत्वरमेव, तम्=गौरसिंहम्, प्रावीविशत्=आभ्यन्तरं प्रावेशयत्।

**समास–विग्रहाः –** वेत्रं हस्ते यस्य सः (व्य.बहु.) महाराष्ट्रमण्डलस्य आखण्डलः (ष.त.) महाराष्ट्रमण्डलाखण्डलः, तस्मिन्।

**व्याकरणम् –** आरिप्सुषु–आ+रभ्+सन्+उ+सुप्। नमयित्वा–नम्+णिच्+ क्त्वा। न्यवीविदत्–नि+विद्+लुड्.+तिप्। दिदृक्षते–दृश्+सन्+लट्+त। प्राविशत्–प्र+विश्+लुड्.+तिप्।

**विशेषः –** अत्र 'महाराष्ट्रमण्डलाऽऽखण्डले'इत्यत्र शिववीरे आखण्डलस्य समारोपाद् रूपकम्।

**सरलार्थः –** ततः तेषु (शिवे तत्सहचरेषु च) अपजलखानदमनविषयक– वार्ताम् आरब्धुम् इच्छापरेषु सत्सु कोऽपि वेत्रहस्तः द्वारपालः आगत्य सविनयं न्यवेदयत् हे स्वामिन्! श्रीमान् गौरसिंहः भवद्दर्शनमिच्छति, तन्निशम्य' आम्! तं शीघ्रं प्रवेशय' इति सानन्दं श्रीशिववीरे उक्तवति प्रतीहारः परावृत्य सपदि एव श्री गौरसिंहं प्रावेशयत्।

**मूलम् – तमवलोक्यैव ''इत इतो गौरसिंह! उपविश, उपविश। चिराय दृष्टोऽसि अपि कुशलं कलयसि ? अपि कुशलिनस्तव सहवासिनः ? अप्यङ्गीकृतमहाव्रतं निर्वहथ यूयम् ? अपि कश्चिन्नूतनो**

**वृत्तान्तः ?" इति कुसुमानीव वर्षता पीयूष–प्रवाहेणेव सिञ्चता मृदुना वचनजातेन तत्रभवता शिववीरेणाऽऽद्रियमाणः, आपृच्छ्यमानश्च, त्रिः प्रणम्य, अन्तरङ्ग–मण्डली–जुष्ट– कटे समुपविश्य, करौ सम्पुटीकृत्य "भगवन्! अखिलं कुशलं प्रभूणामनुग्रहेणास्माकमखिलानाम्, अङ्गीकृत–महाव्रते च मा स्म पदं धात् कञ्चनान्तराय इत्येव सदा प्रार्थ्यते भगवान् भूतनाथः। नूतनः प्रत्नश्च को नामाद्यतनसमये वक्तव्यः श्रोतव्यश्च वृत्तान्तः–ऋते दुराचारात् स्वच्छन्दानामुच्छृङ्खलानामुच्छिन्नसच्छीलानां म्लेच्छ–हतकानाम्" इति कथयामास। ततश्च तेषामेवमभूदालापः।**

**प्रसङ्ग :** – अत्र कुशलप्रश्नानन्तरं श्रीशिववीरः श्रीगौरसिंहं नूतनं वृतान्तं प्रष्टुमिच्छति–

**व्याख्या** – तम्=गौरसिंहम्, अवलोक्य=दृष्ट्वा, एव, गौरसिंह! इतः इतः=अत्र आगच्छ, उपविश, उपविश=आस्स्व, आस्स्व। चिराय=चिरकालात्, दृष्टोऽसि=अवलोकितोऽसि, अपि=किम्, कुशलं=क्षेमम्, कलयसि= धारयसि? अपि=किम् तव–भवतः, सहवासिनः= सहचराः, कुशलिनः= कल्याणभाजः, (सन्ति)? अपि=किम्, यूयम्=भवन्तः, अङ्गीकृतमहाव्रतम्= स्वीकृतमहाव्रतम्, निर्वहथ= सेवध्वे? अपि=किम्,कश्चित्=कोऽपि, नूतनः=नव्यः, वृतान्तः=वृत्तजातम्, अस्ति? इति=एवम्, कुसुमानि=पुष्पाणि, वर्षता= विकिरता, इव, पीयूषप्रवाहेण= अमृतस्रोतसा, सिञ्चता=सेचनं कुर्वता, इव, तत्रभवता=श्रीमता, शिववीरेण=श्री शिवराजेन, मृदुना=मधुरेण, वचनजातेन=भाषणेन, आद्रियमाणः=समाद्रियमाणः, आपृच्छ्यमानः=पृष्टः सन्, त्रिः=त्रिवारं, प्रणम्य=नत्वा अन्तरङ्गमण्डलीजुष्टकटे= मित्रवर्गसेवितासने, समुपविश्य= उपविष्टो भूत्वा, करौ सम्पुटीकृत्य= बद्धाञ्जलिः सन् "भगवन्= श्रीमन्! प्रभूणाम्=स्वामिनाम्, अनुग्रहेण=कृपया, अखिलानाम्=सर्वेषाम्, अस्माकम्=अस्मत्सदृशानाम्, अखिलम्=सर्वम्, कुशलम्=क्षेमम् (अस्ति), अङ्गीकृतमहाव्रते= स्वीकृतमहाव्रते, च, कश्चन=कोऽपि, अन्तरायः=विघ्नः, पदम्=स्थानम्, मा स्म धात्=न प्राप्नुयात, इति=एतद्, एव, सदा=सर्वदा, भगवान् भूतनाथः=भगवान् शिवः, प्रार्थ्यते=निवेद्यते। अद्यतनसमये= अधुना, स्वच्छन्दानाम्= स्वतन्त्राणाम्, उच्छृङ्खलानाम्=उद्दण्डानाम्, उच्छिन्न– सच्छीलानाम् नष्टसदाचाराणाम्, म्लेच्छहतकानाम्=दुष्टयवनानाम्, दुराचारात्= पापाचरणात्, ऋते=पृथक्, नूतनः=नव्यः, प्रत्नः=पुरातनः, च, कः नाम=किं नामधेयः, वृत्तान्तः=वृत्तम्, वक्तव्यः=वक्तुं योग्यः, श्रोतव्यः=श्रोतुं योग्यः च अस्ति"? इति=एवम्, कथयामास=जगाद्। ततः=तदनन्तरम्, च, तेषाम्=श्रीशिववीरगौरसिंहादीनाम्, एवम्=इत्थम्, आलापः=संलापः, अभूत्=संजातः।

**समासविग्रहाः** – महत् च तद् व्रतम् महाव्रतम् (कर्म.), अङ्गीकृतं च तद् महाव्रतम् अङ्गीकृतमहाव्रतम् (कर्म.) अन्तरङ्गाणां मण्डली अन्तरङ्गमण्डली (ष.त.) तया जुष्टः, स चासौ कटः (कर्म.), तस्मिन्। उच्छिन्नं सच्छीलं येषां ते, उच्छिन्नसच्छीलाः (बहु.), तेषाम्।

**व्याकरणम्** – निर्वहथ–निर्+वह्+लट्+थ। वर्षता–वर्ष्+शतृ+टा। सिञ्चता–सिञ्च्+शतृ+टा। आद्रियमाणः–आ+दृङ्+यक्+शानच्+सु। आपृच्छ्यमानः–आङ्+प्रच्छ्+यक्+शानच् ।जुष्ट–जुष्+क्त। वक्तव्यः–वच्+तव्यत्+सु। श्रोतव्यः–श्रु+तव्यत्। उच्छिन्न–उद्+छिद्+क्त।

**विशेषः** – 'कुसुमानीव वर्षता' पीयूषप्रवाहेणेव सिञ्चता च इत्यत्र उत्प्रेक्षालंकारः।

**सरलार्थः** – दृष्टे गौरसिंहे–"आगम्यताम्, उपविश्यताम् चिराद् दृष्टोऽसि, सर्वं कुशलमस्ति? तव सहचराः कुशलिनः सन्ति ? किं यूयं स्वीकृतं महाव्रतं निर्वहथ? कश्चित् नूतनो वृतान्तोऽस्ति?" एवं पुष्पाणीव वर्षता अमृतेनेव सिञ्चता शिववीरस्य मधुरभाषणेन समादृतः पृष्टश्च सन् गौरसिंहः त्रिवारं प्रणम्य सहचरवृन्दसेवितकटमारुह्य बद्धाञ्जलिः उवाच–"भगवन्! भवतां कृपया वयं सर्वथा कुशलिनः स्मः; अस्माकं स्वीकृतमहाव्रते न कश्चिद् विघ्नः आगच्छेत्' इति भगवन्तं भूतनाथं प्रार्थयामहे। अद्यत्वे निर्मर्यादानां दुष्टयवनानां दुराचारादन्यो नूतनः पुरातनश्च कः वृतान्तः वक्तव्यः श्रोतव्यो वा भवितुं शक्नोति अर्थात् तेषां दुराचारवृत्तमेव उच्यते श्रूयते च" इति। ततस्तेषाम् इत्थम् आलापः अभूत्।

**मूलम् – शिववीरः –अथ कथ्यतां को वृत्तान्तः ? का च व्यवस्था अस्मन्महाव्रताश्रम–परम्परायाः ?**

**गौरसिंहः – भगवन् ! सर्वं सुसिद्धम्, प्रतिगव्यूत्यन्तरालमङ्गीकृत सनातन– धर्म–रक्षा–महाव्रतानां धारित–मुनि–वेषाणां वीरवराणमाश्रमाः सन्ति। प्रत्याश्रमञ्च वलीकेषु गोपयित्वा स्थापिताः परश्शताः खड्गिाः, पटलेषु तिरोभाविताः शक्तयः, कुशपुञ्जान्तः स्थापिता भुशुण्ड्यश्च समुल्लसन्ति। उञ्छस्य, शिलस्य, समिदाहरणस्य, इङ्गुदीपर्य्यन्वेषणस्य, भूर्जपत्रपरिमार्गणस्य, कुसुमावचयनस्य, तीर्थाटनस्य, सत्सङ्गस्य च व्याजेन, केचन जटिला, परे मुण्डिनः, इतरे काषायिणः, अन्ये मौनिनः, अपरे ब्रह्मचारिणश्च बहवः पटवो बटवश्चराः सञ्चरन्ति। विजयपुरादुड्डीया– ऽत्राऽऽगच्छन्त्या मक्षिकाया अप्यन्तः स्थितं वयं विद्मः, किं नाम एषां यवनहतकानाम्?**

**प्रसङ्गः –** शिववीर गौरसिंहयोः संवादं वर्णयति कविरत्र –

**व्याख्या –** शिववीरः– अथ=अनन्तरम्, कथ्यताम्=उच्चताम्, कः वृतान्तः?= का वार्ता ? (अस्ति), अस्मन्महाव्रताश्रमपरम्परायाः=अस्माकं महाव्रततपोवन– परम्परायाः, का व्यवस्था ?=का स्थितिः ?

गौरसिंहः – भगवन्=श्रीमन्, सर्वम्=निखिलम्, सुसिद्धम्= सुव्यवस्थितम् (अस्ति), प्रतिगव्यूति= प्रत्येकक्रोशयुगलम्, अन्तरालम्=अन्तरा, अङ्गीकृतसनातन–धर्मरक्षामहाव्रतानाम्=स्वीकृतवैदिकध र्मरक्षणतत्पराणाम् धारितमुनिवेषाणाम्=धृतयतिवेषाणाम्, वीरवराणाम्=शूरश्रेष्ठानाम्, आश्रमाः= तपोवनानि, सन्तीतिशेषः। प्रत्याश्रमम्=प्रतितपोवनम्, वलीकेषु=कुटीरप्रान्तेषु, गोपयित्वा=संगोप्य, स्थापिताः=निहिताः, परश्शताः=शताधिकाः, खड्गाः= कृपाणाः, पटलेषु=कुटीराच्छादनेषु, तिरोभाविताः=गोपिताः, शक्तयः= शस्त्र–विशेषाः, कुशपुञ्जान्तः स्थापिता=दर्भसमूहाभ्यन्तरनिक्षिप्ताः, भुशुण्ड्यः= शस्त्रविशेषाः, च, समुल्लसन्ति=विलसन्ति।

उञ्छस्य शिलस्य (च)=मुनिभोज्यधान्यविशेषयोः, समिदाहरणस्य= यज्ञीयकाष्ठानयनस्य, इङ्गुदीपर्य्यन्वेषणस्य=तापसतरुफलमार्गणस्य, भूर्जपत्रपरिमार्गणस्य=भूर्जपर्णान्वेषणस्य, कुसुमावचयनस्य=पुष्पावचयस्य, तीर्थाटनस्य=तीर्थभ्रमणस्य, सत्सङ्गस्य=सत्सङ्गतेः, च, व्याजेन=छलेन, केचन=केचित्, जटिलाः=जटाधारिणः, परे=अन्ये, मुण्डिनः= मुण्डितमस्तकाः, इतरे=अन्ये, काषायिणः=गैरिकवसनाः, अन्ये=अपरे, मौनिनः=मौनधारिणः अपरे=अन्ये, ब्रह्मचारिणः=व्रणिनः, बहवः=अनेके, पटवः=कुशलाः, बटवः= अन्तेवासिनः, (सर्वे) च, चराः=गुप्तचराः, सञ्चरन्ति=विचरन्ति। विजयपुरात्= एतदाख्यनगरात्, उड्डीय=उत्पत्य, अत्र=प्रतापदुर्गे (भवत्समीपे), आगच्छन्त्याः=आयान्त्याः, मक्षिकायाःअपि= क्षुद्रजीवस्यापि, अन्तःस्थितम्= मनोगतं भावम्, वयम्=चराः, विद्मः=जानीमः, एषाम्=एतेषाम्, यवनहतकानाम्= दुष्टम्लेच्छानाम्, का नाम=का वार्ता ? अर्थात् तेषामत्रागमनं न कथमपि संभवति।

**समासविग्रहाः –** सनातनश्चासौ धर्मः, तस्य रक्षा, तस्याः महाव्रतम्, सनातनधर्मरक्षामहाव्रतम् (ष. त.) अङ्गीकृतम् सनातनधर्मरक्षामहाव्रतम् यैः, ते, तेषाम् (बहु.)। आश्रमम् आश्रमं प्रति प्रत्याश्रमम् (अव्ययीभावः) मुनीनां वेषः मुनिवेषः (ष.त.), धारितः मुनिवेष : यैः, ते, तेषाम् (बहु.)।

**व्याकरणम् –** सुसिद्धम्=सु+षिध्+क्त+सु। समुल्लसन्ति–सम्+उद्+ लस्+लट्+झि। जटिलाः–जटा+इलच्+जस्।

**विशेषः –** अत्र उत्साहभावोऽभिज्यते। सप्ताङ्गं राज्यमुच्यते तत्र चराणां विशिष्टं स्थानं भवति। अत्र शिववीरस्य गुप्तचरयोजनायाः रुचिरं दिग्दर्शनं विद्यते।

**सरलार्थः –** शिववीरः अवदत्–हे गौरसिंह ! संन्यासिवेषेण भ्रमता भवता यद् ज्ञातम्, तदुच्यताम्। अस्माकम् महाव्रताश्रमपरम्परायाः स्थितिः कीदृशी वर्तते? तदा गौरसिंहः ब्रूते=श्रीमन् ! सर्वं योजनानुसारमेव प्रचलति। (तद् यथा) प्रत्येकं क्रोशद्वये सनातनधर्मरक्षिणां मुनिवेषधारिणां वीरश्रेष्ठानाम् आश्रमाः सन्ति। प्रत्येकस्मिन् आश्रमे पटलप्रान्ते शताधिकाः खड्गाः, छादनेषु शक्तयः, दर्भसमूहेषु च भुशुण्ड्यः स्थापिताः सन्ति। मुनिभोज्यधान्यस्य, समिधाहरणस्य, इङ्गुदीफलान्वेषणस्य भूर्जपत्रान्वेषणस्य पुष्पावचयस्य तीर्थभ्रमणस्य सत्सङ्गस्य च व्याजेन बहवः जटिलाः, मुण्डिनः, काषायवसनाः, मौनधारिणः ब्रह्मचारिणः पटवः बटवश्च

गुप्तचररूपेण सर्वत्र विचरन्ति। विजयपुराद् उत्पत्य अत्र आयान्त्याः मक्षिकाया अपि मनोगतं भावं वयं ज्ञातुं शक्नुमः। का वार्ता दुष्टयवनानाम् ?

**मूलम् – शिववीरः –साधु, साधु कथं न स्यादेवम् ? भारतवर्षीया यूयम्, तत्रापि महोच्चकुलजाताः अस्ति चेदं भारतं वर्षम्, भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीणः सनातनो धर्मः तमेते, जाल्माः समूलमुच्छिन्दन्ति अस्ति च ''प्राणा यान्तु न च धर्मः'' इत्यार्याणां दृढः सिद्धान्तः। महान्तो हि धर्मस्य कृते लुण्ठ्यन्ते, पात्यन्ते, हन्यन्ते, न धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा, निशीथेष्वपि, वर्षास्वपि, ग्रीष्म–घर्मेष्वपि, महारण्येष्वपि, कन्दरिकन्दरेष्वपि, व्यालवृन्देष्वपि, सिंह–सङ्घेष्वपि, वारण–वारेष्वपि, चन्द्रहास–चमत्कारेष्वपि च निर्भया विचरन्ति। तद् धन्याः स्थ यूयं वस्तुत आर्यवशीयाः वस्तुतश्च भारवर्षीयाः।**

**प्रसङ्गः** – गद्यांशेऽस्मिन् शिववीरः सनातनधर्मरक्षणतत्परान् गौरसिंहादीन् प्रशंसति–

**व्याख्या** – शिववीरः – साधु साधु=शोभनम् शोभनम्, एवं कथं न स्यात्?=इत्थं कथं न भवेत्? यूयम्=भवन्तः, भारतवर्षीयाः=हिन्दुस्थानीयाः, तत्रापि= तस्मिन्नपि, महोच्चकुलजाताः=प्रतिष्ठितवंशोत्पन्नाः, इदञ्च, भारतं वर्षं=भारतम्, स्वदेशे= निजराष्ट्रे, च, सर्वस्यापि=सकलस्यापि (जनस्य) स्वाभाविकः= नैसर्गिकः, एव, अनुरागः=स्नेहः, भवति=जायते, यौष्माकीणः= यौष्माकः, सनातनो धर्मः=वैदिकधर्मः, पवित्रतमः=पावनतमः (अस्ति), एते जाल्माः=इमे दुष्टाः, तम्=सनातनधर्मम्, समूलम्=आमूलात्, उच्छिन्दन्ति=उत्खातयन्ति, ''प्राणाः=असवः, यान्तु=गच्छन्तु, न च, धर्मः=स्वसनातनधर्मः,'' इति=अयम्, आर्याणाम्= भारतवासिनाम्, दृढः=स्थिरः, सिद्धान्तः= सङ्कल्पः, अस्ति=विद्यते, महान्तः= महापुरुषाः, हि=निश्चयेन, धर्मस्य कृते=ध र्मरक्षणार्थम्, लुठ्यन्ते=लुण्ठनं प्राप्नुवन्ति, पात्यन्ते=क्षिप्यन्ते, हन्यन्ते=वध्यन्ते, (तथापि) धर्मं न, त्यजन्ति=मुञ्चन्ति, किन्तु=परन्तु, धर्मस्य रक्षायै=धर्मरक्षणार्थम्, सर्वसुखानि=अखिलकल्याणानि, अपि, त्यक्त्वा=विहाय, निशीथेषु अपि=अर्द्धरात्रिष्वपि, वर्षासु अपि=प्रावृट्स्वपि, ग्रीष्मघर्मेषु अपि=निदाघातपेष्वपि, महारण्येषु अपि=अरण्यानीष्वपि, कन्दरिकन्दरेषु अपि=पर्वतगुहास्वपि, व्यालवृन्देषु अपि=सर्पसमूहेष्वपि, सिंहसङ्घेषु अपि=वनराजनिकरेष्वपि, वारणवारेषु अपि=गजगणेष्वपि चन्द्रहास–चमत्कारेषु अपि=खड्गप्रभापुञ्जेष्वपि, च, निर्भयाः= भयविहीनाः, विचरन्ति=भ्रमन्ति। तत्=तस्मात्, यूयम्=भवन्तः धन्याःस्थ=पुण्यवन्तःस्थ, वस्तुतः=यथार्थतः, आर्यवंशीयाः=आर्यकुलोद्भवाः, वस्तुतः, च, भारतवर्षीयाः= भारतवर्षोद्भवाः स्थ।

**समासविग्रहाः**– ग्रीष्मस्य घर्मः ग्रीष्मघर्मः (ष.त.), तेषु। कन्दरिणां कन्दराः कन्दरिकन्दराः (ष.त.), तेषु। व्यालानां वृन्दः व्यालवृन्दः (ष.त.),तेषु। निर्गतम् भयं येषां ते निर्भयाः (बहु.)।

**व्याकरणम्** – अनुरागः– अनु+रञ्ज्+घञ्+सु। पवित्रतमः–पवित्र+तमप्+सु। यौष्माकीणः– युष्मत् झयुष्माक+खञ्झईन। उच्छिन्दन्ति–उद्+छिद्+ लट्+झि। पात्यन्ते–पत्+णिच्+यक्+झ। हन्यन्ते–हन्+यक्+झ।

**विशेषः** – अत्र सप्रसादा वैदर्भीरीतिः अस्ति। शिववीरस्य कथनेन कविरत्र 'स्वधर्मे निधनं श्रेयः', 'धर्मं न त्यजेज्जीवितस्यापि हेतोः 'चेति उक्तिद्वयं प्रकारान्तरेण स्मरति। अप्रस्तुतानां महतां प्रशंसया प्रस्तुतानां गौरसिंहादीनां प्रशंसा व्यज्यते; तेनात्राप्रस्तुतप्रशंसालंकारोऽस्ति।

**सरलार्थः** – सर्वं सुव्यवस्थितं वर्तते'' इति गौरसिंहमुखात् श्रुत्वा शिववीरः कथयति–शोभनम् अतिशोभनम्। कथं न एवं भवेत् ? यूयं भारतीयाःस्थ, तत्रापि उच्चकुलोत्पन्नाःस्थ। इदं भारतं वर्तते; स्वदेशे सर्वेषामेव स्वाभाविकः अनुरागो भवत्येव। भवतां पवित्रतमं धर्मम् एते यवनहतकाः समूलम् उत्पाटयन्ति। ''प्राणाः यान्तु, न च धर्मः, इति आर्याणां दृढः सिद्धान्तो वर्तते। धर्मस्य कृते महान्तः लुण्ठ्यन्ते, पात्यन्ते हन्यन्ते च, (पुनरपि) धर्म न त्यजन्ति, अपितु धर्मरक्षणार्थं सर्वसुखानि विहाय अर्धरात्रिषु, वर्षासु, ग्रीष्मातपेषु अरण्यानीषु पर्वतगुहासु सर्पसमूहेषु सिंहनिकरेषु गजनिचयेषु खड्ग–प्रभापुञ्जेषु चापि च निर्भयाः विचरन्ति।

तद् यूयं धन्याः स्थ, वस्तुतः आर्यवंशीयाः भारतीयाश्च स्थ।

**मूलम् – अथ कथ्यतां कोऽपि विशेषोऽवगतो वा अपजलखानस्य विषये?**

**गौरसिंहः – ''अवगतः, तत्पत्रमेव दर्शयामि'' इति व्याहृत्य, उष्णीषसन्धौ स्थापितं कन्यापहारक–यवन–युवक–मृत–शरीरवस्त्रान्तःप्राप्तं पत्रं बहिश्चकार।**

**सर्वे च विजयपुराधीशमुद्रामवलोक्य ''किमेतत् ? कुत एतत् ? कथमेतत्? कस्मादेतत् ? इति जिज्ञासमानाः सोत्कण्ठा वितस्थिरे। गौरसिंहस्तु शिववीरस्यापि तत्प्राप्ति–चरित–शुश्रूषामवगत्य संक्षिप्य सर्व वृत्तान्तमवोचत्। ततस्तु दर्श्यताम्, प्रसार्यताम्, पठ्यताम, कथ्यताम्, किमिदम् ? इति पृच्छति शिववीरे गौरसिंहो व्याजहार –**

**प्रसङ्गः –** अत्र अपजलखानविषये जिज्ञासमानं शिववीरं गौरसिंहः ब्रूते–

**व्याख्या –** अथ=अनन्तरम्, कथ्यताम्=उच्यताम्, अपजलखानस्य= विजयपुराधीशसेनापतेः, विषये=सम्बन्धे, कोऽपि=कश्चिदपि, विशिष्टः=विशेषः वृत्तान्तः, अवगतः=ज्ञातः, वा ?

गौरसिंहः– ''अवगतः=ज्ञातः, तत्पत्रम् एव=तदीयं पत्रमेव, दर्शयामि= ईक्षयामि,'' इति=एवम्, व्याहृत्य=उक्त्वा, उष्णीषसन्धौ=शिरोवेष्टनान्तराले, स्थापितम्=निहितम्, कन्यापहारकयवनमृतशरीरवस्त्रान्तः प्राप्तम्= कन्यकापहर्तृम्लेच्छमृतदेहवसनान्तरालाधिगतम्, पत्रम्, बहिश्चकार= निष्कासयामास।

सर्वे=निखिलाः, विजयपुराधीशमुद्राम्=विजयपुरेश्वरमुद्राम्, अवलोक्य=दृष्ट्वा ''एतत् किम्=इदं किम् ? एतत् कुतः=इदं कस्मात्? एतत् कथम्=इदं केन प्रकारेण ? एतत्=इदम्, कस्मात्=कथम् ?'' इति=एवम् जिज्ञासमानाः=ज्ञातुमिच्छन्तः, सोत्कण्ठाः=उत्कण्ठिताः, वितस्थिरे=संजाताः। गौरसिंहः=गौरवटुः, तु, शिववीरस्य अपि=शिवराजस्य अपि, तत्प्राप्ति– चरितशुश्रूषाम्=तल्लब्धिवृत्तश्रवणेच्छाम्, अवगत्य=ज्ञात्वा, सङ्क्षिप्य=संक्षेपेण, सर्वम्=निखिलम्, वृत्तान्तम्=वृत्तम्, अवोचत्=अकथयत्। ततः=तदनन्तरम्, तु, ''दर्श्यताम्=अवलोक्यताम्, प्रसार्यताम्=विस्तार्यताम्, पठ्यताम्=पठनं क्रियताम्, कथ्यताम्=उच्यताम्, इदं किम्=एतत् किम् ? इति=एवम्, पृच्छति=पृच्छापरे, शिववीरे=राजनि शिवे, गौरसिंहः=गौरवटुः, व्याजहार= उवाच –

**समासविग्रहाः –** उष्णीषस्य सन्धिः उष्णीषसन्धिः, (ष.त.) तस्मिन्। कन्यायाः अपहारकः (ष.त.) स चासौ यवनयुवकः (कर्म.), तस्य वस्त्रम्, तस्य अन्तः, तस्मात् प्राप्तम्, कन्यापहारकयवनयुवकवस्त्रान्तः प्राप्तम्। तस्य प्राप्तिः, तस्याः चरितम्, तस्य शुश्रूषा, तत्प्राप्तिचरितशुश्रूषा (ष.त.), ताम्।

**व्याकरणम् –** अवगतः–अव+गम्+क्त+सु। दर्शयामि–दृश्+णिच्+मिप्। व्याहृत्य–वि+आ+हृ+क्त्वाझल्यप्। जिज्ञासमानाः–ज्ञा+सन्+शानच्+जस्। वितस्थिरे=वि+स्था+लिट्+झ 'समवप्रविभ्यःस्थ' इत्यात्मनेपदम्। प्रसार्यताम्– प्र+सृ+यक्+लोट्+तिप्। व्याजहार–वि+आङ्. +हृ+लिट्+तिप्झणल्।

**विशेषः –** अत्र संवादयोजना द्रष्टव्या अस्ति।

**सरलार्थः–** (शिववीर अपृच्छत्) अपजलखानविषये किमपि नूतनं वृत्तजातं ज्ञातं न वा ? ''ततो गौरसिंहोऽवदत्" न केवलं तद्वृत्तं ज्ञातमपितु तस्माद् अधिगतं पत्रमपि अवलोकयतु श्रीमान्'' इति उक्त्वा शिरोवेष्टने निहितं कन्यापहर्तुः यवनयुवकस्य मृतशरीरवसनाभ्यन्तरात् प्राप्तं पत्रं निःसृतवान्। सर्वे पत्रे विजयपुराधीशमुद्रां दृष्ट्वा ''किम् एतत् ? कुत एतत् ? कथमेतत् ?'' चेति ज्ञातुम् इच्छन्तः उत्कण्ठिताः बभूवुः। गौरसिंहः तु शिववीरस्य जिज्ञासाम् अवगत्य संक्षेपेण सर्वं वृत्तमवदत्। ततः ''दर्शयतु, प्रसारयतु, पठतु कथयतु, इदं किमस्ति?'' इति शिववीरे पृच्छति सति गौरसिंहः पुनः उवाच –

**मूलम् – भगवन् ! सर्पाकारैरक्षरैः पारस्य–भाषायां लिखितं पत्त्रमेतदस्ति। एतस्य सारांशोऽयमस्ति–विजयपुराधीशः स्वप्रेषितमपजलखानं सेनापतिं सम्बोध्य लिखति यत् –''वीरवर !**

**महाराष्ट्र–राजेन सह योद्धुं प्रस्थितोऽसीति मास्म भूत्कश्चनान्तरायस्तव विजये। शिवं युद्धे जेष्यसि चेत्, पदभ्यां सिंहं जितवानसीति मंस्ये, किन्तु सिंहहननापेक्षया जीवतः सिंहस्य वशीकार एवाधिकं प्रशस्यः। तद् यदि छलेन जीवन्तं शिवमानयेःतद् वीरपुङ्गवोपाधि–दानसहकारेण तव महतीं पदवृद्धिं कुर्य्याम्। गोपीनाथपण्डितोऽपि मया तव निकटे प्रस्थापितोऽस्ति, स मम तात्पर्यं विशदीकृत्य तव निकटे कथयिष्यति। प्रयोजनवशेन शिवमपि साक्षात्करिष्यति'' इति।**

**प्रसंगः** – अत्र गौरसिंहः यवनहस्तादधिगतं पत्रं शिववीरं श्रावयति –

**व्याख्या** – भगवन् ! श्रीमन्, सर्पाकारैः=वक्राकारैः, अक्षरैः=वर्णैः, पारस्यभांषायां= पारसदेशीयवाण्याम्, लिखितम्=रचितम्, एतत्=इदम्, पत्रमस्ति= पत्रं विद्यते। एतस्य=अस्य पत्रस्य, सारांशः=भावः, अयम्अस्ति,"विजयपुराधीशः =विजयपुरनरेशः, स्वप्रेषितम्=आत्मना प्रहितम्, अपजलखानं सेनापतिम्= तन्नामचमूपतिम्, सम्बोध्य=निर्दिश्य, लिखति=कथयति, यत्," वीरवर=शूरवीर! महाराष्ट्रराजेन=शिववीरेण, सह=साकम्, योद्धुम्=युद्धाय, प्रस्थितःअसि=गतोऽसि, इति, तव=भवतः, विजये=जये, कश्चन=कोऽपि, अन्तरायः=विघ्नः, मा स्म भूत्=न भवेत् ? चेद्=यदि, युद्धे=आजौ, शिवं=शिवराजम्, जेष्यसि=विजयिष्यसे, (तदा) पद्भ्याम्=पदात्या, सिंहम्=मृगेन्द्रम्, जितवान्=अजयत्, इति मंस्ये=ज्ञास्यामि, किन्तु=परन्तु, सिंहहननापेक्षया= केसरिवधापेक्षया, जीवतः=श्वसतः, सिंहस्य= केसरिणः, वशीकारः= वशीकरणम्, एव=निश्चयेन, अधिकं, प्रशस्यः=प्रशंसनीयः भवति। तत्=तस्मात्, यदि=चेत्, छलेन=वञ्चनया, जीवन्तम्=श्वसन्तम्, शिवम्=शिवराजम्, आनयेः=आहरेः, तद्=तदा, वीरपुङ्गवोपाधिदानसहकारेण= 'वीरपुङ्गव' इत्याख्योपाधिना सह, तव=भवतः, महतीम्=प्रशस्याम्, पदवृद्धिम्= पदोन्नतिम्, कुर्य्याम्=विदध्याम्। गोपीनाथपण्डितः अपि=एतदाख्यपण्डितोऽपि, मया=मम द्वारा, तव=भवतः, निकटे=सविधे, प्रस्थापितः अस्ति=प्रेषितोऽस्ति; सः=गोपीनाथः, मम=विजयपुराधीशस्य, तात्पर्यम्=मनोभावम्, विशदीकृत्य=विस्तरेण, तव=भवतः, निकटे=समीपे, कथयिष्यति=वक्ष्यति। प्रयोजनवशेन=कार्यवशेन, शिवमपि=शिववीरमपि, साक्षात्करिष्यति=मिलिष्यति'' इति।

**समासविग्रहाः** – विजयपुरस्य अधीशः विजयपुराधीशः (ष.त.)। महाराष्ट्राणां राजा महाराष्ट्रराजः (ष.त.), तेन। वीरपुङ्गवस्य उपाधिः, तस्य दानम् तस्य सहकारः (ष.त.) तेन।

**व्याकरणम्** – मा स्म् भूत–भू+लुङ्+तिप् 'माङ् योगे न अडाटौ, जेष्यसि–जि+लृट्+ सिप्। जीवतः–जीव्+शतृ+ङस्।

**विशेषः** – 'त्वया शिववीरस्य वशीकारः पद्भ्यां सिंहस्य, वशीकारो वर्तते,' इति योजनया अत्र निदर्शनालंकारः ।

**सरलार्थः** – (गौरसिंहः पुनरुवाच) श्रीमन् ! पारसीभाषायां लिखितमिदं पत्रमस्ति। तस्यायं भावः अस्ति विजयपुराधीशः आत्मना प्रेषितं सेनापतिम् अपजलखानं सम्बोध्य कथयति यत्– –हे वीरवर ! शिववीरेण सह युद्धाय प्रस्थानं कृतवान् असि, तव उद्योगे कश्चन विघ्नः न भवेत्। युद्धे यदि शिववीरं जेष्यसि तदा सिंहं जितवान् इति मंस्ये, किन्तु यथा सिंहमारणापेक्षया जीवितसिंहस्य वशीकरणं प्रशंसनीयं भवति तथा जीवन्तं शिववीरं वशीकरिष्यति तदा वरम्। तस्मात् यदि वञ्चनया जीवन्तं शिववीरम् आनेष्यति तदा 'वीरपुङ्गव' इत्युपाधिना सह तव महतीं पदोन्नतिं करिष्यामि। मया गोपीनाथपण्डितोऽपि तव सविधे प्रेषितोऽस्ति, स मदीयं भावं विस्तरेण कथयिष्यति; प्रयोजनवशेन शिवमपि द्रक्ष्यति'' इति।

**मूलम् – इत्याकर्णयत एव शिववीरस्य अरुणकौशेय–जाल–निबद्धौ मीनाविव नयने संजाते, मुखं च बाल–भास्कर–बिम्ब–विडम्बनामाललम्बे, अधरं च धीरताधुरामधरीकृतवान्। अथ स दक्षिण–कर–पल्लवेन श्मश्रुपरामृशन्नाकाशे दृष्टिं बद्ध्वा अरे रे विजयपुर–कलङ्क ! स्वयमेव जीवन् शिवः तव राजधानीमाक्रम्य, वीरपुङ्गवोपाधिसहकारेण तव महतीं पदवृद्धिमङ्गीकरिष्यति, तत्किं प्रेषयसि मृत्योः क्रीडनकानेतान् कदर्य्य–**

**हतकान् ?" –इति साम्रेडमवोचत्। अपृच्छच्च "ज्ञायते वा कश्चिद् वृत्तान्तो गोपीनाथपण्डितस्य?"**

**प्रसंगः –** गौरसिंहमुखात् विजयपुराधीशस्य पत्रस्य भावं विज्ञाय शिववीरः साक्षेपं भाषते–

**व्याख्या –** इति=एवम्, आकर्णयत=श्रृण्वतः, एव, शिववीरस्य=शिवराजस्य, अरुणकौशेयजाल–निबद्धौ=रक्तकौशेयतन्तुसमूहबद्धौ, मीनौ=मत्स्यौ, इव=यथा, नयने=नेत्रे, सञ्जाते=अभूताम्, च, मुखम्=आननम् बालभास्कर– बिम्बविडम्बनाम्=नवोदितसूर्यमण्डलानुकृतिम्, आललम्बे= दधौ, अधरम्=ओष्ठम्, च, धीरताधुराम्=धैर्यधुराम्, अधरीकृतवान्= अधश्चकार।

अथ=अनन्तरम्, स=शिववीरः, दक्षिणकरपल्लवेन= वामेतरकरकिसलयेन, श्मश्रु=कूर्चम्, परामृशन्=स्पृशन्, आकाशे=नभसि, दृष्टिम्=दर्शनम्, बद्ध्वा=संयोज्य, ''अरे रे=हीनसम्बोधनद्वयम्, विजयपुरकलङ्क! =विजयपुरलाञ्छन! स्वयमेव=आत्मना एव, जीवन्=श्वसन्। शिवः=शिववीरः, तव=भवतः, राजधानीम्=प्रधाननगरीम्, आक्रम्य=आक्रमणं कृत्वा, वीरपुङ्गवोपाधिसहकारेण= 'वीरपुङ्गव'इत्याख्योपाधिना सार्द्धम्, तव=भवतः, महतीम्=अत्यधिकाम्, पदवृद्धिम=पदोन्नतिम्, अङ्गीकरिष्यति= स्वीकरिष्यति, तत्=तस्मात्, मृत्योः=कालस्य, एतान्=इमान्, क्रीडनकान्= कन्दुकतुल्यान्, कदर्य्यहतकान्=कायरान् म्लेच्छान्, किम्=कथम्, प्रेषयसि= प्रहिणोसि? इति=एवम्, साम्रेडम्=वारं वारम्, अवोचत्=अवदत्, अपृच्छत्=अप्राक्षीत्, च ''गोपीनाथपण्डितस्य=एतदाख्यस्य पुरोहितस्य, कश्चिद् वृत्तान्तः=काऽपि वार्ता, ज्ञायते=अवगम्यते वा= अथवा ?''इति।

**समासविग्रहाः –** बालश्चासौ भास्करः, तस्य बिम्बः, तस्य विडम्बना (ष.त.), ताम्। वीरपुङ्गवस्य उपाधिः, तस्य सहकारः तेन। न अधरम् अनधरम्, अनधरम् अधरम् कृतवान् इति अधरीकृतवान् (गतितत्पु.)।

**व्याकरणम् –** अधरीकृतवान्–अधर+च्वि+कृ+क्तवतु+सु। दृष्टिम्=दृश्+क्तिन्+अम्। आक्रम्य–आङ्. +क्रम्+क्त्वा >ल्यप्।

**विशेषः –** 'मीनाविव नयने'' "बालभास्करबिम्बविडम्बनाम्" च इत्यत्रोपमालंकारः। अत्र क्रोधाख्यो भावोऽभिव्यज्यते। 'दक्षिणकरपल्लवेन' इत्यत्र रूपकम्।

**सरलार्थः –** पूर्वोक्तक्रमेण पत्रमाकर्णयतः शिवस्य रक्तकौशेयजालबद्धौ मीनौ इव नयने रक्तवर्णे अभूताम्, बालसूर्यबिम्बमिव अरुणाभं मुखं सञ्जातम्, अधरम् च अधीरम् अभूत्।

अथ सः (शिववीरः) दक्षिणकरपल्लवेन श्मश्रु स्पृशन् आकाशे दृष्टिं संयोज्य– ' अरे रे विजयपुरलाञ्छन ! जीवन् एव स्वयं शिवः तव राजधानीम् आक्रम्य, वीर पुङ्गवोपाधिना सह तव दुष्टस्य महतीं पदोन्नतिं स्वीकरिष्यति। तत् किमर्थम् मृत्योः एतान् क्रीडनकतुल्यान् तुच्छयवनान् प्रेषयसि ?'' इति वारं वारम् अवदत्, अपृच्छत् च यद्'' गोपीनाथपण्डितस्य कोऽपि वृत्तान्तः अस्ति किम्'' ?

**मूलम् – यावद् गोरसिंहः किमपि विवक्षति तावत्प्रतीहारः प्रविश्य 'विजयतां महाराजः' इति त्रिर्व्याहृत्य, करौ संपुटीकृत्य, शिरो नमयित्वा कथितवान् "भगवन्! दुर्गद्वारि कश्चन गोपीनाथनामा पण्डितः श्रीमन्तं दिदृक्षुरुपतिष्ठते। नायं समयः प्रभूणां दर्शनस्य, पुनरागम्यताम्'' इति बहुशः कथ्यमानोऽपि ''किञ्चनात्यावश्यक– कार्यम्'' इति प्रतिजानाति।** तदत्र प्रभुचरणा एव प्रमाणम्–इति।

**प्रसंगः –** अत्र प्रतीहारः गोपीनाथपण्डितागमनं सूचयति।

**व्याख्या –** यावद्=यदैव, गौरसिहः=गौरवटुः, किमपि=किञ्चिदपि, विवक्षति= वक्तुमिच्छति, तावत्=तदैव, प्रतीहारः=द्वारपालः, प्रविश्य=आगत्य, ''महाराजः=शिवराजः, विजयताम्=जयतु'' इति=एवम्, त्रिः=त्रिवारम्, व्याहृत्य=उक्त्वा, करौ=हस्तौ, संपृटीकृत्य=संयोज्य, शिरः=मस्तकम्, नमयित्वा=अवनमय्य, कथितवान्=अकथयत्, ''भगवन् ! श्रीमन् ! दुर्गद्वारि= कोट्टद्वारे, कश्चन=कोऽपि, गोपीनाथनामा=एतदाख्यः,

पण्डितः=विद्वान्, श्रीमन्तम्=अत्रभवन्तम्, दिदृक्षुः=द्रष्टुमिच्छुः उपतिष्ठते=उपस्थितोऽस्ति। अयम्=एषः,समयः=कालः, प्रभूणाम्=शिववीरमहोदयानाम् दर्शनस्य= साक्षात्कारस्य, न=नास्ति, पुनः=भूयः, आगम्यताम्=आगन्तव्यम्, इति=एवम्, बहुशः=पुनः पुनः, कथ्यमानः अपि=उच्यमानोऽपि, ''किञ्चन=किमपि, अत्यावश्यककार्यम्= अनुपेक्षणीयं कार्यम्, अस्ति'' इति=एवम्, प्रतिजानाति=निवेदयति। तदत्र= तदस्मिन् विषये, प्रभुचरणाः=स्वामिपादाः, एव=हि, प्रमाणम्=प्रमाणभूताः, सन्तीति शेषः।

**व्याकरणम् –** विवक्षति वच्+सन्+लट्+तिप्। व्याहृत्य–वि+आङ्+हृ+क्त्वा झल्यप्। दिदृक्षुः– दृश्+सन्+उ+सु। उपतिष्ठते–उप+स्था+लट्+त। प्रमाणम्–प्र+मा+ल्युट् (अन) सु।

**विशेषः –** सप्रसादा वैदर्भीरीतिरत्र विद्यते।

**सरलार्थः –** शिववीरेण गोपीनाथपण्डितविषयकः प्रश्नः कृत आसीत्। तन्निशम्य यावद् गौरसिंहः किमपि वक्तुमभिलषति तदैव द्वारपालः प्रविश्य ''विजयतां महाराजः'' इत्युक्त्वा सविनयं निवेदयति–''भगवन् ! द्वारे कोऽपि गोपीनाथनामा पण्डितः भवद्दर्शनाय प्रतीक्षते, अयं समयः प्रभूणां दर्शनस्य नास्ति पुन आगच्छतु'' इति मुहुःनिवेद्यमानोऽपि (असौ) ''किमपि अत्यावश्यकं कार्यमस्ति'' इति प्रतिजानाति, तदत्र भवन्त एव प्रमाणम्' इति।

**मूलम् – तदवगत्य ''सोऽयं गोपीनाथः, सोऽयं गोपीनाथः'' इति साम्रेडं सतर्कं सोत्साहञ्च व्याहृतवत्सु निखिलेषु, शिववीरेण निजबाल्यप्रियो माल्यश्रीकनामा संबोध्य कथितो यद् ''गम्यतां दुर्गान्तर एव महावीरमन्दिरे तस्मै वासस्थानं दीयताम्, भोज्य–पर्यङ्कादि–सुखद–सामग्रीजातेन सत्क्रियताम्, ततोऽहमपि साक्षात्करिष्यामि'' –इति।'**

**प्रसङ्गः –** अस्मिन् गद्ये शिववीरो माल्यश्रीकं गोपीनाथपण्डितस्य विश्रामव्यवस्थायै निर्दिशति–

**व्याख्या –** तदवगत्य=तद् विज्ञाय, ''अयम्=एषः, स=पूर्वोक्तः (एव), गोपीनाथः= तन्नामकः पण्डितः'', इति=एवम्, साम्रेडम्=वारम्वारम्, सतर्कम्=सहेतुकम् सोत्साहञ्च=उत्साहपूर्वकञ्च, व्याहृतवत्सु=उक्तवत्सु, निखिलेषु=सर्वेषु, शिववीरेण, निजबाल्यप्रियः=स्वबाल्यसखः, माल्यश्रीकनामा= तन्नामकः, सम्बोध्य=अभिमुखीकृत्य, कथितः=आदिष्टः, यत् ''गम्यताम्=गच्छतु, दुर्गान्तर एव=कोट्टाभ्यन्तर एव, महावीरमन्दिरे=मारुतिमन्दिरे, तस्मै=गोपीनाथाय, वासस्थानम्=निवासः, दीयताम्=यच्छतु, भोज्यपर्यङ्कादि–सुखद–सामग्री– जातेन=भक्ष्यशय्यादिसुखदद्रव्यजातेन, च, सत्क्रियताम्=सत्करोतु, ततोऽहमपि=तावदहमपि, साक्षात्करिष्यामि= द्रक्ष्यामि'' इति।

**समास–विग्रहाः –** दुर्गस्य अन्तरे, दुर्गान्तरे (ष.त.)। वासाय स्थानम्, वासस्थानम् (च.त.)। भोज्यञ्च पर्यङ्कञ्च, भोज्यपयश्ङ्कें, (द्वन्द्वः), ते आदौ यस्य तत् भोज्यपर्यङ्कादिः, तच्च सुखसामग्री जातम् तेन (कर्म.)।

**व्याकरणम् –** व्याहृतवत्सु–वि+आङ्+हृ+क्तवतु+सुप्। सम्बोध्य–सम्+ बुध्+क्त्वा झल्यप्।

**सरलार्थः –** द्वारपालवचनं निशम्य ''अयं स एव गोपीनाथ'' इतिनिखिलेषु जनेषु सतर्कं सोत्साहञ्च वारम्वारम् उक्तवत्सु शिववीरः स्वबाल्यसखं माल्यश्रीकम् उक्तवान्ँयद् भवान् गच्छतु, दुर्गाभ्यन्तरे एव हनुमत्मन्दिरे तस्मै वासं ददातु, भोज्यादिसकलसामग्रीजातेन च सत्करोतु, ततः अहमपि द्रक्ष्यामि।

**मूलम् – ततो बाढमित्युक्त्वा प्रयाते माल्यश्रीके; "महाराज! आज्ञा चेदहमद्यैव अपजलखानं कथमपि साक्षात्कृत्य, तस्याऽखिलं व्यवसितं विज्ञाय प्रभुचरणेषु विनिवेदयामि; नाधुना मम क्षान्तिः शान्तिश्च, यतः संन्यासिवेषोऽहं समागच्छन् द्वयोर्यवनभटयोवार्तयाऽवागमम्, यत श्व एवैते युयुत्सन्ते" इति गौरसिंहो मन्दं कर्णान्तिकं व्याहार्षीत्।**

**ततो "वीर! कुशलोऽसि, सर्वं करिष्यसि, जाने तव चातुरीम्, तद् यथेच्छं गच्छ, नाहं व्याहन्मि तवोत्साहम्, नीतिमार्गान् वेत्सि, किन्तु परिपन्थिन एते अत्यन्तनिर्दयाः, अतिकदर्य्याः, अतिकूटनीतयश्च**

**सन्ति। एतैः सह परम– सावधानतया व्यवहरणीयम्" – इति कथयित्वा शिववीरस्तं विससर्ज।**

**प्रसङ्गः** – अत्र 'अहमपजलखानवृत्तं ज्ञात्वा आगच्छामि' इति उक्तवति गौरसिंहे शिववीरः तं समुचितं निर्दिशति –

**व्याख्या** – ततः=शिववीरनिर्देशानन्तरम्, ''बाढम्'=सुष्ठु, इति=एवम्, उक्त्वा=प्रोच्य, माल्यश्रीके=एतन्नामके जने, प्रयाते=प्रस्थिते, गौरसिंहः=तन्नामको जनः, ''महाराज !=राजन् ! चेद्=यदि, (भवताम्) आज्ञा=आदेशः (भवेत्) अहम्=गौरसिंहः, अद्य एव=अस्मिन् दिने एव, कथमपि=केनापि विधिना, अपजलखानम्=एतदाख्यं यवनसेनापतिम्, साक्षात्कृत्य=साक्षात् कृत्वा, तस्य=अपजलखानस्य, अखिलम्=सर्वम्, व्यवसितम्=चेष्टितम् विज्ञाय=ज्ञात्वा, प्रभुचरणेषु=श्रीमत्सु, विनिवेदयामि=सूचयामि अधुना= इदानीम्, मम=गौरसिंहस्य, क्षान्तिः= सहनशीलता, शान्तिः=शमः, च, न=नास्ति, यतः=यस्मात् संन्यासिवेषः= साधुवेषधारी, अहम्=गौरसिंहः, समागच्छन्=आगच्छन्''द्वयोः यवनभटयोः=द्वयोःम्लेच्छशूरयोः, वार्तया=संवादेन, अवागमम्=अवागच्छम्, यत्, श्वः=आगामिनि दिने, एव=हि, एते=यवनाः, युयुत्सन्ते=योद्धुम् इच्छन्ति'' इति=एवम् मन्दम्=शनैः, कर्णान्तिकम्=श्रवणसमीपम्, व्याहार्षीत्=अकथयत्।

ततः=तदनन्तरम्, शिववीरः=शिवराजः, ''वीर !=सुभट !, (त्वम्) कुशलः असि निपुणोऽसि, सर्वं निखिलं, करिष्यसि= विधास्यसि, तव भवतः, चातुरीम्=दक्षताम्, जाने=जानामि, तत्=तस्मात् यथेच्छम्=इच्छानुसारम्, गच्छ=याहि, अहम्=शिवः, तव=भवतः, उत्साहम्=साहसम्, न=नैव, व्याहन्मि=नाशयामि, नीतिमार्गान्=नयतत्त्वानि, वेत्सि=जानासि, किन्तु=परन्तु, परिपन्थिनः=शत्रवः, एते=यवनाः, अत्यन्त निर्दयाः=क्रूरतराः, अतिकदर्य्याः=अतिकातराः, अतिकूटनीतयः=अतिवञ्चनाचतुराः, च, सन्ति। एतैः=यवनैः, सह=साकम्, परमसावधानतया=अत्यवधानेन, व्यवहरणीयम्= समाचरणीयम्'' इति=एवम् कथयित्वा=उक्त्वा, तम्=गौरसिंहम्, विससर्ज=प्रेषयामास।

**समासविग्रहाः** – साक्षात् कृत्वा साक्षात्कृत्य (गति तत्पु.)। इच्छामनतिक्रम्य यथेच्छम् (अव्ययीभावः)। कर्णयोः अन्तिकम् कर्णान्तिकम् (ष.त.)।

**व्याकरणम्**– प्रयाते–प्र+या+क्त+ङि.। व्यवसितम्=वि+अव+षिञ्+ क्त+सु। विनिवेदयामि=वि+नि+विद्+णिच्+लट्+मिप्। युयुत्सन्ते–युध्+ सन्+लट्+झ। व्याहार्षीत्=वि+आङ्.हृ+लुङ्.+तिप्। व्याहन्मि–वि+आङ्.हन्+लट्+मिप्। विससर्ज–वि+सृज्+लिट्+तिप् (णल्)।

**विशेषः**– अत्र पूर्वार्द्धे गौरसिंहस्य उत्साहोऽभिव्यज्यते उत्तरार्द्धे च यवनानां क्रौर्यम्।

**सरलार्थः** – ततः 'सुष्ठु' इति उक्त्वा गतवति माल्यश्रीके गौरसिंहः शिवराजस्य कर्णे मन्दमवादीत्''महाराज ! यदि भवताम् आज्ञा भवेत् तदा अद्यैव अहम् येन केनापि प्रकारेण अपजलखानमुपेत्य तस्य सर्वां योजनां विज्ञाय भवते निवेदयामि, (यतः) अधुना मम मनसि सहिष्णुता शान्तिश्च न स्तः। यतः संन्यासिवेषः अहं समागच्छन् ''द्वयोः यवनसैनिकयोः वार्तया अवागच्छम् यद् एते श्वः युद्धाय इच्छन्ति'' इति। तदाकर्ण्य शिववीरः–''वीरवर ! त्वं कुशलोऽसि, सर्वं करिष्यसि, तव चातुर्यं जानामि, यथेच्छम् गच्छ, तव उत्साहभङ्गं, नैव करिष्यामि, नीतिमार्गान् जानासि, किन्तु एते शत्रवः अत्यन्तं निर्दयाः, नीचाः, कूटनीतिज्ञाश्च सन्ति। अतः एभिः सह परं सावधानतया व्यवहारो विधेयः'' इति उक्त्वा तं प्रेषयामास।

**मूलम् – गौरसिंहस्तु त्रिःप्रणम्य, उत्थाय, निवृत्य, निर्गत्य, अवतीर्य, सपदि तस्या एव निम्ब–तरु–वेदिकायाः समीपे आगत्य, स्वसहचरं कुमार– मिङ्गितेनाऽऽहूय कस्मिंश्चित् स्वसंकेतित–भवने प्रविश्य, आत्मनः कुमारस्यापि च केशान् प्रसाधनिकया प्रसाध्य, मुखमार्द्रपटेन प्रोञ्छ्य, ललाटे सिन्दूर–बिन्दु–तिलकं विरचय्य, उष्णीषमपहाय, शिरसि सूचिस्यूतां सौवर्ण–कुसुम–लतादि–चित्र–विचित्रतामुष्णीषिकां संधार्य, शरीरे हरितकौशेय– कञ्चुकिकामायोज्य, पादयोः शोण–पट्ट–निर्मित मधोवसनमाकलय्य, दिल्लीनिर्मिते महार्हे उपानहौ धारयित्वा; लघीयसीं तानपूरिकामेकां सह नेतुं सहचर–हस्ते**

**समर्प्य, गुप्तच्छुरिकां दन्तावलदन्त– मुष्टिकां यष्टिकां मुष्टौ गृहीत्वा, पटवासैर्दिगन्तं दन्तुरयन्, करस्थपटखण्डेन मुहुर्मुहुराननं प्रोञ्छन् गायकवेषेण अपजलखानशिविराभिमुखं प्रतस्थे।**

**प्रसङ्गः** – अत्र शिववीरानुमत्या गौरसिंहः सज्जीभूय अनुचरेण सह अपजलखान– शिविराभिमुखं प्रस्थानं करोति –

**व्याख्या** – गौरसिंहस्तु, त्रिःप्रणम्य=वारत्रयं नमस्कृत्य, उत्थाय= उत्थानं कृत्वा, निवृत्य=परावृत्य निर्गत्य=निर्गम्य, अवतीर्य=अवतरणं कृत्वा, सपदि=सत्वरम्, तस्या एव=पूर्वोक्ताया एव, निम्बतरुतलवेदिकायाः=अरिष्टवृक्षतलचत्वरस्य, समीपे आगत्य=निकटे आगम्य, स्वसहचरम्= निजसहगामिनम्, इङ्गितेन= संकेतेन, आहूय= आकारयित्वा, कस्मिंश्चित्, स्वसंकेतितभवने=निजेङ्गितमन्दिरे, प्रविश्य= प्रवेशं कृत्वा, आत्मनः= स्वस्य, कुमारस्य=बालकस्य, च, केशान्= कचान्, प्रसाधनिकया= प्रसाधन्या, प्रसाध य=संस्कृत्य, मुखम्=आननम्, आर्द्रपटेन= क्लिन्नवस्त्रेण, प्रोञ्छ्य=प्राकञ्छनं कृत्वा, ललाटे=भाले, सिन्दूरबिन्दुतिलकम् =सिन्दूरपृषत्तिलकम्, विरचय्य= विधाय, उष्णीषम्=शिरोवेष्टनम्, अपहाय= विहाय, शिरसि= मूर्ध्नि, सूचिस्यूताम्= सूचिकाप्रोताम्, सौवर्ण–कुसुमलतादि–चित्र–विचित्रताम्= कनकपुष्पलता–दिचित्रसंयुताम्, उष्णीषिकाम्= क्षुद्रोष्णीषम्, संधार्य=धारयित्वा, शरीरे=देहे, हरितकौशेयकञ्चुकिकाम्= हरिद्वर्णक्षौमवस्त्रचोलकम्, आयोज्य=परिधाय, पादयोः=चरणयोः, शोणपट्टनिर्मितम्=रक्तवसनरचितम्, अधोवसनम्= अधोवस्त्रम्, आकलय्य= धृत्वा, दिल्लीनिर्मिते= दिल्ली–प्रदेशघटिते, महार्हे=बहुमूल्ये, उपानहौ= चरणपादुके, धारयित्वा=धृत्वा, लघीयसीम्=लघुतराम्, एकाम, तानपूरिकाम्= वाद्यविशेषम्, सह=साकम्, नेतुम्=गृहीतुम्, सहचरहस्ते=सहयात्रिकरे, समर्प्य=दत्वा, गुप्तच्छुरिकाम्= अन्तर्हितकृपाणिकाम्, दन्तावलदन्तमुष्टिकाम्=हस्तिदन्तमुष्टिकाम्, यष्टिकाम्= क्षुद्रयष्टिम्, मुष्टौ=मुचुट्याम्, गृहीत्वा= आदाय, पटवासैः= वस्त्रवासकैः दिगन्तम्=दिशान्तरालम्, दन्तुरयन्=सुगन्धितं कुर्वन्, करस्थपटखण्डेन= हस्तस्थवस्त्रप्रान्तेन, मुहुः मुहुः=पुनःपुनः, प्रोञ्छन्= मार्जयन्, गायकवेषेण=गायकवेषं धृत्वा अपजलखान शिविराभिमुखम्= अपजलखानवासस्थानं प्रति, प्रतस्थे=चचाल।

**समास–विग्रहाः** – निम्बस्य तरोः, निम्बतरुः, तस्य तलम् निम्बतरुतलम् (ष.त.), तस्मिन् वेदिका (स.त.) तस्याः। सिन्दूरस्य बिन्दुः, सिन्दूरबिन्दुः (ष.त.) सिन्दूरबिन्दुरेव तिलकम्, सिन्दूरबिन्दुतिलकम् (कर्म.)। सौवर्णाश्च ते कुसुमलतादयः, सौवर्णकुसुमलतादयः (कर्म.), तेषां चित्रम् (ष.त.) तेन विचित्रिता, ताम्। हरितञ्च तत् कौशेयम्, (कर्म.) हरितकौशेयम् तस्य कञ्चुकिका (ष.त.), ताम्। दन्तावलस्य दन्तः, दन्तावलदन्तः, (ष.त.), दन्तावलदन्तस्य मुष्टिका यस्यां सा, ताम् (बहु.)।

**व्याकरणम्** – प्रसाध्य - प्र+साधि+क्त्वा >ल्यप्। प्रोञ्छ्य - प्र+उछि+क्त्वा >ल्यप्। सन्धार्य - सम्+धृञ्+क्त्वा > ल्यप्। आयोज्य - आङ्+युज्+ क्त्वा > ल्यप्। आकलय्य - आङ्+कल+क्त्वा > ल्यप्।

**विशेषः** – अस्मिन् गद्यांशे गौरसिंहस्य वेषपरिवर्तन–गायनकलाविशेषैः तस्य गुप्तचर कौशलं सूच्यते। गद्येऽस्मिन् क्त्वा (ल्यप्) प्रत्ययस्य प्रयोगाःद्रष्टव्याः सन्ति। सप्रसादा वैदर्भी रीतिः।

**सरलार्थः** – गौरसिंहः त्रिवारं प्रणम्य उत्थाय परावृत्य निर्गत्य अवतीर्य शीघ्रमेव तस्य एव निम्बतरुतलचत्वरस्य समीपे आगत्य, संकेतेन स्वसहचरम् आहूय एकस्मिन् स्वसंकेतितभवने प्रविश्य स्वस्य कुमारस्य च केशान् प्रसाध्य, आर्द्रवस्त्रेण मुखं प्रोञ्छ्य ललाटे सिन्दूरतिलकं संयोज्य उष्णीषं विहाय शिरसि सुवर्णसूत्रचित्रिताम् उष्णीषिकां (टोपिकाम्) धारयित्वा हरितकौशेयनिर्मितं चोलकं परिधाय, पादयोः रक्तकौशेयवस्त्रनिर्मितम् अधोवसनं परिधाय, दिल्लीनिर्मिते बहुमूल्ये उपानहौ धृत्वा, सहचरहस्ते एकां लघीयसीं तानपूरिकां दत्वा गुप्तकृपाणिकां हस्तिदन्तनिर्मितमुष्टिकां यष्टिकां मुष्टौ गृहीत्वा सुगन्धितद्रव्य गन्धैः दिगन्तं वासयन्, करस्थवस्त्रप्रान्तेन वारं वारं मुखं प्रोञ्छन् गायकवेषेण अपजलखानशिविरं प्रति चलाल।

**मूलम् – अथ तौ त्वरितं गच्छन्तौ, सपद्येव परश्शत–श्वेतपट–कुटीरैः शारदमेघ– मण्डलायितं दीपमाला–विहित–बहुल–चाकचक्यम् अपजलखान–शिविरं दूरत एव पश्यन्तौ याावत्समीपमागच्छतस्तावत् कश्चन कोकनदच्छवि– वस्त्र–खण्ड–वेष्टित–मूर्द्धा, कटिपर्यन्तसुनद्ध– काकश्यामाङ्गरक्षिकः, कर्बुराधोवसनः, शोण–श्मश्रुः, विजयपुराधीश–नामाङ्कित– वर्तुल–पित्तल– पट्टिका–परिकलित–वाम– वक्षस्थलः स्कन्धे भुशुण्डीं निधाय, इतस्ततो गतागतं कुर्वन् सावष्टम्भमुर्दूभाषया उवाच– 'कोऽयं कोऽयम् ? इति; ततो गौरसिंहेनापि 'गायकोऽहं श्रीमन्तं दिदृक्षे' इति समार्दवं व्याख्यायि। ततो 'गम्यतामन्येऽपि गायका वादकाश्च सम्प्रत्येव गताः सन्ति' इति कथयति प्रहरिणि, घृतेन स्नातु भवद्रसना; इति व्याहरन् शिविर–मण्डलं प्रविवेश।**

**प्रसङ्गः** – अत्र सानुचरः गायकवेषः गौरसिंहः अपजलखानस्य शिविरं प्रतिगच्छति द्वारपालानुज्ञया प्रविशति च।

**व्याख्या** – अथ=अनन्तरम्, त्वरितम्=सत्वरम्, गच्छन्तौ=व्रजन्तौ, तौ= पूर्वोक्तौ, सपद्येव=शीघ्रमेव, परश्शतश्वेतपटकुटीरैः=शताधिकधवलवस्त्रवासभवनैः, शारदमेघमण्डलायितम्=शरत्कालीन पयोदमण्डलवत्प्रतीयमानम्, दीपमाला– विहितबहुल–चाकचक्यम्=प्रदीपपंक्तिकृताधिकचाकचक्यम्, अपजलखान– शिविरम्=अपजलखानोपकार्याम्, दूरत एव=आरादेव, पश्यन्तौ= विलोकयन्तौ, यावत्=यदैव, समीपम्=निकटम्, आगच्छतः=आयातः, तावत्=तदैव, कोकनदच्छविवस्त्रखण्डवेष्टितमूर्द्धा= रक्तकमलकान्ति–वसनाञ्चल–बद्धमस्तकः, कटिपर्यन्तसुनद्धकाक– श्यामाङ्गरक्षिकः=श्रोणिपर्यन्तसुबद्ध– वायसनीलाङ्गरक्षिकः, कर्बुराधोवसनः= चित्रवर्णाधोवस्त्रः, शोणश्मश्रुः=रक्तकूर्चः, विजयपुराधीशनामाङ्कित– वर्तुलपित्तलपट्टिका–परिकलितवाम–वक्षः स्थलः=विजयपुरनरेशाभिधान– चिह्नित–गोलाकारारपट्टिकाशोभितसव्योरःस्थलः, कश्चनः=कोऽपि रक्षी, स्कन्धे=अंसदेशे, भुशुण्डीम्=अस्त्रविशेषम्, निधाय=संस्थाप्य इतस्ततः, गतागतम्= आगतप्रत्यागतम् कुर्वन्=विदधानः, सावष्टम्भम्=साक्षेपम्, उर्दूभाषया= निजवाण्या,उवाच=अवादीत्, कोऽयम् कोऽयम् ?=अयं कः आयाति ? इति=एवम्, ततः=तच्छ्रुत्वा, गौरसिंहेन=गायकवेषधारिणा गौरसिंहेन, अपि, ''अहम् गायकः=अहं गायनकर्मरतः, श्रीमन्तम्= अपजलखानम्, दिदृक्षे= द्रष्टुमिच्छामि' इति, समार्दवम्=सविनयम्, व्याख्यायि=अभाणि। ततः, ''गम्यताम्=गच्छतु, अन्येऽपि=अपरेऽपि, गायकाः=गायनकर्मपराः, वादकाः=वादयितारः,च सम्प्रति एव=इदानीमेव, गताः=याताः सन्ति,'' इति प्रहरिणि=रक्षके, कथयति=वदति (सति) भवद्रसना= भवज्जिह्वा, घृतेन=सर्पिषा, स्नातु=सिक्ता भवेत् ''इति व्याहरन=भाषमाणः, शिविर– मण्डलम्=उपकार्याम्, प्रविवेश=प्राविशत्।

**समासविग्रहाः**– श्वेतपटस्य कुटीरः श्वेतपटकुटीरः (ष.त.) परश्शताश्च ते श्वेतपटकुटीराः परश्शतश्वेतपटकुटीराः (कर्म.) तैः। बहुलञ्च तत् चाकचक्यम् बहुलचाकचक्यम् (कर्म.) दीपमालिकाभिः विहितम् दीपमालिकाविहितम् (तृ.त.) दीपमालिकाविहितं बहुलचाकचक्यं यस्मिन् ततः (बहु.)। कोकनदस्य छविरिव छविः यस्य स कोकनदच्छविः (बहु.), वस्त्रस्य खण्डः वस्त्रखण्डः (ष.त.) कोकनदच्छविः चासौ वस्त्रखण्डः कोकनदच्छविवस्त्रखण्डः (कर्म.) कोकनदच्छविवस्त्रखण्डेन वेष्टितो मूर्घा यस्य सः (बहु.)। काक इव श्यामा काकश्यामा (कर्म.) काकश्यामा चासौअङ्गरक्षिका काकश्यामाङ्गरक्षिका (कर्म), कटिपर्यन्ता सुनद्धा काकश्यामाङ्गरक्षिका यस्य सः (बहु.)।

**व्याकरणम्** – गच्छन्तौ गम्+शतृ+औ। शारदमेघमण्डलायितम्–शरदि भवः, स चासौ मेघः, तेषाम् मण्डलमिव आचरितम्–शरदमेघमण्डल+क्यच्+क्त। पश्यन्तौ–दृश्+ शतृ+औ। निधाय – नि+धा+क्त्वा झल्यप्। व्याख्यायि– वि+आङ्.+ख्या+लुङ्.+(कर्मणि)। दिदृक्षे–दृश्+सन्+लट्+इड्। कथयति–कथ+शतृ+ङि। व्याहरन्–वि+आ+हृ+शतृ+सु। प्रविवेश–प्र+विश्+ लिट्+तिप्।

**विशेषः** – 'शारदमेघमण्डलायितम्' ''कोकनदच्छवि'' ''काकश्यामा'' च इत्यत्र लुप्तोपमालंकारः।

**सरलार्थः –** अनन्तरं तौ (गौरसिंहः तत्सहचरश्च) सत्वरं गच्छन्तौ; शीघ्रमेव शताधिकैः श्वेतवस्त्रकुटीरैः शरत्कालिकमेघमण्डलमिव प्रतीयमानं दीपपंक्त्या बहुलचाकचक्यपूर्णम् अपजलखानशिविरं दूरादेव पश्यन्तौ, यावत् समीपम् आगच्छतः, तावदेव कश्चन रक्षी, यश्च रक्तकमलवद्रक्तवस्त्रखण्डेन वेष्टितमस्तकः कटिपर्यन्तं लम्बमानां नीलवर्णाम् अङ्गरक्षिकां चित्रवर्णमधोवसनं च दधानः रक्तकूर्चः विजयपुराधीशनामाङ्कितगोलपित्तलपट्टिकां वामवक्षःस्थले धारयन् स्कन्धे भुशुण्डीं निधाय इतस्ततो गतागतञ्च कुर्वाण सावरोधमुर्दूभाषया उवाचैंकोऽयमिति। तदा गौरसिंहः अहं गायकोऽस्मि इति नम्रतया न्यवेदीत्। तत गच्छतु, सम्प्रति अन्येऽपि गायकाः वादकाश्च गताः सन्ति इत्यवोचत्, गौरसिंहः च 'भवद्रसना घृतेन स्नातु' इतिकथयन् शिविरमण्डलं प्राविशत्।

**मूलम् – तत्र च क्वचित् खट्वासु पर्यङ्केषु चोपविष्टान् सगडगडाशब्दं ताम्रकधूममाकृष्य, मुखात् कालसर्पानिव श्यामलनिःश्वासानुद्गिरतः, स्वहृदयकालिमानमिव प्रकटयतः, स्वपूर्वपुरुषोपार्जित–पुण्यलोकानिव फूत्कारैरग्निसात् कुर्वतः मरणोत्तरमतिदुर्लभं मुखाग्निसंयोगं जीवन–दशायामेवाऽऽकलयतः, प्राप्ताधिकारकलिताखर्वगर्वान्, क्वचिद् "हरिद्रा हरिद्रा, लशुनं लशुनम्, मरिचं मरिचम्, चुक्रं चुक्रम, वितुन्नकं वितुन्नकम्, शृङ्गवेरं, शृङ्गवेरम्, रामठं रामठम्, मत्स्यण्डी मत्स्यण्डी, मत्स्या मत्स्याः कुक्कुटाण्डं, कुक्कुटाण्डम्, पललं पललम्" इति कलकलैर्बालानां निद्रां विद्रावयतः, समीपसंस्थापित–कुतू– कुतुप–कर्करी–कण्डोल–कट–कटाह–कम्बि–कडम्बान् उग्रगन्धीनि मांसानि शूलाकुर्वतः, नखम्पचाः यवागूः स्थालिकासु प्रसारयतः, हिंगुगन्धीनि तेमनानि तितिण्डीरसैर्मिश्रयतः, परिपिष्टेषु कलम्बेषु जम्बीरनीरं निश्च्योतयतः, मध्ये मध्ये समागच्छतस्ताम्रचूडान् व्यजनताडनैः पराकुर्वतः, त्रपुलिप्तेषु ताम्रभाजनेषु आरनालं परिवेषयतः सूदान्, क्वचिद्वक्र– प्रसाधितकाकपक्षान्, मदव्याघूर्णित–शोणनयनान् सपारस्परिक–कण्ठग्रहं पर्य्यटतः, यौवनचुम्बितशरीरान्, स्वसौन्दर्य–गर्व–भारेणेव मन्दगतीन्, अनवरताक्षिप्त– कुसुमबाणैरिव कुसुमैर्भूषितान्, वसनातिरोहिताङ्गच्छटान्, विविध–पट–वास–वासितानपि चिरास्नानमहा– मलिन–महोत्कटस्वेद–पूतिगन्ध– प्रकटीकृतास्पृश्यतान् यवनयुवकान्।**

**प्रसंगः –** अत्र 'अपजलखानशिविरे गौरसिंहः यद् यद् पश्यति' तदेव कविः वर्णयति–

**व्याख्या –** तत्र=अपजलखानशिविरे, क्वचित्=कुत्रचित्, खट्वासु= शय्यासु, पर्यङ्केषु=मञ्चेषु, च, उपविष्टान्=विराजमानान्, सगडगडाशब्दम्= गडगडेति– ध्वनिसहितम्, ताम्रकधूमम्=तमालधूमम्, आकृष्य=आकर्षणं कृत्वा, मुखात्=आननात्, कालसर्पान्=कृष्णपन्नगान्, इव=यथा, श्यामल–निःश्वासान्=नीलोच्छ्वासान्, उद्गिरतः=प्रकटयतः, इव, स्वहृदयकालि– मानम्=निजहृत्कालुष्यम्, प्रकटयतः=उद्गिरत, इव स्वपूर्वपुरुषोपार्जित् पुण्य लोकान्=निजपूर्वज–सञ्चितपवित्रभुवनानि, फूत्कारैः=मुखात् निःसारितानिलैः अग्निसात्=वह्निसात्, कुर्वतः=विदधतः (ज्वलतः) इव, मरणोत्तरम्= मृत्योरनन्तरम्, अतिदुर्लभम्=अतिदुष्प्राप्यम्, मुखाग्निसंयोगम्= आननानल– संगम्, जीवनदशायाम्=जीवितावस्थायाम्, एव, आकलयतः=प्राप्तवतः, प्राप्ताधिकार– कलिताखर्वगर्वान्= लब्धप्रभुत्वसमेधिताधिकाभिमानान् (यवन–युवकान्), क्वचित्= क्वचित्, "हरिद्रा हरिद्रा= काञ्चनी काञ्चनी, लशुनम्–लशुनम्= महौषधम् महौषधम्, मरिचम् मरिचम्, चुक्रम् चुक्रम्= काञ्जिकम् काञ्जिकम्, रामठम् रामठम्=हिङ्गु हिङ्गु, वितुन्नकं वितुन्नकम्=छत्रा छत्रा= शृङ्गवेरं शृङ्गवेरम्=आर्द्रकम् आर्द्रकम्, मत्स्यण्डी मत्स्यण्डी=फणितम् फणितम्, मत्स्याः मत्स्याः=मीनाः मीनाः, कुक्कुटाण्डम् कुकुटाण्डम्=ताम्रचूडाण्डम् ताम्रचूडाण्डम्, पललम् पललम्=मांसम् मांसम्, "इति=एवम्,कलकलैः=कोलाहलैः, बालानाम्= शिशूनाम्, निद्राम्=स्वापम्, विद्रावयतः=दूरीकुर्वतः, समीप–संस्थापित–कुतू–कुतुप–कर्करी– कण्डोल–कट–कटाह– कम्बिकडम्बान्=निकट–निहित –तैलाद्याधार– पात्र–क्षुद्रकुतू–करक–पिटक–किलिञ्ज कर्पर–दर्विकलम्बान्, उग्रगन्धीनि= उत्कटगन्धीनि, मांसानि=पललानि, शूलाकुर्वतः= शूलेन अग्नौ संस्कुर्वतः, नखम्पचा=उष्णा, यवागूः=उष्णिका, स्थालिकासु=उखासु, प्रसारयतः= विस्तारयतः, हिङ्गुगन्धीनि=रामठगन्धपूर्णानि, तेमनानि=मिष्ठानानि,

तिन्तिडीरसैः=अम्लिकारसैः, मिश्रयतः=मिश्रीकुर्वतः, परिपिष्टेषु=सम्यक् चूर्णीकृतेषु, कलम्बेषु= कडम्बेषु,जम्बीरनीरम्= निम्बुकरसम्, निश्च्योतयतः= मिश्रयतः, मध्ये मध्ये=अन्तरा अन्तरा,समागच्छतः=समापततः, ताम्रचूडान्=कुक्कुटान्, व्यजनताडनैः= तालवृन्ताहननैः, पराकुर्वतः=दूरीकुर्वतः, त्रपुलिप्तेषु= त्रपुसंस्कृतेषु, ताम्रभाजनेषु=ताम्रपात्रेषु, आरनालम्=काञ्जिकम्, परिवेषयतः=परिवेषणं कुर्वतः, सूदान्=पाचकान्, क्वचित्=कुत्रचित्, वक्रप्रसाधितकाकपक्षान्=तिर्यक्संस्कारितकचान्, मदव्याघूर्णितशोणनयनान्= मद्यपानभ्रमितर–क्तनेत्रान्, सपारस्परिक–कण्ठग्रहम्= अन्योन्यगलालिङ्गन–पूर्वकम्, पर्य्यटतः=भ्रमतः, यौवनचुम्बित–शरीरान्= युवावस्थालिखितशरीरान्, स्वसौन्दर्यगर्वभारेण= निजसुन्दरताभिमानभरेण, मन्दगतीन्=मन्थरगमनान्, अनवरताक्षिप्तकुसुमेषुबाणैः=सततचलितकामशरैः, इव=यथा, कुसुमैः=पुष्पैः, भूषितान्=अलंकृतान्, वसनातिरोहिताङ्गच्छटान् वस्त्रानाच्छादिताङ्गशोभान्, विविध पटवासवासितान्=अनेकसुगन्ध द्रव्यसुगन्धितान् अपि, चिरास्नान–महामलिनमहोत्कटस्वेद –पूतिगन्धप्रकटीकृता–स्पृश्यतान्= बहुकालान वहगाहातिमलिन–महोत्कट–घर्मोदक–पूतिगन्धव्यक्ती कृतास्पृश्यतान् यवनयुवकान्= म्लेच्छयुवकान्....(ददर्श)।

**समासविग्रहाः –** पूर्वे च ते पुरुषाः पूर्वपुरुषाः (कर्म.), स्वस्य पूर्वपुरुषाः स्वपूर्वपुरुषा (ष.त.) पुण्याश्चते लोकाः पुण्यलोकाः (कर्म.) स्वापूर्वपुरुषैः उपार्जिताः स्वपूर्वपुरुषोपार्जिताः (तृ.त.), ते च पुण्यलोकाः (कर्म.) तान्। प्राप्तश्चासौ अधिकारः प्राप्ताधिकारः (कर्म.), तेन कलितः अखर्वगर्वः यैस्ते (बहु.) तान्। कुतूश्च कुतुपश्च ककरी चकण्डोलश्च कटश्च कटाहश्च कम्बिश्च कडम्बश्च कुतू–कुतुप–कर्करी–कण्डोल –कट–कटाह–कम्बिकडम्बाः (द्वन्द्वः) समीपे संस्थापिता समीपसंस्थापिताः (स.त.) समीपसंस्थापिताश्च ते कुतू–कुतुपकर्करीकण्डो– लकटकटाहकम्बिकडम्बाः (तृ.त.), मदव्याधूर्णितानि शोणनयनानि येषाम् ते, तान् (बहु.)। यौवनेन चुम्बितानि यौवनचुम्बितानि (तृ.त.), यौवनचुम्बितानि शरीराणि येषां ते, तान् (बहु.)।

**व्याकरणम् –** उपविष्टान्–उप+विश्+क्त+शस्। उद्गिरतः–उद्+गिर्+ शतृ+शस्। अग्निसात्–अग्नि+सात। कुर्वतः–कृ+शतृ+शस्। आकलयतः– आ+कल+णिच् +शतृ+शस्। विद्रावयतः–वि+द्रु+णिच्+शतृ+शस्। शूलाकुर्वतः–शूलेन संस्कुर्वतः–शूल+डाच्+कृ+शतृ+शस्। निश्च्योतयतः–निस्+ च्युतिर्+शतृ+शस्। व्याघूर्णित–वि+आ+घूर्ण+क्त। समागच्छतः–सम्+आ+ गम्+शतृ+शस्। पराकुर्वतः–परा+कृ+शतृ+शस्।

**विशेषः –** गद्यांशेऽस्मिन् ''मुखात्कालसर्पानिव.................अग्निसात्कुर्वतः 'स्वसौन्दर्यगर्वभारेणेव मन्दगतीन्'' इत्यादौ च उत्प्रेक्षालंकारः। ........कुसुम– बाणैरिव कुसुमै'' इत्यत्रोपमा। अत्र सानुप्रासं पाञ्चालीगौड्योः रीत्योः मिश्रणं विद्यते।

**सरलार्थः –** अपजलखानशिविरं गायकवेषो गौरसिंहः यवनयुवकान् अपश्यत्। ते च क्वचित् खट्वासु क्वचिच्च पर्यङ्केषु उपविष्टाः सन्तः गडगडशब्दपूर्वकं धूमपानं कुर्वाणाः मुखाच्च कालसर्पान् उद्गिरन्त इव आसन्, तेन ते स्वहृदयकालुष्यं प्रकटयन्त इव, स्वपूर्वजैः उपर्जितान् पुण्यलोकान् फुत्कारैः ज्वालयन्त इव, मरणानन्तरं मुखाग्निसंयोगो दुर्लभोऽस्ति इति कृत्वा जीवनदशायामेव तं प्राप्नुवन्त इव प्रतीयमाना आसन्। अधिकारप्राप्त्या च ते गर्वोन्मत्ता आसन्। (तत्र शिविरे) क्वचित् सूदान् अपश्यत्; ये च'' हरिद्रा हरिद्रा लशुनं लशुनम्, मरिचं मरिचम्, चुक्रं चुक्रम, वितुन्नकं वितुन्नकम्, शृङ्गवेरं शृङ्गवरेम्, रामठं रामठम्, मत्स्यण्डी मत्स्यण्डी, मत्स्या मत्स्याः कुक्कुटाण्डं कुक्कुटाण्डम्, पललं, पललम्' इति कोलाहलैः शिशूनां निद्राभङ्गं कुर्वाणाः आसन्; तेषां समीपे कुतू–कुतुपकर्करीकण्डो– लकटकटाहकम्बिकडम्बाः संस्थापिता आसन्। एवंविधास्ते उत्कटगन्धयुतानि मांसानि लोहशलाकाभिः पचन्तः, अत्युष्णां यवागूं स्थालिकासु प्रसारयन्तः, हिङ्गुगन्धीनि व्यञ्जनानि अम्लिकारसैः संयोजयन्तः; चूर्णीकृतेषु कडम्बेषु निम्बुरसं मिश्रयन्तः, मध्ये मध्ये च समागच्छतः कुक्कुटान् व्यजनताडनैः पराकुर्वन्तः, त्रपुलिप्तेषु ताम्रभाजनेषु काञ्जिकं

परिवेषयन्तश्चासन्। (तत्र शिविरे) क्वचित् (अन्यान्) यवनयुवकान् अपश्यत्; ये च वक्रप्रसाधितकेशाः, मद्यपानेन रक्तनेत्राः पारस्परिकेण कण्ठग्रहेण सह भ्रमन्तः, प्राप्तयौवनाः, स्वसौन्दर्यगर्वभारेण मन्दगतय इव, निरन्तरनिपतितपुष्पबाणैरिव कुसुमैः अलङ्कृताः, विविधसुगन्धद्रव्यैः वासिता अपि बहुकालिकात् स्नानाभावाद् मलिनतरेण अत्युत्कटगन्धोपेतेन स्वेदजेन दुर्गन्धेन स्वीयामपृश्यतां प्रकटयन्तश्चासन्।

**मूलम् – क्वचिद्– अहो! दुर्गमता महाराष्ट्रदेशस्य! अहो, दुराधर्षता महाराष्ट्राणाम्, अहो, वीरता शिववीरस्य, अहो! निर्भयता एतत्सेनानीनाम् अहो त्वरितगतिरेतद्घोटकानाम् आः! किं कथयामः? दृष्ट्वैव चमत्कारं शिववीर–चन्द्रहासस्य न वयं पारयामो धैर्यं धर्तुम्, न च शक्नुमो युद्धस्थाने स्थातुम्, को नाम द्विशिरा यः शिवेन योद्धुं गच्छेत्? कश्च नाम द्विपृष्ठो यस्तद्भटैरपि छलालापं विदध्यात्? वयं बलिनः, आस्माकीना महती सेना, तथाऽपि न जानीमः, किमिति कम्पत इव क्षुभ्यतीव च हृदयम्? 'यवनानां पराजयो भविष्यति, अपजलखानो विनङ्क्ष्यति' इति न विद्मः को जपतीव कर्णे, लिखतीव सम्मुखे, क्षिपतीव चान्तःकरणे। मा स्म भोः! मैवं स्यात्, रक्ष भो! रक्ष जगदीश्वर! अथवा सम्बोभवीतितमामेवमपि, योऽयमपजलखानः सेनापति–पद–विडम्बनोऽपि 'शिवेन योत्स्ये हनिष्यामि ग्रहीष्यामि वा' इति सप्रौढि विजयपुराधीशमहासमायां प्रतिज्ञाय समायातोऽपि, शिवप्रतापञ्च विदन्नपि "अद्य नृत्यम्, अद्य गानम्, अद्य लास्यम्, अद्य मद्यम्, अद्य वाराङ्गना, अद्य भ्रूकुंसकः, अद्य वीणा–वादनम्" इति स्वच्छन्दैरुच्छृङ्खलाऽऽचरणैर्दिनानि गमयति।**

**प्रसंङ्गः –** अत्र गौरसिंहः अपजलखानशिविरे शिववीरस्य तत्सैनिकानाञ्च पराक्रमातिशयम् आश्रित्य परस्परमालपतः यवनसैनिकान् पश्यति–

**व्याख्या –** (अपजलखानशिविरे) क्वचिद्=कुत्रचिद्,–''अहो!= आश्चर्यसूचकम्, महाराष्ट्रदेशस्य=एतदारव्यदेशस्य, दुर्गमता=दुःखेन गमनीयता, अहो! महाराष्ट्रणाम्= महाराष्टप्रान्तीयानाम्, दुराधर्षता=दुःखेन अभिभवनीयता, अहो!, शिववीरस्य=शिवराजस्य, वीरता=शूरता, अहो!, एतत्सेनानीनाम्= शिववीरसैनिकानाम्, निर्भयता=निर्भीकत्वम्, अहो! एतद्घोटकानाम्= अस्याश्वानाम्, त्वरितगतिः=तीव्रगमनम्, आः!=खेदसूचकम्, किं कथयामः?=किं ब्रूमः? शिववीरचन्द्रहासस्य=शिवराजखड्गस्य, चमत्कारं=चमत्कृतिम्, दृष्टवा=अवलोक्य, एव, वयम्=अपजलखानसैनिकाः, धैर्यम्=धृतिम्, धर्तुम्= धारयितुम्, न पारयामः= न शक्नुमः। युद्धस्थाने=रणक्षेत्रे, (वयम्) स्थातुम्=स्थितिं विधातुम्, न शक्नुमः=न प्रभवामः, द्विशिरा=द्विमस्तकः, को नाम?=कः अस्ति? न कोऽपीत्यर्थः, यः=यो जनः, शिवेन=शिववीरेण, योद्धुम्=युद्धाय, गच्छेत्=व्रजेत्। द्विपृष्ठः=द्विपश्चाद्भागः, को नाम?=कोऽस्ति? न कोऽपीत्यर्थः, यः=यो जनः, छलालापम्=कपटवार्ताम्, विदध्यात्=कुर्यात्, वयं बलिनः=वयं (यवनाः) शूराः (स्मः), आस्माकीना=अस्मदीया, महती=विशाला सेना=चमूः, (अस्ति), तथापि=पुनरपि, न जानीमः=न विद्मः किमिति=किमर्थम् (अस्माकम्) हृदयम्=मनः, कम्पते इव=वेपते इव, क्षुभ्यतीव=खिद्यत इव? "यवनानाम्=अस्माकम्, पराजयः=पराभवः, भविष्यति=सम्पत्स्यते, अपजलखानः=अस्मत्सेनापतिः, विनङ्क्ष्यति=विनष्टो भविष्यति," इति=इत्थम्, न विद्मः=न जानीमः, कः=कश्चन, कर्णे=श्रोत्रे, जपतीव=पठतीव, सम्मुखे=पुरस्तात्, लिखति इव=लेखनं करोतीव, च, अन्तःकरणे=चेतसि, क्षिपति इव=अस्यति इव। मा स्म=न, भोः! एवं मा स्यात्=इत्थं न भवेत, भो. जगदीश्वर!=भोः लोकपाल!, रक्ष रक्ष=पालय, पालय अथवा=वा, एवमपि=इत्थमपि सम्बोभवीतितमाम्=अतितमां सम्भवति, यः अयम् अपजलखानः, सेनापतिपदविडम्बनः अपि=चमूपतिपदारूढोऽपि, "शिवेन=शिवराजेन, योत्स्ये=युद्धं करिष्ये, (तम्) हनिष्यामि=मारयिष्यामि, वा=अथवा, ग्रहीष्यामि=वशीकरिष्यामि, इति, सप्रौढि=साभिमानम्, विजयपुराधीशसभायाम्= विजयपुरेश्वरसमित्याम्, प्रतिज्ञाय=संश्रुत्य, समायातोऽपि=समागतोऽपि, च, शिवप्रतापम्=शिववीरशौर्यम्, विदन्अपि=जानन्अपि, "अद्य=अस्मिन् दिने, नृत्यम्=नर्तनम्, अद्य, गानम्=गीतम्, अद्य, लास्यम्=सुकुमारं नृत्यम्, अद्य, मद्यम्=मदिरा, अद्य, वाराङ्गना=गणिका, अद्य, भ्रूकुंसकः=स्त्रीवेषोनर्तकः,

अद्य, वीणावादनम्=विपञ्चीवादनम्," इति=एवम्, स्वच्छन्दैः=स्वतन्त्रैः उच्छृङ्खलाचरणैः=निर्मयादिताचारैः, दिनानि=दिवसानि, गमयति=यापयति।

**समासविग्रहाः–** त्वरिता चासौ गतिः त्वरितगतिः (कर्म.) शिववीरस्य चन्द्रहासः शिववीरचन्द्रहासः (ष.त.) तस्य। द्वे शिरसी यस्य सः द्विशिराः (बहु.)। छलस्य आलापः छलालापः (ष.त.), तम्। विजयपुरस्य अधीशः, विजयपुराधीशः, तस्य महासभा (ष.त.), तस्याम्।

**व्याकरणम् –** दुर्गमता–दुःखेन गन्तुं योग्यः, तस्य भावः, दुर्+गम्+ खल्+तल्+टाप्। दुरार्धषता –दुःखेन आ धर्षयितुं योग्य; तस्य भावः, दुर्+आ+धृष्+ णिच्+खल्+तल्+ टाप्। धर्त्तुम्=धृ+तुमुन्। स्थातुम्=स्था+तुमुन्। योद्धुम्= युध्+तुमुन। सम्बोभवीतितमाम् – पुनःपुनः सम्भवति इति सम्बोभवीति, अतिशयेन सम्बोभवीति इति सम्बोभवीतितमाम्– सम्+भू+यङ्+लट्+तिप्+तमप्।

**विशेषः –** अत्र शिववीरस्य शौर्यं यवनानाञ्च भयमभिव्यज्यते। "कम्पत इव" "क्षुभ्यतीव हृदयम्" "जपतीव कर्णे", "लिखतीव सम्मुखे", क्षिपतीव चान्तःकरणे" च इत्यत्र उत्प्रेक्षालंकारः।

**सरलार्थः –** क्वचिद्–अहो! महाराष्ट्रदेशोऽतीव दुर्गमः, अहो! महाराष्ट्राः अतीव दुर्धषाः, अहो! शिववीरस्य शौर्यम् अत्यद्भुतम्, अहो! शिवसैनिकाः अतीव निर्भीकाः, अहो! एतदीयाश्वानां गतिरतीव तीव्रा, आः। किं बूमः? शिववीरस्य खड्गस्य चाकचिक्यं दृष्ट्वा एव वयं धैर्यं धर्त्तुम् युद्धे च सम्मुखे स्थातुं न शक्नुमः। कस्य मस्तकद्वयमस्ति? यः शिवेन योद्धुम् गच्छेत्। कस्य पृष्ठद्वयमस्ति? यः शिवसैनिकैः अपि सह कपटमाचरेत्। यद्यपि वयं बलिनः स्मः, अस्माकं सेनाअपि विशाला वर्तते, तथापि न ज्ञायते यदस्माकं हृदयं कथं कम्पति इव, व्यथते इव च? 'यवनानां पराजयो भविष्यति, अपजलखानो नशिष्यति' इत्येव कोऽपि अस्माकं कर्णे जपति इव, सम्मुखे लिखति इव, अन्तः करणे च क्षिपति इव प्रतीयते। अरे! एवं न स्यात्। हे जगदीश्वर! अस्मान् रक्ष। अथवा एतदतिशयेन सम्भवति, यदयमपजलखानः सेनापति पदारूढोऽपि 'शिवेन योत्स्ये, हनिष्यामि ग्रहीष्यामि वा' इति सगर्वं विजयपुराधीशस्य सभायां प्रतिज्ञाय समागतोऽपि, शिवप्रतापं जानन्नपि "अद्य नृत्यम्, अद्य गानम्, अद्य लास्यम्, अद्य मद्यम्, अद्य गणिका, अद्य स्त्रीवेषो नर्तकः, अद्य वीणावादनम्," इति स्वच्छन्दैः निर्मयादितैः आचरणैः दिनानि गमयति।

**मूलम् – न च यः कदापि विचारयति, यत् कदाचित् परिपन्थिभिः प्रेषिता काचन वारवधूरेव मामासवेन सह विषं पाययेत्, कोऽपि नट एव ताम्बूलेन सह गरलं ग्रासयेत्, कोऽपि गायक एव वा वीणया सह खड्गमानीय खण्डयेदित्यादि; ध्रुव एव तस्य विनाशः, ध्रुवमेव पतनम् ध्रुवमेव च पशुमारं मरणम्। तन्न वयं तेन सह जीवन–रत्नं हारयिष्यामः"–इति व्याहरतः; इतरांश्च–**

**"मैवं भोः! श्व एव आहव–क्रीडाऽस्माकं भविष्यति, तत् श्रूयते सन्धिवार्त्ता–व्याजेन शिव एकत आकारयिष्यते, यावच्च स स्वसेनामपहाय एकाकी अस्मत्स्वामिना सहाऽऽलपितुमेकान्तस्थाने यास्यति; तावद्वयं श्येना इव शकुनिमण्डले महाराष्ट्रसेनायां, छिन्धि भिन्धि इति कृत्वा युगपदेव पतिष्यामः, वसन्त–वाताहत–नीरसच्छदानिव च क्षणेन विद्रावयिष्यामः।**

**प्रसङ्गः –** "अत्र केचन अपजलखानसैनिकाः उच्छृङ्खलाचरणात् अपजलखानस्य मरणम् आशङ्कन्ते, केचन च श्वः अस्माकं शिवेन सह युद्धो भविता" इति कथयन्ति; उभयोश्चित्रणमत्र कविः करोति –

न च=नहि च, यः=अपजलखानः, कदापि=कदाचिदपि, विचारयति= चिन्तयति, यत्=यतः कदाचित्=कस्मिंश्चित् काले, परिपन्थिभिः=शत्रुभिः, प्रेषिता=प्रहिता, काचन=कापि, वारवधूः=वेश्या, एव, माम्=अपजलखानम्, आसवेन सह=मदिरया साकम्, विषम्=गरलम्, पाययेत्=पानं कारयेत्, कोऽपि=कश्चन, नटः=रङ्गजीवः, ताम्बूलेन=पानकेन, सह, गरलम्=विषम्, ग्रासयेत्=ग्रासं कारयेत्, वा=अथवा, कोऽपि, गायकः=गीतकारः, एव, वीणया सह=वल्लक्या समम्, खड्गम्=कृपाणम्, आनीय=आदाय, खण्डयेत्= द्विधा (शरीरम्) कुर्यात् इत्यादि, तस्य=अपजलखानस्य, विनाशः=मरणम्, ध्रुव एव=निश्चित एव, पतनम्=पराजयः,

ध्रुवमेव, पशुमारम्=पशुतुल्यम्, मरणम्=वधः, ध्रुवमेव, अस्ति तत्=तस्मात्, वयम्=सैनिकाः, तेन सह=अपजलखानेन सह। जीवनरत्नम्=बहुमूल्यप्राणान्, न=नैव, हारयिष्यामः=नाशयिष्यामः, इति=एवम्, व्याहरतः=व्यवहारं कुर्वतः, इतरांश्च=अन्यांश्च–

मैवं भोः!=एवं मा वदत, श्व एव=आगामिनि दिने एव, अस्माकम्= यवनसैनिकानाम्, आहवक्रीडा=युद्धक्रीडा, भविष्यति=सम्पत्स्यते, तत्=तस्मात्, श्रूयते=निशम्यते, एकतः=एकस्मिन् स्थाने शिवः=शिववीरः, सन्धि–वार्ताव्याजेन= सन्धि–चर्चा–छलेन, आकारयिष्यते=आमन्त्रयिष्यते, यावत्=यदा, च, स=शिववीरः, स्वसेनाम्=निजपताकिनीम्, अपहाय=परित्यज्य, एकाकी=केवलः, अस्मत्स्वामिना= अस्मदीश्वरेण, सह, आलपितुम्=वार्तां कर्तुम्, एकान्तस्थाने=गुप्तस्थले, यास्यति=गमिष्यति, तावद्वयम्=तदा यवनसैनिकाः, शकुनिमण्डले=पक्षिमण्डले, श्येना इव=शशादना इव, महाराष्ट्रसेनायाम्=शिवसैनिकेषु, छिन्धि=कर्त्तय, भिन्धि=भेदय, इति=एवम्, कृत्वा=विधाय, युगपदेव=सहसैव, पतिष्यामः= आक्रमिष्यामः, वसन्त–वाताहते–नीरसच्छदानिव=वसन्तपवनान्दोलितशुष्कपत्राणीव, च, क्षणेन=अत्यल्पकालेन, विद्रावयिष्यामः= मारयिष्यामः।

**समास–विग्रहाः** – आहवस्य क्रीडा, आहवक्रीडा (ष.त.)। सन्धेःवार्ता, सन्धिवार्ता, तस्याः व्याजः (ष.त.) तेन। महाराष्ट्राणां सेना, महाराष्ट्रसेना, (ष.त.) तस्याम्।

**व्याकरणम्** – पातयेत्–पत्+णिच्+वि.लिङ्+तिप्। नटः–नट्+अच्+सु। छिन्धि–छिदिर्+लोट्+सिप्। भिन्धि–भिदिर्+लोट्+सिप्।

**विशेषः** – गद्येऽस्मिन् 'आहवक्रीडा' इत्यत्र रूपकाख्योऽलंकारः, तथा 'श्येना इव शकुनिमण्डले, "वसन्तवाताहतनीरसच्छदानिव" इत्यत्र च उपमाऽलंकारः। अत्र अपजलखानस्य राजनैतिकशून्यता दृग्गोचरीभवति।

**सरलार्थः** – गौरसिंहः यान् यवनसैनिकान् अपश्यत् तेषु केचन यवनसैनिकाः परस्परम् आलपन्ति यत् यः अपजलखानः कदापि न विचारयति यत्–कदाचित् शत्रुभिः प्रेषिता काचन गणिका माम् मदिरया सह विषपानं कारयेत्, यद्वा कश्चन नट एव ताम्बूलेन सह विषं भोजयेत्, यद्वा कश्चन गायकः एव वीणया सह खड्गं नीत्वा मारयेत् चेति। अतः तस्य विनाशः, पतनं पशुमारं मरणं वा ध्रुवमस्ति। तस्माद् वयं तेन (अपजलखानेन) सह बहुमूल्यं जीवनं न नङ्क्ष्यामः" इति। केचन च–अरे! न एवं कथयत। श्व एव तेन (शिवेन) सह अस्माकं युद्धं भविष्यति, श्रूयते यत् एकतः शिववीरः सन्धिवार्तामिषेण आमन्त्रयिष्यते, यथैव स स्वसेनां विहाय अस्माकं स्वामिना सह आलपितुं रहसि गमिष्यति, तथैव वयं सर्वे पक्षिषु श्येना इव महाराष्ट्रसेनायां 'छिन्धि, भिन्धि,' इति कृत्वा युगपदेव आक्रमणं करिष्यामः, ते च वसन्तवाताहतपत्राणि इव क्षणेन नष्टाः भविष्यन्ति।

**मूलम् – इतस्तु छलेनाऽस्मत्वस्वामिसहचराः शिवं पाशैर्बद्ध्वा पिञ्जरे स्थापयित्वा तं जीवन्तमेव वशंवदं करिष्यन्ति। परन्तु गोप्यतमोऽयं विषयो मा स्म भूत् कस्यापि कर्णगतः इति कर्णान्तिकं मुखमानीयोत्तरयतः सांग्रामिक– भटानवलोकयन्; "धन्या भवन्तो येषां गोप्यतमा अपि विषया एव वीथिषु विकीर्यन्ते। महाराष्ट्रा धूर्ताचार्याः, नैतेषु भवतां धूर्तता सफला भवति" इत्यात्मन्येवाऽऽत्मना कथयन्, स्वप्रभाधर्षित–सकल–रक्षकगणः स्वसौन्दर्येणाऽऽकर्षयन्निव विश्वेषां मनांसि, सपद्येव प्रधान–पट–कुटीर–द्वारमाससाद। तत्र च प्रहरिणमालोकयदुक्तवांश्च यत् पुण्यनगर–निवासी गायकोऽहमत्रभवन्तं गान–रस–रसायनैरमन्द– मानन्दयितुमिच्छामीति। तदवगत्य स भ्रूसंचारेण कञ्चित् निवेदकं सूचितवान्। स चान्तः प्रविश्य, क्षणानन्तरं पुनर्बहिर्निर्गत्य गायकमपृच्छत्–किं नाम भवतः? पूर्वञ्च कदाऽपि समायातो न वा? अथ स आह–"तानरङ्गनामाऽहं कदाचन युष्मत्कर्णमस्पृशम्। न पूर्वं कदाऽपि ममात्रोपस्थातुं संयोगोऽभूत्, अद्य भाग्यान्यनुकूलानि चेत्, श्रीमन्तमवलोकयिष्यामि इति। स च 'आम्' इत्युदीर्य पुनः**

**प्रविश्य क्षणानन्तरं निर्गत्य च, विचित्र–गायकममुं सह निनाय।**

**प्रसङ्गः –** अत्र शिववीरेण सह आहवद्यूतेन क्रीडितुमिच्छन्तः अपजलखानसैनिकाः परस्परम् आलपन्तिं

**व्याख्या –** इतः तु=अपरतस्तु, अस्मत्स्वामिसहचराः=अस्माकं प्रभुसहायकाः, छलेन=कपटेन, शिवम्=शिववीरम्, पाशैः=जालैः, बुद्ध्वा=बद्धं कृत्वा, पिञ्जरे=पञ्जरे, स्थापयित्वा=संस्थाप्य, तम्=शिववीरम्, जीवन्तम्=श्वसन्तम्, (जीवितम्), एव=हि, वशंवदम्=बन्दिनम्, करिष्यन्ति=विधास्यन्ति। परन्तु=किन्तु, गोप्यतमः=अतिशयेन गोपनीयः, अयं विषयः=एषः विषयः, कस्य अपि=कस्यचन अपि, कर्णगतः=श्रुतिविषयः, मा स्म भूत्=न भवेत्–इति=इत्थम्, कर्णान्तिकम्= श्रुतिसमीपम्, मुखम्=लपनम्, आनीय=नीत्वा, उत्तरयतः=भाषमाणान्, सांग्रामिकभटान्= योद्धॄन् शूरान्, अवलोकयन्=पश्यन्, "भवन्तः=यूयम्, धन्याः= धन्यवादयोग्याः, (स्थ) येषाम्, गोप्यतमाः=अतिशयेन गोपनीयाः, अपि, विषयाः=योजनाः, एवम्=इत्थम्, वीथिषु=रथ्यासु, विकीर्यन्ते=क्षिप्यन्ते, महाराष्ट्राः=शिवसहचराः, धूर्ताचार्याः=प्रवञ्चनपटवः (सन्ति), एतेषु=एषु, भवताम्=युष्माकम्, धूर्तता=वञ्चना, सफला=सिद्धा, न भवति", इति=एवम्, आत्मनि=मनसि, एव, आत्मना=मनसा, कथयन्=चिन्तयन्, स्वप्रभाधर्षितसकल– रक्षकगणः= निजकान्तितिरस्कृतनिखिलरक्षिसमूहः, स्वसौन्दर्येण= निजकान्त्या, विश्वेषाम्=सर्वेषाम्, मनांसि=हृदयानि, आकर्षयन् इव=वशीकुर्वन् इव, सपदि एव=शीघ्रमेव, प्रधानपटकुटीरद्वारम्= मुख्योपकार्याद्वारम्, आससाद=प्राप। तत्र=उपकार्याद्वारे, च, प्रहरिणम्=रक्षिणम्, आलोकयत्=अपश्यत् उक्तवान्=अवदत्, च, यत्, पुण्यनगरनिवासी='पूना'–नगर–वास्तव्यः, गायकः=गानकर्मपरः, अहम्, अत्रभवन्तम्=श्रीमन्तम् अपजलखानम्, गानरसरसायनैः=गीतिरसरसायनैः, अमन्दम्=अतीव, आनन्दयितुम्=प्रसादयितुम्, इच्छामि=वाञ्छामि इति। तदवगत्य=तज्ज्ञात्वा, स=रक्षी, भ्रूसंचारेण=नेत्रसंकेतेन, कञ्चित्=कमपि, निवेदकम्=सन्देशहरम्, सूचितवान्=इङ्गितवान्। सः=निवेदकः, च, अन्तः प्रविश्य=अभ्यन्तरं गत्वा, क्षणानन्तरम्=कञ्चित्कालानन्तरम्, पुनः=भूयः, बहिः निर्गत्य=बहिरागम्य, गायकम्, अपृच्छत्=पृष्टवान्–भवतः किंनाम?=किन्ते अभिधानम्?, पूर्वम्=प्राक्, कदाअपि, समायातः=समागतः न, वा=अथवा,? (पूर्वं कदापि आगतोऽसि न वा इत्यर्थः)। अथ, स=गायकः, आह=अवदत्– तानरङ्गनामा=नाम्ना तानरङ्गः, अहम्, कदाचन=कदापि, युष्मत्कर्णम्=भवतः श्रुतिपथम्, अस्पृशम्=स्पृष्टवान् (इति संभवेत्)। पूर्वम्=प्राक्, मम=गायकस्य, अत्र, उपस्थातुम्=आगन्तुम्, संयोगः=अवसरः, न अभूत्=न जातः; अद्य, भाग्यानि अनुकूलानि=दैवम् अनुकूलं, (भवेत्) चेत्=यदि, श्रीमन्तम्=अपजलखानम्, अवलोकयिष्यामि=द्रक्ष्यामि इति। स, च, आम्=अस्तु, इति, उदीर्य=उक्त्वा, पुनः=भूयः, प्रविश्य=प्रवेशं विधाय, क्षणानन्तरम्, निर्गत्य=निर्गम्य, च, विचित्रगायकम्= विलक्षणगायकम्, अमुम्=एतम्, सह=सार्द्धम्, निनाय=अनयत्।

**समास–विग्रहाः–** सह चरन्ति इति सहचराः, (उप.त.), अस्माकं स्वामी, अस्मत्स्वामी, तस्य सहचराः, (ष.त.)। सांग्रामिकाश्च ते भटाः, सांग्रामिकभटाः (कर्म), तान्। रक्षकाणां गणः, रक्षकगणः, सकलश्चासौ रक्षकगणः सकलरक्षकगणः, (कर्म.), स्वप्रभया धर्षितः सकलरक्षकगणः येन सः (बहु.)। प्रधानश्चासौ पटकुटीरः, प्रधानपटकुटीरः, (कर्म.), तस्य द्वारम्।

**व्याकरणम् –** वशंवदम्–वशं वदतीति वशंवदः, तम्, वश (मुम्)+वद्+ खच्+अम्। गोप्यतमः–गुप्+यत्+तमप्+सु। विकीर्यन्ते– वि+कृ+यक्+लट् (झ) (कर्मणि)। आससाद–आ+षद्+लिट्+तिप्। समायातः–सम्+आ+ या+क्त+सु। निनाय– णी+लिट्+तिप्।

**विशेषः –** गद्यांशेऽस्मिन् यवनसैनिकानाम् अदूरदर्शिता तेषांसेनापतेश्च विलासप्रियता च महाकविना सुष्ठु चित्रिता। स्वसौन्दर्येणाऽऽकर्षयन्निव.......' इत्यत्र चोत्प्रेक्षालंकारः।

**सरलार्थः –** इतः अस्माकं स्वामिनः सहचराः शिवराजं रज्जुभिर्बद्ध्वा पञ्जरे स्थापयित्वा तं जीवन्तमेव वशीकरिष्यन्ति। परम् अतिशयेन गोपनीयमिमं वृतान्तं न कश्चन शृणुयात्–इति कर्णान्तिकं मुखं नीत्वा उत्तरयतः सांग्रामिकभटान् पश्यन्, 'भवन्तो धन्याः, येषां गोप्यतमा अपि विषया एवं रथ्यासु विक्षिप्यन्ते,

(जानन्तु भवन्तः) महाराष्ट्राः अतीव वञ्चनापटवः सन्ति, तेषु भवतां धूर्तता सफला न भविष्यति इति आत्मनि आत्मना कथयन्, स्वप्रभया सर्वान् रक्षिणः निष्प्रभान् कुर्वन्, स्वसौन्दर्येण सर्वेषां मनांसि आकर्षयन् इव शीघ्रमेव प्रधानं पटकुटीरद्वारं प्राप्नोत्। तत्र च प्रहरिणम् अपश्यत् अवदत् च–यत् पुण्यनगरवास्तव्यो गायकोऽहं श्रीमन्तमपजलखानं गानरसास्वादेन आनन्दयितुमिच्छामि इति। स च प्रहरी भ्रूसंकेतेन कमपि सन्देशहरं निर्दिशति। सन्देशहरश्च अन्तः प्रविश्य, क्षणानन्तरं पुनः बहिरागत्य गायकमपृच्छत्–भवतः किम्नाम? पूर्वञ्चापि कदाचिदिहागतोऽसि त्वम् अथवा नैवागतोऽसि? तदा स आह–अहं 'तानरङ्ग' इत्यारव्यः गायकोऽस्मि, कदाचित् भवता पूर्वमपि इदं नाम श्रुतं भवेत्। पूर्वं कदापि मया संयोगो न लब्धः, अद्य भाग्यमनुकूलं भवेत् तदा श्रीमन्तं द्रक्ष्यामि, इति। स च 'आम्' इति उक्त्वा पुनः प्रविश्य क्षणानन्तरं च निर्गत्य अमुं विचित्रगायकं सममनयत्।

**मूलम् – तानरङ्गस्तु तेनैव तानपूरिका–हस्तेन बालकेनानुगम्यमानः, शनैः शनैः प्रविश्य, प्रथमं द्वितीयं तृतीयञ्च द्वारमतिक्रम्य, कांश्चित् मृदङ्गस्वरान् सन्दधतः, कांश्चिद् वीणावरणमुन्मुच्य, प्रवालं प्रोञ्छ्य, कोणं कलयतः कांश्चिदविचलोऽयमेतेनैव सह योज्यन्तामपरवाद्यानीति वंशीरवं साक्षीकुर्वतः, कांश्चित् कलित–नेपथ्यान् पादयोर्नूपुरं बध्नतः, कांश्चित् स्कन्धावलम्बिगुटिकातः करतालिकामुत्तोलयतः, कांश्चिच्च कर्णे दक्षकरं निधाय, चक्षुषी सम्मील्य, नासामाकुञ्च्य, पातितोभयजानु उपविश्य, वामहस्तं प्रसार्य, तन्त्रीस्वरेण स्व–काकलीं मेलयतः; सम्मुखे च पृष्ठतः पार्श्वतश्चोपविष्टैः कैश्चित् ताम्बूलवाहकैः, अपरैर्निष्ठ्यूतादान–भाजनहस्तैः, अन्यैरनवरत–चालितचामरैः, इतरैर्बद्धाञ्जलि– भिर्लालाटिकैः परिवृतम्, रत्नजटितोष्णीषिकामस्तकम्, सुवर्ण–सूत्र–रचित–विविध– कुसुम–कुड्मल– लताप्रतानाङ्कित–कञ्चुकं महोपबर्हमेकं क्रोडे संस्थाप्य, तदुपरिसन्धारित–भुजद्वयम्, रजत–पर्य्यङ्के विविध –फेन–फेनिल–क्षीरधि–जलतल– च्छविमङ्गीकुर्वत्यां तूलिकायामुपविष्टमपजलखानं च ददर्श।**

**प्रसङ्गः –** अत्र शिविरं प्रविश्य तानरङ्गः अपजलखानं पश्यति स्म–

**व्याख्याः –** तानरङ्गः=गौरसिंहः, तु, तानपूरिकाहस्तेन=तानपूरिकाकरेण, तेन एव=पूर्वोक्तेन एव, बालकेन=कुमारेण, अनुगम्यमानः=अनुसर्यमाणः, शनैः–शनैः =मन्दं मन्दम्, प्रविश्य=अभ्यन्तरं गत्वा, प्रथमम्=आद्यम्, द्वितीयम्=अपरम्, तृतीयम्, च, द्वारम्=प्रतीहारम्, अतिक्रम्य=क्रान्त्वा, कांश्चित्, मृदङ्गस्वरान् सन्दधतः=मृदङ्गं वादयतः, कांश्चित्, वीणावरणम्=विपञ्चीछादनम्, उन्मुच्य=अपावृत्य, प्रवालम्=वीणादण्डम्, प्रोञ्छ्य=प्रमार्ज्य, कोणम्=शारिकाम्, कलयतः=धारयतः, कांश्चित्, अयम्=एषः स्वरः, अविचलः=निश्चलः (अस्ति), एतेन एव=अनेन एव, सह=साकम्, अपरवाद्यानि=अन्यवाद्ययन्त्राणि, योज्यन्ताम्=मिश्र्यन्ताम् इति, वंशीरवम्=शुषिरस्वरम्, साक्षीकुर्वतः=प्रत्यक्षं कुर्वतः, कांश्चित्, कलितनेपथ्यान्= धृतवेषान्, पादयोः=चरणयोः नूपुरम्=हंसकम्, बध्नतः=धारयतः, कांश्चित्, स्कन्धावलम्बिगुटिकातः= असंदेशावलम्बितगुटिकातः, करतालिकाम्=करताल इति वाद्यविशेषम्, उत्तोलयतः=निस्सारयतः, कांश्चित्, च, कर्णे=श्रोत्रे, दक्षकरम्=दक्षिणहस्तम्, निधाय=संस्थाप्य, चक्षुषी=नेत्रे, समील्य=निमील्य, नासाम्=नासिकाम्, आकुञ्च्य=आकुञ्चनं कृत्वा, पातितोभयजानु=भुवि स्थापितोभयजानु, उपविश्य=उपवेशनं विधाय, वामहस्तम्=सत्यकरम्, प्रसार्य=विस्तार्य, तन्त्रीस्वरेण=विपञ्चीध्वनिना, स्वकाकलीम्=निजातिमन्दध्वनिम्, मेलयतः=संयोजयतः, सम्मुखे=पुरस्तात्, च, पृष्ठतः=पश्चात्, पार्श्वतः=उभयपक्षतः च, उपविष्टैः=आरूढैः, कैश्चित्, ताम्बूलवाहकैः=पानकधारिभिः, अपरैः=अन्यैः, निष्ठ्यूतादानभाजनहस्तैः= पात्रविशेषगृहीतकरैः, अन्यैः, अनवरतचालितचामरैः= सततान्दोलितबालव्यजनैः, इतरैः, बद्धाञ्जलिभिः=सम्पुटीकृतकरैः, लालाटिकैः=प्रभोः भालदर्शिभिः, परिवृतम्=वेष्टितम्, रत्नजटितोष्णीषिकामस्तकम्= मणिजटितटोपिकाशिरस्कम्, सुवर्णसूत्ररचित–विविध–कुसुमकुड्मल– लताप्रतानाङ्कितकञ्चुकम्=हिरण्यतन्तु–विरचित– नानापुष्पकोरकवल्ली–तन्तुशोभितचोलकम्, एकम्, महोपबर्हम्=बृहदुपधानम्, क्रोडे=अङ्के, संस्थाप्य= धारयित्वा, तदुपरि= उपधानोपरि,

सन्धारितभुजद्वयम्= संस्थापितकरयुगलम्, रजतपर्य्यङ्के=राजतशयनीये, विविधफेनफेनिल–क्षीरधिजलतलच्छविम्= नानाडिण्डीरफेनिलसमुद्रनीरतलशोभाम्, अङ्गीकुर्वत्याम्=स्वीकुर्वत्याम् (दधानायाम्), तूलिकायाम्=तूलनिर्मितविष्टरे, उपविष्टम्=विराजमानम्, अपजलखानम्= यवनसेनानायकम्, च, ददर्श=अद्राक्षीत्।

**समास–विग्रहाः** – तानपूरिका हस्ते यस्य स तानपूरिकाहस्तः, तेन (बहु.)। वीणाया आवरणम् वीणावरणम्, (ष.त.)। कलितः नेपथ्यः यैःतेः, तान् (बहु.)। स्कन्धे अवलम्बिनी स्कन्धावलम्बिनी (स.त.), साचासौ गुटिका (कर्म.) तस्याः। पातिते उभयजानुनी यस्मिन् तत् (बहु.)। निष्ठ्यूतादानस्य भाजनम् निष्ठ्यूतादानभाजनम्, (ष.त.) निष्ठ्यूतादानभाजनं हस्ते येषां ते (बहु.), तैः। बद्धाः अञ्जलयः यैस्ते (बहु.), तैः। रत्नैः जटिता (तृ.त.) रत्नजटिता चासौ उष्णीषिका (कर्म.), रत्नजटितोष्णीषिका मस्तके यस्य सः (बहु.)। कुसुमानि च कुड्मलानि च लताप्रतानानि कुसुमकुड्मलल– ताप्रतानानि (द्वन्द्वः) विविधानि च तानि कुसुमकुड्मलतताप्रतानानि (कर्म.) सुवर्णसूत्रेण रचितानि सुवर्णसूत्ररचितानि (तृ.त.) सुवर्णसूत्ररचितानि च तानि विविध–कुसुमकुड्मललताप्रतानानि सुवर्णसूत्ररचितविविधकुसुम कुड्मललताप्रतानानि (कर्म.) तैः अङ्कितं कञ्चुकं यस्य सः (बहु.), तम्। सन्धारितं भुजद्वयं यस्य सः, सन्धारितभुजद्वयः (बहु.) तम्।

**व्याकरणम्** – अनुगम्यमानः–अनु+गम्+यक्+शानच्+सु। अतिक्रम्य– अति+क्रम्+ क्त्वा > ल्यप्। प्रोञ्छ्य–प्र+उछि+क्त्वा > ल्यप्। उत्तोलयतः– उद्+तुल+ णिच्+शतृ+शस्। आकुञ्च्य–आङ्+कुञ्च्+क्त्वा > ल्यप्। प्रसार्य–प्र+सृ+णिच्+क्त्वा > ल्यप्। अङ्गीकुर्वत्याम्–अङ्ग+च्वि+कृ+शतृ+ङीष्+ङि। ददर्श–दृश्+लिट्+ तिप्।

**विशेषः**– अत्र आसन्नवर्तिन्यामपि युद्धवेलायां यवनसेनापतेः अपजलखानस्य व्यसनसेवनं तदीयमपरीक्ष्यकारित्वं सूचयति। विविधफेन–फेनिल– क्षीरधिजलतलच्छविम्......... इत्यत्र लुप्तोपमा अलङ्कारः।

**सरलार्थः** – सानुगः तानरङ्गः क्रमेण प्रथमात् तृतीयं यावद् द्वाराणि अतिक्रम्य अपजलखानं ददर्श। स च तत्र कांश्चिद् मृदङ्गस्वरान् साधयतः, कांश्चिद् वीणावादनतत्परान्, कांश्चिद् वंशीवादनतत्परान्, कांश्चिद् वेषान् दधतः, कांश्चिच्च नूपुरं बध्नतः, कांश्चित् स्कन्धावलम्बिगुटिकातः करतालवाद्यं निस्सारयतः, कांश्चिच्च कर्णे दक्षिणकरं निधाय नेत्रे मीलयित्वा नासां वक्रीकृत्य, जानुनी भूमौ निधाय वामहस्तं प्रसार्य वीणारवेण स्वमन्दध्वनिं संयोजयतः जनान् अपश्यत्। अपजलखानस्य सम्मुखे पृष्ठतः पार्श्वतः च ताम्बूलवाहकाः निष्ठ्यूतादानभाजनाः सततचालितचामराः बद्धाञ्जलयो लालाटिकाश्चोपविष्टाः आसन्। सः (अपजलखानः) शिरसि रत्नजटितोष्णीषिकाम् शरीरे च सुवर्णसूत्रालंकृतं कञ्चुकं दधानः (सन्) अङ्के एव महोपधानं संस्थाप्य तदुपरि भुजद्वयं संस्थाप्य राजतशयनीये विविधफेनफेनिलस्य समुद्रजलतलस्य शोभाम् अनुकुर्वत्यां तूलिकायाम् विराजमान आसीत्।

**मूलम् – ततस्तु तानरङ्गप्रभा–वशीभूतेन सर्वेषु 'आगम्यता– मागम्यतामास्यतामास्यताम्' इति कथयत्सु, तानरङ्गोऽपि सादरं दक्षिण– हस्तेनाऽऽदरसूचकसङ्केतसहकारेण यथानिर्दिष्टस्थानमलञ्चकार।**

**ततस्तु इतरगायकेषु सगर्वं सासूयं सक्षोभं सचक्षुर्विस्फारणं सशिरःपरिवर्तनं च तमालोकयत्सु अपजलखानेन सह तस्यैवममभूदालापः।**

**अपजलखानः – किन्देशवास्तव्यो भवान्?**

**तानरङ्गः – श्रीमन्! राजपुत्रदेशीयोऽहमस्मि।**

**अपजल. – ओः! राजपुत्रदेशीयः?**

**तान. – आम्! श्रीमन्!**

**अप. – तत् कथमत्र महाराष्ट्रदेशे?**

**तान. – सेनापते! मम देशाटन–व्यसनं मां देशाद्देशं पर्याटयति।**

**अप. – आः! एवम्! तत्किं प्रायः पर्य्यटति भवान्?**

**तान. – एवं चमूपते! नव्यान् देशानवलोकयितुम, नवा नवा भाषा अवगन्तुम् नूतना नूतना गान–परिपाटीश्च कलयितुम् एधमानमहाभिलाष एष जनः।**

**अप. – अहो! ततस्तु बहुदर्शी बहुज्ञश्च भवान्। अथ बङ्गदेशे गतो भवान्? श्रूयतेऽतिवैलक्षण्यं तद्देशस्य।**

**प्रसङ्गः –** अत्र अपजलखानदर्शनानन्तरम् अपजलखानस्य तानरङ्गेण सह कृतो वार्ताक्रमः वर्ण्यते–

**व्याख्या –** ततः=तदनन्तरम्, तु, तानरङ्गप्रभावशीभूतेषु=तानरङ्गकान्ति– विस्मितेषु, सर्वेषु=निखिलेषु, 'आगम्यताम् आगम्यताम्=आगच्छतु आगच्छतु, आस्यताम् आस्यताम्=उपविश्यताम् उपविश्यताम्, इति कथयत्सु=वदत्सु, तानरङ्गोऽपि=गायकवेषो गौरसिंहोऽपि, सादरम्=आदरपूर्वकम्, दक्षिणहस्तेन= अपसव्यकरेण, आदरसूचकसङ्केतसहकारेण= सम्मानसूचकेङ्गितेन सह, यथानिर्दिष्टस्थानम्=संकेतितमासनम्, अलञ्चकार=अलंकृतवान्। ततः=तदनन्तरम्, तु, इतरगायकेषु= अन्यगानकर्मिषु सगर्वम्=साभिमानम्, सासूयम्=सेर्ष्यम्, सक्षोभम्=क्षोभपूर्वकम्, साक्षेपम्=आक्षेपपूर्वकम्, सचक्षुर्विस्फारणम्=भ्रूविक्षेपपुरस्सरम्, सशिरः परिवर्तनम्=मस्तक– सञ्चालनपूर्वकम् च, तम्=तानरङ्गम्, आलोकयत्सु=पश्यत्सु, अपजलखानेन, सह=सार्द्धम्, तस्य=तानरङ्गस्य, एवम्= इत्थम, आलापः=संलापः अभूत्। अपजलखानः–भवान्=त्वम्, किन्देशवास्तव्यः= कस्मिन् देशे निवसति?

तानरङ्गः–श्रीमन्!=प्रभो! राजपुत्रदेशीयः=राजपुत्रदेशवासी अस्मि।

अपजलखानः–ओ! राजपुत्रदेशीयः?=किं राजपुत्रदेशवासी त्वम्? तानरङ्ग–आम्! श्रीमन्!=आम्! प्रभो!, अपजलखानः, तत्=तस्मात् अत्र=इह, महाराष्ट्रदेशे=महाराष्ट्रप्रान्ते, कथम्=केन कारणेन आगतोऽसि। तानरङ्गः– सेनापते!=चमूनायके! मम=तानरङ्गस्य, देशाटनव्यसनम्= देशभ्रमणासक्तिः, माम्, देशाद्=एकस्मात् देशात्, देशम्=देशान्तरम्, पर्याटयति=भ्रमयति।

अपजलखानः – आः! एवम्!=आः। इत्थम्! तत्=तस्मात्, किम्, भवान्=त्वम्, प्रायः, पर्य्यटति=भ्रमति? तानरङ्गः – चमूपते! = सेनापते!, एवम्=इत्थमेवास्ति। नव्यान् देशान्=नवस्थलानि, आलोकयितुम्=द्रष्टुम्, नवाः नवाः=नूतनाः नूतनाः, भाषाः=वाणीः, अवगन्तुम्=बोद्धुम्, नूतनाः नूतनाः=अभिनवाः अभिनवाः गान परिपाटीः=गानरीतीः, च, कलयितुम्=ज्ञातुम्, एधमानमहाभिलाषः= वर्धमानोत्कटेच्छः, एष जनः=अयं तानरङ्गः (अस्ति)

अपजलखानः – अहो!=विस्मयसूचकं सम्बोधनम्, ततः=तस्मात्, तु, भवान्=त्वम्, बहुदर्शी=बहु द्रष्टा, बहुज्ञः=विज्ञः, च, (अस्ति)। अथ, भवान्, बङ्गदेशे=एतदाख्यदेशे, गतः=गतवान् (असि)? तद्देशस्य=बङ्ग देशस्य अतिवैलक्षण्यम्=अतिवैचित्र्यम्, श्रूयते=आकर्ण्यते।

**समासविग्रहाः –** तानरङ्गस्य प्रभा (ष.त.), तया वशीभूताः (तृ.त.), तेषु। निर्दिष्टमनतिक्रम्य यथानिर्दिष्टम् (अव्ययीभावः)। महांश्चासौ अभिलाषः, एधमानः महाभिलाषः यस्य सः (बहु.)। गर्वेण सहितं यथा स्यात् तथासगर्वम्।

**व्याकरणम् –** कथयत्सु – कथ्+णिच्+शतृ+सुप्। अलञ्चकार – अलम्+कृ+लिट् +तिप् (णल्)। पर्याटयति – परि+आङ्+अट्+णिच्+लट्+तिप्।

**विशेषः–** अत्र विस्मयारव्यो भावोऽभिव्यज्यते।

**सरलार्थः –** ततः तानरङ्गस्य प्रभया वशीभूताः सर्वे आगच्छतु आगच्छतु, उपविशतु उपविश्तु इति कथयन्ति, तानरङ्गोऽपि सादरं दक्षिणहस्तेन आदरं प्रकटयित्वा निर्दिष्टे आसने उपविशति। ततः इतरे गायकाः गर्वासूयादिपूर्वकं तं पश्यन्ति; तदा अपजलखानेन सह तस्य इत्थं वार्तालापोऽभूत्। अपजलखानः पृच्छति भवान् कुत्रत्यः? केन हेतुना चात्रागतोऽस्ति? इति। स च श्रीमन्। अहं राजपुत्रदेशवास्तव्योऽस्मि;

देशाद् देशभ्रमणव्यसनादत्र आगतोऽस्मि। स च पुनः पृच्छति किम् भवान् प्रायः परिभ्रमति? स च प्रतिवदति हे सेनापते! नव्यान् देशान् द्रष्टुम्, नवा भाषाः अवगन्तुम्, नूतना गानपरिपाटीश्च शिक्षितुं मदीयोऽभिलाषः अतितरां वृद्धिं गतोऽस्ति। तच्छ्रुत्वा अपजलखानः जिज्ञासते–तदा भवान् बहुदर्शी बहुज्ञश्चास्ति; किं कदाचित् बङ्गदेशे गतोऽस्ति? श्रूयते बङ्गदेशोऽतिविलक्षणोऽस्ति।

**मूलम् – तानरङ्गः–सेनापते! वर्षत्रयात् पूर्वमहं काश्यां गङ्गायां संस्नाय, उज्जयिनीदेशीयक्षत्रियकुलालंकृतम् भोजपुरदेशमालोक्य गङ्गागण्डक– तटोपविष्टम् हरिहरनाथं प्रणम्य, विलासि–कुल–विलसितम् पाटलिपुत्र– पुरमुल्लंघ्य सीताकुण्डविक्रमचण्डिकादिपीठपटलपूजितम् विक्रमयशःसूचकदुर्ग्गावशेषशोभितम् देवधुनीतरङ्गक्षालितप्रान्तं मुद्गलपुरं निरीक्ष्य, कर्णदुर्गस्थानेन तद्यशोमहामुद्रयेवाङ्कितमङ्गदेशं दिनत्रयमध्युष्य, अतिवर्द्धमान–वैभवं वर्द्धमान–नगरं च सम्यक् समालोक्य, यथोचितसम्भारैस्तारकेश्वरमुपस्थाय, ततोऽपि पूर्वं बङ्गदेशे, पूर्वबङ्गेऽपि च चिरमहमटाट्यामकार्षम्।**

**प्रसङ्गः –** अत्र अपजलखाननिर्देशानुसारं तानरङ्गः बङ्गदेशवर्णनाय उपक्रमते–

**व्याख्या –** तानरङ्गः, सेनापते=चमूपते! वर्षत्रयात् पूर्वम्=त्रीणि वर्षाणि पूर्वम्, अहम्=तानरङ्गः, काश्याम्=वाराणस्याम्, गङ्गायाम्=भागीरथ्याम्, संस्नाय=सम्यक् स्नात्वा, उज्जयिनीदेशीयक्षत्रियकुलालंकृतम्=उज्जयिनी– देशोद्भवक्षत्रियवंशशोभितम्, भोजपुरदेशम्=एतदाख्यदेशम्, आलोक्य= दृष्ट्वा, गङ्गागण्डकतटोपविष्टम्=एतदारव्यनद्योः तटे विराजमानम्, हरिहरनाथम्=एतदाख्यं महादेवम्, प्रणम्य=नत्वा, विलासिकुलविलसितम्=रसिकसमूहालङ्कृतम्, पाटलिपुत्रपुरम्=एतदाख्यं नगरम्, उल्लङ्घ्य=क्रान्त्वा, सीताकुण्डविक्रमचण्डिकादि– पीठपटलपूजितम्= एतदारव्यप्रसिद्धपीठसमूहार्चितम्, विक्रमयशःसूचकदुर्ग्गा– वशेषशोभितम्= विक्रमादित्यकीर्तिज्ञापकदुर्गावशेषलसितम्, देवधुनीतरङ्गक्षालित–प्रान्तम्= गङ्गावीचिधौतक्षेत्रम्, मुद्गलपुरम्=एतन्नामकं नगरम्, निरीक्ष्य= समवलोक्य, कर्णदुर्गस्थानेन=एतदारव्यदुर्गस्थानेन, तद्यशोमहामुद्रया= तत्कीर्तिमहामुद्रया, अङ्कितम्=शोभितम् इव, अङ्गदेशम्=कर्णशासितप्रदेशम्, दिनत्रयम्= त्रीणिदिनानि यावत्, अध्युष्य=उषित्वा, अतिवर्धमानवैभवम्= अधिकैधमानसम्पदम्, वर्द्धमाननगरम्=एतदाख्यं नगरम्, च, सम्यक् समालोक्य= सम्यग्निरीक्ष्य, यथोचितसम्भारैः=शास्त्रोचितसामग्रीभिः, तारकेश्वरम्=भगवन्तं शिवम्, उपस्थाय=सम्पूज्य, ततः अपि=तस्मादपि प्राक्, बङ्गदेशे=एतदाख्यदेशे, पूर्वबङ्गेऽपि=पूर्वबङ्गाल इति प्रसिद्धे देशे, च, चिरम्=बहुकालं यावत्, अहम्=तानरङ्गः, अटाट्याम्=भ्रमणम्, अकार्षम्= अकरवम्।

**समासविग्रहाः –** उज्जयिनीदेशीयानि च तानि क्षत्रियकूलानि उज्जयिनीदेशीयक्षत्रियकुलानि (कर्म.), तैः अलङ्कृतम् (तृ.त.)। विलासिनां कुलम् (ष.त.), तैः विलसितम् विलासिकुलविलसितम् (तृ.त.)। सीताकुण्डविक्रम– चण्डिकादिपीठानां पटलम्, तैः पूजितम् (तृ.त.)। दुर्ग्गाणामवशेषाः, दुर्ग्गावशेषाः, विक्रमस्य यशः, तस्य सूचकाः विक्रमयशःसूचकाः, ते च दुर्ग्गावशेषाः विक्रमयशःसूचकदुर्ग्गावशेषाः (कर्म.), तैः शोभितम् (तृ.त.)। दिनानां त्रयम् दिनत्रयम् (ष.त.)।

**व्याकरणम् –** प्रणम्य – प्र+नम्+क्त्वा > ल्यप्। संस्नाय – सम्+स्ना+क्त्वा > ल्यप्। अध्युष्य – अधि+वस्+क्त्वा > ल्यप्। अटाट्याम् – अटनम् अटाट्या (निपातनात्) +अम्।

**विशेषः –** 'तद्यशोमहामुद्रयेवाङ्कितम्' इत्यत्र उत्प्रेक्षारूपकयोः मिश्रणात् संसृष्टिः विद्यते। यवनसेनापतिशिविरेऽपि तानरङ्गस्य निर्भीकतापूर्वकं काशीगमनं गंगास्नानं चेति कथनात् तस्य धर्मानुरागो व्यज्यते।

**सरलार्थः –** तानरङ्गः कथयति – हे सेनापते! वर्षत्रयात् पूर्वम् अहं काश्यां गङ्गायां स्नात्वा, उज्जयिनीदेशीयक्षत्रियकुलैः शोभितं भोजपुरदेशं दृष्ट्वा, गङ्गागण्डकतटोपविष्टं भगवन्तं हरिहरनाथं प्रणम्य, विलासिजनैः शोभितं पाटलिपुत्रं नगरं तीर्त्वा, सीताकुण्ड–विक्रमचण्डिकादितीर्थैः पूजितं विक्रमादित्ययशःसूचकैः

दुर्गविशेषैः शोभितं गङ्गातरङ्गधौतक्षेत्रं मुद्गलपुरं दृष्टवा, कर्णदुर्गस्थानेन तद्यशोमहामुद्रया अङ्कितमिव अङ्गदेशं दिनत्रयम् उषित्वा अतिवैभवसम्पन्नं वर्द्धमाननगरं च सम्यग् आलोक्य समुचितसामग्रीभिः भगवन्तं तारकेश्वरं सम्पूज्य तस्मादपि पूर्वं बङ्गदेशे ततश्च पूर्वबङ्गदेशेऽपि भ्रमणं कृतवान्।

**मूलम् – अपजलखानः–किं कि पूर्वबङ्गेऽपि? तान.–आम् श्रीमन्। पूर्ववखमपि सम्यगवालुलोकदेष जनः, यत्र प्रान्तप्ररूढां पद्मावलीं परिमर्दयन्ती पद्मेव द्रवीभूता पयःपूरप्रवाहपरम्पराभिः पद्मा प्रवहति, यत्र ब्रह्मपुत्र इव शत्रुसेनानाशन–कुशलः ब्रह्मदेशं विभजन् ब्रह्मपुत्रो नाम नदी भूभागं क्षालयति, यत्र साम्ल–सुमधुररस–पूरितानि फूत्कारोद्धू तभूति–ज्वलदङ्गार–विजित्वर– वर्णानि जगत्प्रसिद्धानि नारङ्गाण्युद्भवन्ति, यद्देशीयानां जम्बीराणां रसालानां तालानां नारिकेलानां खर्जूराणां च महिमा सर्वदेश–रसज्ञानां साम्रेडं कर्णं स्पृशति, यत्र च भयङ्कराऽऽवर्त– सहस्राऽऽकुलासु स्रोतस्वतीषु सहोहोकारं क्षेपणीः क्षिपन्तः, अरित्रं चालयन्तः, बडिशं योजयन्तः, कुवेणीस्थ म्रियमाणमत्स्य–परीवर्त्तानालोकमालोकमानन्दतः, अदृष्टतटेष्वपि महाप्रवाहेषु स्वल्पया कूष्माण्डफक्किकाकारया नौकया भिन्नाञ्जनलिप्ता इव मसी–स्नाता इव साकारा अन्धकारा इव काला धीवरबालाः निर्भयाः क्रीडन्ति।**

**प्रसङ्गः –** अत्र अपजलखानजिज्ञासानुसारं तानरङ्गः पूर्वबङ्गप्रदेशं वर्णयति–

**व्याख्या –** अपजलखानः, (पृच्छति), किं किं किम्=प्रश्ने, पूर्वबङ्गेऽपि=पूर्वबङ्गालक्षेत्रऽपि गतोऽसीति शेषः? तानरङ्गः (कथयति) आम्= स्वीकृतिसूचकमव्ययम्, श्रीमन्=मान्यवर!, एषः जनः=अयं तानरङ्गः, पूर्वबङ्गालक्षेत्रम् अपि, सम्यक्=सुष्ठु, अवालुलोकत्=अद्राक्षीत्, यत्र=पूर्वबङ्गे, प्रान्तप्ररूढाम्= तटोपान्तसमुत्पन्नाम्, पद्मावलीम्=कमलपङ्क्तिम्, परिमर्दयन्ती=घर्षयन्ती, द्रवीभूता=द्रवत्वं प्राप्ता पद्मा=लक्ष्मीः, इव=यथा, पयःपूरप्रवाहपरम्पराभिः= जलप्लवरयश्रेणीभिः, पद्मा=एताख्या नदी प्रवहति=वहति, यत्र=पूर्वबङ्गे, शत्रुसेनानाशनकुशलः=रिपुचमूसंहारदक्षः, ब्रह्मपुत्रः=ब्रह्मणो मानसपुत्रः (अथवा गरलविशेषो वा)इव, ब्रह्मदेशम्=एतदाख्यं प्रदेशम्, विभजन्=विभक्तं कुर्वन्, ब्रह्मपुत्रो नाम नदः=बह्मपुत्र इत्याख्या नदी, भूभागम्=भूमिक्षेत्रम्, क्षालयति=सिञ्चति, यत्र=पूर्वबङ्गदेशे, साम्लसुमधुररसपूरितनि=साम्लसुस्वादुरसभरितानि, फूत्कारोद्धूतभूतिज्वलदङ्गारविजित्वर–वर्णानि=मुखवायुदूरीकृतभस्मज्वल– दङ्गारविजयशील–वर्णानि, जगत्प्रसिद्धानि=लोकख्यातानि, नारङ्गाणि= नागरङ्गफलानि, उद्भवन्ति= जायन्ते, यद्देशीयानाम्= बङ्गप्रदेशीयानाम्, जम्बीराणाम्=निम्बुकानाम्, रसालानाम्=आम्राणाम्, तालानाम्=तलानाम्, नारिकेलानाम्=नालिकेराणाम्, खर्जूराणाम्=पिञ्जराणाम् च, महिमा=प्रसिद्धिः, सर्वदेशरसज्ञानाम्= अशेषदेशरसिकानाम्, साम्रेडम्=वारं वारम्, कर्णम्=श्रोत्रम्, स्पृशति=प्राप्नोति, यत्र=बङ्गदेशे, च, भयङ्करावर्तसहस्राऽऽकुलासु= भयावह– पयोभ्रमसहस्रव्याप्तासु, स्रोतस्वतीषु=नदीषु, सहोहोकारम्='हो हो' इति ध्वनिना सहितम्, क्षेपणीः =नौदण्डान्, क्षिपन्तः=पातयन्तः, अरित्रम्=कोटिपात्रम्, चालयन्तः=वाहयन्तः, बडिशम्=मत्स्यवेधनम्, योजयन्तः=सज्जीकुर्वन्तः, कुवेणीस्थ म्रियमाणमत्स्यपरीवर्त्तान्= मत्स्यबन्धनीस्थासन्नमृत्युमत्स्यपरिभ्रमान्, आलोकम् आलोकम्=दर्शं दर्शम्, आनन्दन्तः=प्रसीदन्तः, अदृष्टतटेषु=अदृष्टकूलेषु, महाप्रवाहेषु=बृहद्धारासु, अपि, स्वल्पया=क्षुद्रया, कूष्माण्डफक्किकाकारया= कर्कारुभागस्वरूपया, नौकया=नावा, भिन्नाञ्जनलिप्ताः=पिष्टकज्जलच्छुरिताः, इव मसीस्नाता=मषीकृताभिषेकाः, इव, साकाराः=धृतशरीराः, अन्धकाराः=तमांसि, इव, कालाः=कृष्णाः, धीवरबालाः=दाशपुत्राः, निर्भयाः=भयरहिताः, क्रीडन्ति=खेलन्ति।

**समासविग्रहाः –** पयसां पूरः, तस्य प्रवाहः, तेषां परम्परा, पयःपूरप्रवाहपरम्परा (ष.त.), ताभिः। शत्रूणां सेना, तस्याः नाशनम् (ष.त.), तस्मिन् कुशलः (स.त.)। ज्वलन्तश्च ते अङ्गाराः ज्वलदङ्गाराः (कर्म.) फूत्कारेण उद्धूता भूतिः येषांते, फूत्कारोद्धूतभूतयः (बहु.) ते च ज्वलदङ्गाराः फूत्कारोद्धूतभूतिज्वलदङ्गाराः

(कर्म.), तेषां विजित्वराः वर्णाः येषां तानि (बहु.)। भयं करोतीति भयंकरः (उपपदत.), भयंकराश्च ते आवर्त्ताः (कर्म.), तेषां सहस्राणि, तैः आकुलाः, तासु। कुवेण्यां तिष्ठन्ति इति कुवेणीस्थाः (उपपदत.), म्रियमाणाश्च ते मत्स्याः म्रियमाणमत्स्याः (कर्म) कुवेणीस्थाश्च ते म्रियमाणमत्स्याः कुवेणीस्थम्रियमाणमत्स्याः (कर्म.), तेषां परीवर्त्ताः, तान्। कूष्माण्डस्य फक्किका, तस्याः आकार इव आकारः यस्याःसा (बहु.)। भिन्नञ्च तदञ्जनम्, तेन लिप्ताः भिन्नाञ्जनलिप्ताः।

**व्याकरणम् –** अवालुलोकत् – अव+लोक्+लुङ्+तिप्। परिमर्दयन्ती – परि+मृद्+णिच्+शतृ+ङीप्। उद्धूत – उद्+धूञ्+क्त। स्रोतस्वतीषु – स्रोतस्+मतुप्+ङीप्+सुप्। क्षिपन्तः – क्षिप्+शतृ+जस्।

**विशेषः –** 'पद्मेव द्रवीभूता' इत्यत्र उत्प्रेक्षालंकारः, "ब्रह्मपुत्र इव" इत्यत्र उपमा, कूष्माण्डफक्किकाकारया नौकया" इत्यत्र वाचकलुप्तोपमा, भिन्नाञ्जनलिप्ता इव, मसीस्नाता इव, साकारा अन्धकारा इव च मालोत्प्रेक्षा विद्यते।

**सरलार्थः –** अपजाल खानः पृच्छति – किं भवान् पूर्वबङ्गप्रदेशमपि गतोऽस्ति। तदा तानरङ्गः आह–श्रीमन्! अयं तानरङ्गः पूर्वबङ्गप्रदेशमपि सम्यग् अद्राक्षीत्, यत्र तटोत्पन्नकमलपङ्क्तिं परिमर्दयन्ती द्रवीभूता पद्मा इव जल प्रवाहपूर्णा पद्मा नदी वहति, यत्र शत्रुसेनासंहारदक्षः ब्रह्मपुत्र इव ब्रह्मदेशं विभक्तीकुर्वन् ब्रह्मपुत्रो नाम महानदः भूभागं सिञ्चति, यत्र च दीप्ताङ्गारादपि दीप्तवर्णानि साम्लस्वादुरसभरितानि नारङ्गाणि उद्भवन्ति यत्रत्यानां जम्बीराणां रसालानां तालानां नारिकेलानां, खर्जूराणां च महिमा सर्वदेशरसिकानां पौनः पुन्येन श्रुतिपथमुपगच्छति। यत्र भयङ्करजलभ्रमपूर्णासु नदीषु नौदण्डान् पातयन्तः, अरित्रं चालयन्तः, मत्स्यवेधनम् सज्जीकुर्वन्तः, मत्स्यबन्धनीस्थासन्नमृत्युमत्स्यपरिभ्रमान् दर्शं दर्शम् आनन्दमनुभवन्तः, अदृष्टतटेषु महाप्रवाहेष्वपि कूष्माण्डफक्किकाकारया नौकया चूर्णितकज्जलेन संलिप्ताः इव, मस्या स्नाता इव, शरीरध ाारिण अन्धकारा इव कृष्णवर्णाः धीवरपुत्राः निर्भयाः (सन्त) क्रीडन्ति।

**मूलम् – अपजलखानः – (स्वयं हसन् सर्वांश्च हसतः पश्यन्) सत्यं सत्यम्! धन्यो भवान्, योऽल्पेनैव वयसैवं विदेश–भ्रमणैः चातुरीं कलयति।**

**तानरंगः – धन्य एव यदि युष्मादृशैरभिनन्द्ये!**

**अपजलखांः – (क्षणानन्तरम्) अथ भवान् मूर्छना–प्रधानं गायति, तानप्रधानं वा?**

**तानरंगः – ईदृक्षं तादृक्षञ्च।**

**अपजलखाँः – (क्षणानन्तरम्) अस्तु, आलप्यतां कश्चन रागः।**

**तानरंगः – (किञ्चिद् विचार्य) आज्ञा चेदेकां राग–माला–गीतिं गायामि, यत्र प्रत्याभोगं नवीन एव रागो भवेदेकेनैव च ध्रुवेण सङ्गच्छेत, तत्तद्राग–नामानि च तत्रैव प्राप्येरन्।**

**अपजलखानः – आः! किमेवम्? इदृशं तु गानं न प्रायः श्रूयते, तद्गीयताम्।**

**प्रसङ्गः –** अत्र कविः अपजलखान–तानरङ्गयोः वार्तालापं वर्णयति–

**व्याख्या–** अपजलखानः – (स्वयं हसन्, =अपजलखानः स्वयं हासं कुर्वन्, सर्वान्= अन्यान् निखिलान्, हसतः=हासं कुर्वतः, पश्यन्=अवलोकयन्) सत्यम् सत्यम्= अवितथम् अवितथम्! भवान्=त्वम्, धन्यः=धन्यवादयोग्यः (अस्ति), यः=भवान्, अल्पेन एव=अल्पकालिकेन एव, वयसा=आयुषा, एवम्=इत्थम्, विदेशभ्रमणैः=नानादेशपर्यटनैः, चातुरीम्=दक्षताम्, कलयति=धारयति। तानरंगः, यदि=चेत्, युष्मादृशैः=भवादृशैः, अभिनन्द्ये=सत्कृतो भवेयम्, (तदा) धन्य एव=प्रशंसनीय एव (अस्मि)। अपजलखानः – (क्षणानन्तरम्=किञ्चित्कालानन्तरम्) अथ, भवान्=त्वम्, मूर्च्छनाप्रधानम्=आरोहावरोहक्रमयुतं स्वरप्रधानम्, गायति=गानंकरोति, वा=अथवा, तानप्रधानम्=आरोहक्रमप्रधानम्। तानरंगः– ईदृक्षम्=एतादृशम्, तादृक्षम्=तत्सदृशम् (अर्थात् उभयविधम्) च। अपजलखानः– (क्षणानन्तरम्=किञ्चित्कालानन्तरम्) अस्तु=सम्यक्, कश्चन=कोऽपि, रागः=रञ्जकस्वरसमूहः, आलप्यताम्=गीयताम्। तानरंगः – (किञ्चिद् =

ईषद्, विचार्य=चिन्तयित्वा) चेद्=यदि, आज्ञा=अनुमतिः (भवेत्) (तदा) एकाम्, रागमालागीतिम्=एतदाख्यां गीतिकाम्, गायामि=श्रावयामि, यत्र=रागमालागीत्याम्, प्रत्याभोगम्=प्रतिखण्डम्, नवीन एव=नव्य एव, रागः=रञ्जकस्वरसन्दर्भः, भवेत्=स्यात्, एकेनैव=एकलेनैव, ध्रुवेण=स्थिर स्वरेण, सङ्गच्छेत्=सङ्गतं भवेत्, तत्तद्रागनामानि= तत्तद्रञ्जकस्वरसन्दर्भाभि– धानानि, च, तत्रैव=तस्मिन्नेव रागे, प्राप्येरन्=लभेरन्। अपजलखानः – आः!=प्रसन्नता–सूचकम्, किम् एवम्=किम् इत्थमस्ति! ईदृशम्=एतादृशं, तु, गानम्=गीतम्, प्रायः=बहुधा, न=नैव, श्रूयते=आकर्ण्यते, तत्=तस्मात्, गीयताम्=श्रूयताम्।

**समासविग्रहाः –** तानं प्रधानं यस्मिन् तत् तानप्रधानम् (बहु.)। मूर्च्छना प्रधानं यस्मिन् तत् मूर्च्छनाप्रधानम् (बहु.)। आभोगम् आभोगं प्रति प्रत्याभोगम् (अव्ययीभावः)। इदमिव दृश्यते इति ईदृक्षम्। तदिव दृश्यते तादृक्षम् (समासाश्रयविधिः)।

**विशेषः –** अत्र तानरङ्गस्य गानविषयिणी सूक्ष्मेक्षिका द्योत्यते।

**सरलार्थः –** अपजलखानः – (स्वयं हसन् अन्यान् च जनान् हसतः पश्यन्) सत्यम्, भवान् ध न्योऽस्ति, यः अल्पीयसा एव वयसा एवं देशदेशान्तरभ्रमणेन कौशलं प्राप्नोत्। तानरङ्गः अवदत् – यदि भवादृशैः प्रशंसितो भवेयम् चेत्तदा अवश्यमेव अहं धन्योऽस्मि। किञ्चित्कालानन्तरम् अपजलखानः अवदत् – भवान् मूर्च्छनाप्रधानं गायति अथवा तानप्रधानम्। तानरङ्ग प्रत्यवदत् – उभयविधं गायामि। तदा अपजलखानः पुनः किञ्चित्कालानन्तरमवदत् – अस्तु। तदा कमपि रागं गायतु। तदा तानरङ्गः किञ्चिद् विचिन्त्य अवदत् – यदि श्रीमताम् अनुमतिः स्यात्तदा एकां रागमालागीतिं श्रावयामि, यस्याः प्रत्येकं खण्डे एको नूतन एव रागो भविष्यति, यश्च एकेनैव ध्रुवेण सङ्गत भविष्यति, तेषाम् सर्वेषां रागाणां नामानि अपि तत्रैव प्राप्तानि भविष्यन्ति। (तच्छ्रुत्वा) अपजलखानः – साधु, एवम् अस्ति। नेदं प्रायः श्रूयते, तद् गीयताम्।

**मूलम् – ततस्तानपूरिकायाः स्वरान् संमेल्य पातित–वामजानुः तानपूरिकातुम्बं क्रोडे निधाय दक्षपादस्योत्थितजानुनि च दक्ष–हस्त–कर्पूर– स्थापन–पूरःसरं तेनैव हस्तेन तर्जन्यङ्गुल्या तानपूरिकां रणयन् स्वकण्ठेनापि त्रीन् ग्रामान् सप्तस्वरांश्च समधात्।**

**प्रसङ्गः –** अत्र गानतत्परं तानरङ्गं वर्णयति

**व्याख्याः –** ततः=तदनन्तरम्, तानपूरिकायाः=वाद्यविशेषस्य, स्वरान्=निषादादीन्, संमेल्य=संयोज्य, पातितवामजानुः=भूसंस्थापितसव्यजानुः, तानपूरिकातुम्बम्=तानपूरिकाप्रवालम्, क्रोडे=अङ्के, निधाय=स्थापयित्वा, दक्षपादस्य=अपसव्यचरणस्य, उत्थितजानुनि=उद्गतजानुनि, च, दक्षहस्त– कर्पूरस्थापन–पुरःसरम् =दक्षिणकरकफोणिसंस्थापनसहितम्, तेन एव हस्तेन=तेनैव करेण, तर्जन्यङ्गुल्या= प्रदेशिनीकरशाखया, तानपूरिकाम्= वाद्यविशेषम्, रणयन्=वादयन्, स्वकण्ठेन=निजोच्चारणेन, अपि, त्रीन्ग्रामान्=त्रीन् स्वरसंदोहान्, सप्तस्वरान्=षड्जादिसप्तस्वरान्, समधात्=संयोजितवान्।

**समासविग्रहौः –** पातितं वामजानु येन सः पातितवामजानु (बहु.) उत्थितं च तद् जानु उत्थितजानु (कर्म.) तस्मिन्।

**व्याकरणम् –** संमेल्य – सम्+मिल्+णिच्+क्त्वा > ल्यप्। निधाय – नि+धा+क्त्वा+ल्यप्। समधात् – सम्+धा+लुङ्+तिप्।

**विशेषः –** संगीतशास्त्रे सप्तस्वराः, त्रयोग्रामाः एकविशंतिर्मूर्च्छना ऊनपञ्चाशत्तानाः द्वाविंशतिश्चश्रुतयो भवन्ति। संगीतरत्नाकरे स्वरादीनाम् लक्षणानि– श्रुत्यनन्तरभावो यः स्निग्धोऽनुरणनात्मकः। स्वरः रञ्जयति श्रोतुश्चित्तं स स्वर उच्यते।। श्रुतिभ्यः स्युः स्वराः षड्जर्षभगान्धारमध्यमाः। पञ्चमोधैवताश्चाथ निषाद इति सप्त ते।। यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि। तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते।। षड्जग्रामो भवेदादौ मध्यमग्राम एव च। गान्धारग्राम इत्येतद् ग्रामत्रयमुदाहृतम्।।

**सरलार्थः –** तदनन्तरं तानपूरिकायाः स्वरान् मेलयित्वा, वामं जानु भूमौ संस्थाप्य, तानपूरिकायाः

तुम्बं क्रोडे निधाय दक्षिणपादस्य उत्थिते जानुनि दक्षिणकरस्य कफोणिं संस्थाप्य तस्यैव हस्तस्य तर्जन्या अङ्गुल्या तानपूरिकां वादयन् स्वकण्ठेन अपि त्रीन् ग्रामान् सप्त स्वरान् च समयोजयत्।

**मूलम् – तन्मात्रश्रवणेनैव मुग्धेष्विवाऽखिलेषु इमां रागमाला–गीतिमगायत्–**

**सखि हे नन्द–तनय आगच्छति ।।सखि.।।**
**मन्दं मन्दं मुरली–रणनैः समधिक–सुखं प्रयच्छति।।**
**भैरव–रूपः पापिजनानां सतां सुख–करो देवः।**
**कलित–ललित–मालती–मालिकः सुरवरवाञ्छित–सेवः।।**
**सारङ्गैः सारङ्ग–सुन्दरो दृग्भिर्निपीयमानः।**
**चपला–चपल–चमत्कृति–वसनो विहित–मनोहर–गानः।।**
**श्रीवत्सेन लाञ्छितो हृदये श्रीलः श्रीदः श्रीशः।**
**सर्व–श्रीभिर्युतः श्रीपतिः श्रीमोहनो गवीशः।।**
**गौरी–पतिना सदा भावितो बर्हिण–बर्ह–किरीटः।**
**कनककशिपु–कदनो बलिमथनो विहत–दशानन–कीटः।।**

**प्रसङ्गः–** अत्र स्वरान् साधयन् तानरङ्गः रागमालागीतिं गायति –

**व्याख्या –** तन्मात्रश्रवणेन=एतावदाकर्णनेन, एव, अखिलेषु=सर्वेषु, मुग्धेषु=प्रसन्नेषु, इव, (सत्सु), इमाम्=एताम्, रागमालागीतिम्=रागमालगानम्, अगायत्= गीतवान्हे सखि=हेआलि! नन्दतनयः=नन्दनन्दनः (कृष्णाः) आगच्छति= आयाति। (यश्च) मन्दं मन्दम्=शनैः शनैः, मुरलीरणनैः= वंशीवादनैः, समधिकसुखम्=अत्यानन्दम्, प्रयच्छति=ददाति। पापिजनानाम्=दुर्जनानाम्, भैरवरूपः=भीषणः, (च) सताम्=सज्जनानाम्, सुखकरः=आनन्दयिता, देवः=देवता (अस्ति)। कलितललितमालतीमालिकः= धृतरम्यमालतीमालः, सुरवरवाञ्छितसेवः= देवश्रेष्ठाभिलषितसेवः (अस्ति)। सारङ्गसुन्दरः= कामदेवसमः (कृष्णः), सारङ्गैः=हरिणैः दृग्भिः=नेत्रैः, निपीयमानः=सानुरागं दृश्यमानः अस्ति। चपलाचपलचमत्कृतिवसनः= तडिच्चञ्चलचाकचिक्यपूर्णवस्त्रः, विहितमनोहरगानः=कृतरम्यगानः। हृदये=हृदि, श्रीवत्सेन=भृगुपदेन, लाञ्छितः=चिह्नितः, श्रीलः=श्रीमान्, श्रीदः=लक्ष्मीदायकः, श्रीशः=लक्ष्मीपतिः। सर्वश्रीभिः=निखिलशोभाभिः, युतः=शोभितः, श्रीपति= रमापतिः, श्रीमोहनः=लक्ष्मीरमणः, गवीशः=वेदवाणीशः, गौरीपतिना=भगवता शिवेन, सदा=सर्वदा, भावितः=सेवितः, बर्हिणबर्हकिरीटः=मयूरपिच्छमुकुटः, कनक– कशिपुकदनः= हिरण्यकशिपुनाशकः, बलिमथनः=बलिविध्वंसी, विहतदशाननकीटः= मारितरावणकीटः (नन्दतनय आगच्छति इति पूर्वेण अन्वयः)।

**समासविग्रहाः–** नन्दस्य तनयः नन्दतनयः (ष.त.)। ललिता चासौ मालतीमालिका ललितमालतीमालिका (कर्म.) कलिता मालतीमालिका येन सः (बहु.)। सुरवरैः वाञ्छिता सेवा यस्य सः सुखरवाञ्छितसेवः (बहु.)। सारङ्गः इव सुन्दरः सारङ्गसुन्दरः (कर्म.)। श्रियं ददातीति श्रीदः (उपपदतत्पु)। श्रियं मोहयति इति श्रीमोहनः (उपपदतत्पु.)। बर्हिणस्य बर्हः बर्हिणबर्हः (ष.त), तदेव किरीटो यस्य सः बर्हिणबर्हकिरीटः (बहु.)। गवाम् ईशः गवीशः (ष.त.)। दशानन एव कीट (कर्म.) विहतः दशाननकीटः येन सः विहतदशाननकीटः (बहु.)।

**व्याकरणम् –** मुग्धेषु– मुह्+क्त+सुप्। प्रयच्छति – प्र+दाण् > यच्छ्+लट्+तिप्। निपीयमानः – नि+पीङ्पाने+यक्+शानच्+सु।

**विशेषः –** अत्र कवेः नन्दनन्दनविषयिणी रतिरभिव्यज्यते। प्रकारान्तरेणात्र भैरवादि विविधारागाणामुल्लेखोऽत्र विद्यते। 'मन्दं.......रणनैः.' इत्यत्र च रूपकं बोध्यम्।

**सरलार्थ –** एतावता श्रवणेन एव मुग्धेषु तेषु वक्ष्यमाणामिमां रागमालागीतिम् अगायत्–

हे सखि! नन्दनन्दनः समागच्छति। यः मन्दं मन्दं वंशीस्वरेण अत्यधिकम् आनन्दयति। (यः)

दुर्जनानां संहारकः सज्जनानाञ्च सुखदोऽस्ति। रमणीय– मालतीमालया युक्तोऽस्ति। देवा अपि अस्य सेवायै उत्कण्ठिताः तिष्ठन्ति। कामदेवच्छविरयं मृगैः सानुरागं वीक्ष्यमाणोऽस्ति (यद्वा तदाक्षिप्तमृगनयनी–भिर्गोपीकाभिः सानुरागं वीक्ष्यमाणोऽस्ति)। विद्युद्वच्चञ्चलचमत्कृतिवसनः मनोहरगानरतश्चास्ति। हृदये श्रीवत्सेन चिह्नितोऽयं श्रीसम्पन्नः श्रीप्रदायकः श्रियः ईशः सर्वशोभासम्पन्नः श्रीपतिः श्रीमोहनः वेदवाचाम् इन्द्रियाणां धेनूनाञ्च स्वामी अस्ति। अयमेव भगवता शिवेन सेवितः, मयूरपिच्छमुकुटस्य धर्ता, हिरण्यकशिपोः संहर्त्ता, बलिविध्वंसी, दशाननरूपिणः कीटस्य च संहारकोऽस्ति।

**मूलम् – अथ एतावदेव श्रुत्वा अतितरां प्रसन्नेषु पारिषदेषु, ससाधुवादं वितीर्णकङ्कणे च अपजलखाने, तानरङ्गोऽपि सप्रसादं तानपूरिकां भूमौ संस्थाप्य अपजलखानस्य गुणग्राहितां प्रशंशस। अथ अपजलखानः क्रमशो मैरेय–मद–परवशतां वहन् उवाच–यत्कथ्यतामस्मिन् प्रान्ते भवादृशानां गुण–ग्राहकाः के सन्ति? के वा कवितायाः संगीतस्य च मर्माऽवगच्छन्ति?**

**प्रसङ्गः** – अत्र कविः तानरङ्गेण प्रस्तुतां गीतिकां श्रुत्वा प्रसन्नस्य अपजलखानस्य तस्मै स्वर्णकङ्कणदानं वर्णयति –

**व्याख्याः** – अथ=अनन्तरम्, एतावदेव=इयदेव, श्रुत्वा=आकर्ण्य, अतितराम्=अत्यन्तम्, प्रसन्नेषु= सन्तुष्टेषु (सत्सु) ससाधुवादम्=सधन्यवादम्, वितीर्णकङ्कणे= दत्तसुवर्णकटके, च, अपजलखाने=यवनसेनानायके, (सति) तानरङ्गः=गायकः, अपि, सप्रसादम्=प्रसन्नतापूर्वकम्, तानपूरिकाम्=निजवाद्यम्, भूमौ=पृथिव्याम्, संस्थाप्य=स्थापयित्वा, अपजलखानस्य, गुणग्राहिताम्=गुणज्ञताम्, प्रशशंस=प्राशंसत्।

अथ=अनन्तरम्, अपजलखानः, क्रमशः=क्रमेण, मैरेय–मद– परवशताम्= मदिरामदाधीनताम्, वहन्=ध ारयन्, उवाच=जगाद–यत्, कथ्यताम्= उच्यताम्, अस्मिन् प्रान्ते=महाराष्ट्रदेशे, भवादृशानाम्= त्वादृशानाम्, गुणग्राहकाः= गुणानुरागिणः, के=के जनाः, सन्ति=विद्यन्ते? वा=अथवा, के, कवितायाः=काव्यस्य, संगीतस्य, च मर्म=रहस्यम्, अवगच्छन्ति= जानन्ति।

**समासविग्रहाः** – मैरेयस्य मदः, तस्य परवशः (ष.त.) तस्य भावः, ताम्। वितीर्णं कङ्कणं येन सः वितीर्णकङ्कणः (बहु.) तस्मिन्। साधुवादेन सहितम् ससाधुवादम् (तुल्ययोग बहु.)।

**व्याकरणम्** – संस्थाप्य–सम्+स्था+णिच्+क्त्वा > ल्यप्। प्रशशंस– प्र+शंस्+लिट्+तिप्।

**सरलार्थः** – ततः तानरङ्गस्य गीतिं श्रुत्वा अत्यन्तं प्रसन्नेषु पार्षदेषु अपजलखानः साधुवादपुरस्सरं तस्मै सुवर्णकङ्कणं प्रयच्छति, तानरङ्गोऽपि प्रसन्नतापूर्वकं तानपूरिकां भूमौ निधाय अपजलखानस्य गुणज्ञतां प्रशंसति स्म। ततः अपजलखानः क्रमेण मदिरामदपरवशः सन् अवादीत्, वदतु, अस्मिन् प्रान्ते भवादृशानां जनानां गुणग्राहकाः के जनाः सन्ति? के वा कवितायाः सङ्गीतस्य वा रहस्यं जानन्ति? इति।

**मूलम् – ततस्तानरङ्गोऽचकथत्–को नामापरः शिववीरात् ? स एव राजनीतौ निष्णातः, स एव सैन्धवाऽऽरोह–विद्या–सिन्धुः, स एव चन्द्रहासचालने चतुरः, स एव मल्ल–विद्या–मर्मज्ञः, स एव बाण–विद्या–वारिधिः, स एव पण्डित–मण्डल–मण्डनः, स एव धैर्य–धारि–धौरेयः, स एव वीरवारवरः, स एव पुरुष–पौरुष–परीक्षकः, स एव दीन–दुःख–दावदहनः, स एव स्वधर्मरक्षण–रक्षणः, स एव विलक्षण–विचक्षणः, स एव च मादृशगुणिगण–गुण– ग्रहणाऽऽग्रही वर्तते।**

**अथ अपजलखानैं"तत् किं शिव एष एवं गुण–गण–विशिष्टोऽस्ति? एवं वा वीर–वरोऽस्ति ?" इति सचकितं सभयं सतर्कं सरोमोद्गमं च कथयति, किञ्चिद् विचार्यैव नीति–कौशल–पुरःसरं गौरः पुनरवादीत्।**

**प्रसङ्गः** – अत्र तानरङ्गः शिववीरस्य गुणज्ञतां प्रशंसति–

**व्याख्या** – ततः=तदनन्तरम्, तानरङ्गः=गायकः, अचकथत्=अवादीत्, –शिववीरात्= शिवराजात्, अपरः=अन्यः, को नाम=कोऽस्ति? न कोऽपीत्यर्थः। स एव= शिववीर एव, राजनीतौ=नृपनये, निष्णातः=कुशलः,

स एव, सैन्धवारोहविद्या सिन्धुः=अश्वारोहणकलासमुद्रः, स एव, चन्द्रहासचालने= खड्गसंचालने, चतुरः=निपुणः, स एव, मल्लविद्यामर्मज्ञः=विद्याविशेषाभिज्ञः, स एव, बाणविद्या– वारिधिः= धनुर्विद्यासमुद्रः, स एव, पण्डित–मण्डलमण्डन= विद्वज्जनालंकारः, स एव, धैर्यधारिधौरेयः=धीरधुरन्धरः, स एव, वीरवारवरः= शूरगणश्रेष्ठः, स एव, पुरुषपौरुषपरीक्षकः=पुरुषशक्तिनिकषोपलः, स एव, दीनदुःखदावदहनः= आर्तजनपीडादावानलः, स एव, स्वधर्मरक्षणसक्षणः=निजधर्मावनसमुत्सुकः, स एव, विलक्षण–विचक्षणः=अद्भुतविद्वान्, स एव, च, मादृशगुणिगणगुणग्रहणाग्रही= मत्सदृशगुणिसमूहगुणग्रहणाग्रहपरः, वर्तते= अस्ति।

अथ=अनन्तरम्, अपजलखाने," तत् किंम्=तर्हिकिम्, शिव एव= शिवराज एव, एवम्= इत्थम्, गुणगणविशिष्टः=गुणसमूहसुशोभितः, अस्ति? वा=अथवा, एवम्=इत्थम्, वीरवरः=शूरश्रेष्ठः, अस्ति?'' इति सचकितम्= साश्चर्यम्, सभयम्=भयपूर्वकम्, सतर्कम्=तर्कपूर्वकम्, सरोमोद्गमम्= सरोमाञ्चम्, च, कथयति=वदति (सति), किञ्चित्= किमपि, विचार्य एव= विचिन्त्य एव, नीतिकौशलपुरःसरम्= नयचातुर्यपूर्वकम्, गौरः=गौरसिंहः, पुनः=भूयः, अवादीत्= अगादीत्।

**समासविग्रहाः** – सैन्धवस्य आरोहणम्, सैन्धवारोहणम्, तस्य विद्या, सैन्धवारोहणविद्या तस्याः सिन्धुः (ष.त.) मर्म जानातीति मर्मज्ञः, मल्लविद्यायाः मर्मज्ञः, मल्लविद्यामर्मज्ञः (ष.त.)। धैर्यं धारयन्तीति धैर्यधारिणः (उपपदतत्पु.) तेषु धौरेयः धैर्यधारिधौरेयः (स.त.)। पुरुषाणां पौरुषः, तस्य परीक्षकः पुरुषपौरुषपरीक्षकः (ष.त.)। दीनानां दुःखं दीनदुःखम् (ष.त.), तदेव, दावः (कर्म.) तस्य दहनः दीनदुःखदावदहनः (ष.त.)। स्वस्य धर्मः स्वधर्मः, तस्य रक्षणम्, स्वधर्मरक्षणम् तस्मिन् सक्षणः स्वधर्मरक्षणसक्षणः (ष.त.)। मादृशाश्च ते गुणिनः मादृशगुणिनः (कर्म.) तेषां गणः, तस्य गुणाः, तेषां ग्रहणम् मादृशगुणिगणगुणग्रहणम्, (ष.त.), तस्मिन् आग्रही (स.त.)।

**व्याकरणम्** – निष्णातः–नि+ष्णा+क्त+सु। सैन्धव–सिन्धु+अण्। धौरेय– धुर्+ढक् (एय)+सु। दहनः–दह्+ल्यु (अन)+सु।

**विशेषः** – अत्र शिववीरे सिंध्वादेः आरोपाद् रूपकम्, एकस्यैव शिववीरस्य च बहुधोल्लेखाद् उल्लेखालंकारोऽप्यस्ति। अनुप्रासच्छटा सर्वत्रैव दर्शनीया वर्तते। 'किञ्चिद् विचार्येव' इत्यत्रोत्प्रेक्षा द्रष्टव्याऽस्ति।

**सरलार्थः** – ततस्तानरङ्गः अवदत्–शिववीरं विहाय एतादृशः कोऽस्ति? न कोऽपीत्यर्थः। स एव राजनीतौ कुशलः, अश्वारोहणविद्यायां दक्षः, खड्गचालने चतुरः, मल्लविद्यायाः रहस्यवित्, धनुर्विद्यायाः समुद्रः, विदुषां भूषणः, शूराणां श्रेष्ठः पुरुषाणां पौरुषस्य निकषः, दीनानां दुःखरूपिणो विपिनस्य दावाग्निः, स्वधर्मरक्षणे सोत्साहः, विशिष्टो विद्वान्, मादृशानां गुणिनां गुणेषु आग्रहवान् चास्ति।

ततः अपजलखानः – "तर्हि किमयं शिववीरः एवंविधगुणोपेतः एतावान् वीरश्चास्ति?" इति साश्चर्यं सभयं सानुमानं सरोमाञ्चं च पृच्छति, ततः किञ्चिद् विचिन्त्य इव नीतिकौशलपुरःसरं गौरसिंहः (तानरङ्गः) पुनः अवदत्।

**मूलम् – भगवन् ! सामान्य–राजभृत्यस्य पुत्रः शिववीरो यदि नाम नाऽभविष्यत् स्वयमीदृश ऊर्जस्वलः, तत्कथं स्वर्णदेव–सदृशं सहचरं प्राप्स्यत्? तद्–द्वारा समस्तं कल्याण–प्रदेशं कल्याणदुर्गं च स्वहस्तगतमकरिष्यत्? कथं तोरण–दुर्ग–भोग–भाजनतामकलयिष्यत्? कथं तोरण–दुर्गाद् दक्षिण–पूर्वस्यां पर्वतस्य शिखरे महेन्द्र–मन्दिर–खण्डमिव धर्षितारि–वर्गं–डमरु–हुडुक्कारतोषितभर्गं रायगढनामकं महादुर्गं व्यरचयिष्यत्? कथं वा तपनीय–भित्तिका–जटित– महारत्न–किरणावली–वितन्यमान–महावितान वितति–विरोचित–प्रताप–तापित– परिपन्थि–निवहं चन्द्रचुम्बन–चतुर–चारु–शिखर–निकरं भुशुण्डिका–किणाङ्कित– प्रचण्ड–भुजदण्ड–रक्षककुल–विधीयमान–परस्सहस्रपरिक्रमं धमद्धमद्दोधूयमानाऽनेक– ध्वज–पटल–निर्मथितमहाकाशं प्रताप–दुर्गं निरमापयिष्यत्? कथं वा 'आगत एष शिववीरः' – इति भ्रमेणापि सम्भाव्य अस्य विरोधिषु केचन मूर्च्छिताः निपतन्ति, अन्ये विस्मृत–शास्त्रास्त्राः**

**पलायन्ते, इतरे महात्रासाऽऽकुञ्चितोदरा विशिथिल–वाससो नग्ना भवन्ति, अपरे च शुष्कमुखा दशनेषु तृणं सन्धाय साम्रेडं प्रणिपात–परम्परां रचयन्तो जीवनं याचन्ते।**

**प्रसङ्गः –** अत्र शिववीरशौर्यविषये जिज्ञासमानम् अपजलखानं प्रति गौरसिंहः (तानरङ्गः) ब्रूते –

**व्याख्या –** भगवन्=श्रीमन्! सामान्यराजभृत्यस्य=साधारणनृपसेवकस्य, पुत्रः=तनयः, शिववीरः=शिवः यदि=चेत्, नाम, स्वयम्, ईदृशः=एतादृशः, ऊर्जस्वलः=तेजस्वी न अभविष्यत्=न स्यात्, तत्=तदा, स्वर्णदेवसदृशम्= स्वर्णदेवतुल्यम्, सहचरम्=सखायम्, कथम्=केन प्रकारेण प्राप्स्यत्=प्राप्तुं समर्थोऽभविष्यत्? तद्द्वारा=स्वर्णदेवमाध्यमेन, समस्तम्=निखिलम्, कल्याणप्रदेशम्= एतदारव्यं प्रान्तम्, कल्याणदुर्गम्=एतदाख्यं दुर्गम्, च, स्वहस्तगतम्=निजाधीनम्, (कथम्) अकरिष्यत्=कर्तुं समर्थोऽभविष्यत्? तोरणदुर्गभोगभाजनताम्= तोरणदुर्गसेवनपात्रताम्, कथम्, अकलयिष्यत्=अवाप्स्यत्। तोरणदुर्गात्= एतदारव्यदुर्गात्, दक्षिणपूर्वस्याम्=आग्नेयदिशि, पर्वते=अचले, महेन्द्रमन्दिरक– खण्डम्=इन्द्रप्रासादभागम् इव, धर्षितारिवर्गम्= तिरस्कृतशत्रुसमूहम्, डमरुहुडुक्कार– तोषितभर्गम्= ढक्कानिनादप्रसादितशिवम्, रायगढनामकम्= एतदाख्यम्, महादुर्गम्= विशालकोट्टम्, कथम्, व्यरचयिष्यत्=निरमापयिष्यत्? वा=अथवा, तपनीयभित्तिका– जटितमहारत्न–किरणावली–वितन्यमानमहावितान–वितति– विरोचित–प्रताप– तापितपरिपन्थिनिवहम्= सुवर्णभित्तिखचितमणि– श्रेष्ठमयूखराशिविस्तार्यमाण– महोल्लोचविस्तारदीप्ततापसन्तापितशत्रुसमूहम्, चन्द्रचुम्बनचतुरचारुशिखरनिकरम्= शशिस्पर्शनकुशलरम्यशृंगचयम्, भुशुण्डिका–किणाङ्कित–प्रचण्ड भुजदण्ड– रक्षककुलविधीयमानपरस्सहस्र– परिक्रमम्=भुशुण्डिरूढव्रणपदचिह्नितदुर्धर्षबाहुदण्– डप्रहरिगणक्रियमाण ानैकपरिभ्रमम्, धमद्धमद्दोधूयमानाऽनेकध्वजपटल– निर्मथितमहाकाशम्= धमद्धमदिति शब्दायमाननानापताका समूहालोडितगगनम्, प्रतापदुर्गम्=एतन्नाम्ना प्रसिद्धं दुर्गम्, कथम्, निरमापयिष्यत्= व्यरचयिष्यत्? वा= अथवा, "एषः=अयम्, शिववीरः= वीरश्रेष्ठः शिवः, आगतः=आयातः" इति=एवम्, भ्रमेण=भ्रान्त्या, अपि, सम्भाव्य=आशंक्य, अस्य=शिवस्य, विरोधिषु=शत्रुषु, केचन=कतिचन, कथम्, मूर्च्छिताः=चेतनाशून्याः, (सन्तः) निपतन्ति=पतन्ति, अन्ये=इतरे, विस्मृतशस्त्रास्त्राः= विस्मृतायुधाः, कथम्, पलायन्ते=धावन्ति, इतरे=अपरे, महात्रासाकुञ्चितोदरा= महाभयसंकु/सटञ्च चितकुक्षिकाः, विशिथिलवाससः= अतिशिथिलवस्त्राः, कथम्, नग्नाः=विवसनाः, भवन्ति=जायन्ते, च, अपरे=अन्ये, शुष्कमुखाः=खिन्नवदनाः, दशनेषु=दन्तेषु, तृणम्, सन्धाय=निधाय, साम्रेडम्=वारंवारम्, प्रणिपातपरम्पराम्= अतिनमनपरम्पराम्, रचयन्तः=कुर्वन्तः, कथम्, जीवनम्=प्राणान्, याचन्ते=प्रार्थयन्ते।

**समासविग्रहाः –** राज्ञः भृत्यः राजभृत्यः (ष.त.), सामान्यश्चासौ राजभृत्यः (कर्म.), तस्य। तोरणदुर्गस्य भोगः, तस्य भाजनम् तोरणदुर्गभोगभाजनम्, तस्य भावस्ताम् (तत्पू.)। महेन्द्रस्य मन्दिरम्, तस्य खण्डः, तम् (ष.त.) अरीणां वर्गः अरिवर्गः (ष.त.), धर्षितः अरिवर्गः येन सः (बहु.), तम्। डमरोः हुडुक्कारः, तेन तोषितः भर्गः यस्मिन् सः, (बहु.) तम्। तपनीयस्य भित्तिकाजटितमहारत्नानि, तेषां किरणावल्यः, ताभिः वितन्यमानं यद् महद्वितानम्, तस्य विततिः, तया विरोचितः स चासौ प्रतापः, तेन तापितः परिपन्थिसमूहः यस्मिन् सः, तम् (ष.त.,कर्म.बहु.)। चारुश्चासौ शिखरनिकरः चारुशिखरनिकरः (कर्म.) चन्द्रचुम्बने चतुरः चारुशिखरनिकरः यस्मिन् सः (बहुव्रीहि) तम्। भुजा दण्डाः इव भुजदण्डाः, प्रचण्डाश्च ते भुजदण्डाः प्रचण्डभुजदण्डाः (कर्म.) भुशुण्डिकानां किणाः, तैः अङ्किताः प्रचण्डभुजदण्डाः येषां ते भुशुण्डिकाकिणाङ्कितप्रचण्डभुजदण्डाः, (कर्म.) भुशुण्डिकाकिणाङ्कितप्रचण्डभुजदण्डाश्च ते रक्षकाः भुशुण्डिकाकिणा– ङ्कितप्रचण्डभुजदण्ड रक्षकाः, तेषां कुलम्, तेन विधीयमानाः परस्सहस्रपरिक्रमाः यस्य सः, तम्। शस्त्राणि च अस्त्राणि च इति शस्त्रास्त्राणि (द्वन्द्वः) विस्मृतानि शस्त्रास्त्राणि यैस्ते विस्मृतशस्त्रास्त्राः (बहु.)।

**व्याकरणम् –** ऊर्जस्वलः – ऊर्जस्+वलच्+सु। अभविष्यत् – भू+लृङ्+तिप्। प्राप्स्यत् –

प्र+आप्+लृङ्+तिप्। अकलयिष्यत् – कल्+णिच्+लृङ्+तिप्। व्यरचयिष्यत् – वि+रच्+णिच्+लृङ्+तिप्। निरमापयिष्यत् – निर्+मा+णिच् +लृङ्+तिप्। सन्धाय – सम्+धा+क्त्वा > ल्यप्।

**विशेषः –** 'महेन्द्रमन्दिरखण्डमिव' इत्यत्र उपमा, "चन्द्रचुम्बन– चतुर–चारु–शिखर.' इत्यत्र अतिशयोक्तिः, प्रतापदुर्गस्य च उदात्तवर्णनाद् उदात्तालंकारोऽस्ति। अत्र सानुप्रासा सुदीर्घसमासा पाञ्चालीरीतिरस्ति।

**सरलार्थः–** श्रीमन्! सामान्यराजसेवकस्य तनयः शिववीरः यदि स्वयम् ईदृशः तेजस्वी न अभविष्यत् तदा स्वर्णदेवसदृशं सहचरं कथमवाप्स्यत्? कथञ्च तद्द्वारा सम्पूर्णं कल्याणप्रदेशं कल्याणदुर्गं च अधिकर्तुं समर्थोऽभविष्यत्? कथं तोरणदुर्गात् दक्षिणपूर्वस्यां दिशि पर्वतशिखरे इन्द्रप्रासादखण्डमिव शत्रूणां भयदं डमरोः हुडुक्कारध्वनिना भगवन्तं शिवं प्रसादयितुं समर्थं रायगढनामकं महादुर्गं रचयितुं प्राभविष्यत्? कथं वा सुवर्णभित्तिषु जटितानां महारत्नानां किरणावलीभिः वितन्यमानेन महावितानेन सुशोभितेन प्रतापेन शत्रूणां संतापकम्, गगनस्पर्शिभिः शिखरैः शोभितम्, भुशुण्डि–किणाङ्कितप्रचण्डभुजदण्डैः प्रहरिभिः क्रियमाणासंख्यपरिक्रमम्, धमद्–धमदिति शब्दं कुर्वद्भिः दोधूयमानैः ध्वजैः निर्मथितविशालाकाशं प्रतापदुर्गं निर्मापयितुं प्राभविष्यत्? अथवा "आगत एष शिववीरः' – इति भ्रमेणापि सम्भाव्य अस्य विरोधिषु केचन मूर्च्छिताः कथं निपतन्ति, अन्ये शस्त्रास्त्राणि विहाय कथं धावन्ति, इतरे महाभयात् संकुचितोदराः (अत एव) विशिथिलवस्त्राः (अत एव) नग्नाः कथं जायन्ते, अपरे च खिन्नमुखाः सन्तः दन्तेषु तृणं सन्धाय मुहुर्मुहुः प्रणमन्तः जीवनं कथं याचन्ते?

**मूलम् – ततस्तस्य महाप्रतापमवगत्य किञ्चिद्भीते इव तच्छत्रूणां चावहेलामाकलय्य किञ्चिदरुण–नयने इव, दक्षिण–हस्तांगुष्ठतर्जनीभ्यां श्मश्वग्रं परिमृजति यवन–सेनापतौ; तानरङ्गः पुनर्न्यवेदयत्–**

**परन्त्वद्य सिंहेन सह शिवस्य साम्मुख्यमस्ति, तन्मन्ये इयमस्तमनवेला तत्प्रतापसूर्यस्य।**

**तत् कर्णे कृत्वा सन्तुष्ट इव सकन्धराकम्पं सेनापतिरुवाचैंअथाऽत्र संग्रामे कस्य विजयः सम्भाव्यते?**

**स उवाच–श्रीमन्! यदि शिवस्य साहाय्यं साक्षाच्छिव एव न कुर्यात्; तद् विजयपुरस्यैव विजयः।**

**अथ सहासं सोऽब्रवीत्–को नाम खपुष्पायितः शशशृङ्गायितः कमठीस्तन्यायितः सरीसृप–श्रवणायितः भेक–रसनायितः वन्ध्यापुत्रायितश्च शिवोऽस्ति? य एनं रक्षिष्यति, दृश्यतां श्व एवैषोऽस्माभिः पाशैर्बद्ध्वा चपेटैस्ताड्यमानो विजयपुरं नीयते।**

**प्रसङ्गः –** अत्र शिवराजस्य शौर्यातिशयं श्रुत्वा किञ्चिद् खिन्नम् अपजलखानं दृष्ट्वा तानरङ्गः पुनः निवेदयति–

**व्याख्या –** ततः=तदनन्तरम्, तस्य=शिवराजस्य, महाप्रतापम्= प्रतापातिशयम्, अवगत्य=ज्ञात्वा यवनसेनापतौ=यवनसेनानायके किञ्चिद्=ईषद्, भीते=त्रस्ते, इव तच्छत्रूणाम्= शिवस्य रिपूणाम्, च, अवहेलाम्=निन्दाम्, आकलय्य=श्रुत्वा, किञ्चिद्=ईषद्, अरुणनयने=रक्तलोचने, इव दक्षिण हस्तांगुष्ठतर्जनीभ्याम्=दक्षिणकरांगुष्ठप्रदेशिनीभ्याम्, श्मश्रवग्रम्=कूर्चाग्रम्, परिमृजति=स्पृशति (सति) तानरङ्गः=गायकवेषो गौरसिंह, पुनः=भूय, न्यवेदयत्=प्रार्थयत, परन्तु=किन्तु, अद्य=अधुना, सिंहेन=केसरिणा, सह=साकम्, शिवस्य=शिवराजस्य, साम्मुख्यम्=साक्षात्कारः, अस्ति, तत्=तस्मात्, इयम्=एषा, तत्प्रतापसूर्यस्य=शिवतेजो रवेः, अस्तमनवेला=समाप्तिकालः, (समुपस्थितः) इति, मन्ये=संभावयामि। तत्=तानरङ्गोक्तम्, कर्णे कृत्वा=श्रुत्वा, सन्तुष्ट इव=प्रसन्न इव, सकन्धराकम्पम्=ग्रीवासञ्चालनपुरस्सरम्, सेनापतिः=अपजलखानः, उवाच=जगाद, अथ, अत्र=अस्मिन्, संग्रामे=रणे, कस्य=कतरस्य, विजयः=जयः,

सम्भाव्यते=अनुमीयते? स उवाच=तानरङ्गः जगाद – श्रीमन्= भगवन्! यदि=चेत्, शिवस्य=शिवराजस्य, साहाय्यम्=सहायताम्, साक्षात्=प्रत्यक्षरूपेण, शिवः=शङ्करः एव=हि, न=नैव, कुर्यात्=विदध्यात्; तद्=तदा, विजयपुरस्य=अपजलखानस्य, एव, विजयः=जयः (संभाव्यते)। अथ=अनन्तरम्, सः=अपजलखानः, सहासम्=हासपूर्वकम्, अब्रवीत्=अकथयत् (अयम्) खपुष्पायितः=आकाश– कुसुममिवाचरितः, शशश्रृङ्गायितः=शशश्रृंगमिवाचरितः, कमठीस्तन्यायितः= कच्छपीस्तनमिवाचरितः, सरीसृपश्रवणायितः=सरीसृपजन्तुकर्णामिवाचरितः, भेकरसनायितः=मण्डूकजिह्वामिवाचरितः, वन्ध्यापुत्रायितः= वन्ध्यातनयमिवाचरितः, शिवः=शङ्करः, कः=अज्ञातस्वरूपः कः, अस्ति=विद्यते? न कोऽपीत्यर्थः। यः=शिवः, एनम्= शिवराजम्, रक्षिष्यति=रक्षां करिष्यति, दृश्यताम्=विलोक्यताम्, श्वः=परेद्युः एव, एषः=शिवः, अस्माभिः=अपजलखानप्रमुखैः, पाशैः=जालैः बद्ध्वा=नियम्य, चपेटैः=हस्ताघातैः, ताड्यमानः=पीड्यमानः, विजयपुरम्=एतदाख्यनगरम्, नीयते=प्राप्यते।

**समासविग्रहाः** – महाश्चासौ प्रतापः महाप्रतापः (कर्म.), तम्। अरुणे नयने यस्य सः अरुणनयनः (बहु.), तस्मिन्। तस्य प्रतापः तत्प्रतापः (ष.तत्पु.), स एव सूर्यः तत्प्रतापसूर्यः (कर्म.), तस्य।

**व्याकरणम्** – अवगत्य – अव+गम्+क्त्वा > ल्यप्। भीते – भी+क्त+ङि। आकलय्य – आ+कल्+णिच्+क्त्वा > ल्यप्। परिमृजति – परि+मृज्+शतृ+ङि। सम्भाव्यते – सम्+भू+णिच्+यक्+लट्+त। विजय– वि+जि+अच्+सु। खपुष्पायितः – खपुष्प+क्यच्+क्त+अच्+सु। ताड्यमानः – ताड्+णिच्+य+शानच्+सु।

**विशेषः** – 'किञ्चिद् भीते इव' किञ्चिदरुणनयने इव' इत्यत्र उत्प्रेक्षालंकारः, तत्प्रतापसूर्यस्य' इत्यत्र रूपकालंकारः, 'खपुष्पायितः........ वन्ध्यापुत्रायितः' इत्यत्र च वाचकलुप्तोपमालंकारः। अत्र त्रासाऽमर्षव्यभिचारिणौ अभिव्यज्येते उत्तरार्द्धे च अपजलखानस्य उत्साहोऽभिव्यज्यते।

**सरलार्थः** – तदा शिववीरस्य महाप्रतापं ज्ञात्वा अपजलखानः किञ्चिद् भीत इव, तस्य (शिवस्य) शत्रूणां च तिरस्कारं श्रुत्वा किञ्चित् क्रुद्ध इव संजातः; तद्दृष्ट्वा तानरङ्गः पुनः निवेदनं कृतवान् – परन्तु अद्य सिंहेन (भवता) सह शिवस्य साक्षात्कारः प्रस्तुतोऽस्ति, तस्मात् तस्य प्रतापभानोः अयमस्तकालः समुपस्थितः इति मन्ये। तदाकर्ण्य अपजलखानः ग्रीवासञ्चालनपूर्वकं सन्तुष्ट इव अब्रवीत् –ब्रूहि; अत्र रणे कस्य विजयः संभवति? तदा तानरङ्गः अवदत् श्रीमन्। यदि शरीरी भगवान् शिवस्तस्य सहायतां न विधास्यति तदा भवत एव विजयः सुनिश्चितो वर्तते। अनन्तरं सहासं सःअब्रवीत् – खपुष्पवत्, शशश्रृंगवत्, कच्छपीस्तनवत् सरीसृपश्रवणवत् मण्डूकजिह्वावत् वन्ध्यापुत्रवत् च सर्वथा अभावं प्राप्तोऽयं शिवः कोऽस्ति? नास्ति कोऽपीत्यर्थः। यः शिवः शिवराजं रक्षिष्यति; पश्यतु भवान्, श्वो वयम् एनं पाशैः बद्ध्वा चपेटैश्च ताडयन्तः विजयपुरं नेष्यामः।

**मूलम् – इति सकष्टमाकर्ण्य, "स्यादेवं भगवन्।" इति कथयति तानरङ्गे, अभिमान–परवशः स स्वसहचरान् सम्बोध्य पुनरादिशत्तैंभो–भो योद्धारः! सूर्योदयात् प्रागेव भवन्तः पञ्चाऽपि सहस्राणि सादिनां दशाऽपि च सहस्राणि पत्तीनां सज्जीकृत्य युद्धाय तिष्ठत। गोपीनाथपण्डितद्वाराऽऽहूतोऽस्ति मया शिव–वराकः। तद् यदि विश्वस्य स समागच्छेत्, ततस्तु बद्ध्वा जीवन्तं नेष्यामः, अन्यथा तु सदुर्गमेनं धूलीकरिष्यामः। यद्यप्येवं स्पष्टमुदीरणं राजनीति–विरुद्धम्, तथाऽपि मदावेशस्तु न प्रतीक्षते विवेकम्।**

**प्रसङ्गः** – अत्र श्रृण्वति तानरङ्गे अभिमानपरवशः अपजलखानः सैनिकान् श्वः करणीयं निर्दिशति –

**व्याख्या** – इति=एवम्, सकष्टम्=सखेदम्, आकर्ण्य=श्रुत्वा, "भगवन्! श्रीमन्!, एवं स्यात्=एवं स्यात्=एवं भवेत्।" इति, कथयति=वदति, तानरङ्गे, अभिमानपरवशः=अहङ्कारपराधीनः, सः=अपजलखानः, स्वसहचरान्=निजसहायकान्, सम्बोध्य=निर्दिश्य, पुनः=भूयः, आदिशत्= आज्ञापयत्, "भो भो योद्धारः!=भो भो सैनिकाः! सूर्योदयात्=प्रातःकालात्, प्राक्एव=पूर्वमेव, भवन्तः=यूयम्, पञ्च अपि सहस्राणि=पञ्चसहस्रमितानि

सादिनाम्=अश्वारोहिणाम्, दश अपि सहस्राणि, च पत्तीनाम्=पदातीनाम्, सज्जीकृत्य=सुसज्जितं कृत्वा, युद्धाय=आक्रमणाय, तिष्ठत=सज्जीभवत। मया=मम द्वारा, गोपीनाथपण्डित द्वारा=एतदाख्यपण्डितेन, शिववराकः=वराकः शिवः, आहूतः=आमन्त्रितः, अस्ति=विद्यते। तत्=तस्मात् यदि, विश्वस्य=विश्वासं कृत्वा, सः=शिवः, समागच्छेत्=आगच्छेत्, ततः=तदा, तु, बद्ध्वा=बन्धनं कृत्वा, जीवन्तम्=प्राणान् धारयन्तम्, नेष्यामः=प्रापयिष्यामः, अन्यथा=नो चेत्, तु, एनम्=शिवम्, सदुर्गम्=दुर्गसहितम्, धूलीकरिष्यामः= नाशयिष्यामः। यद्यपि, एवम्=इत्थम्, उदीरणम्=कथनम्, राजनीतिविरुद्धम्= नृपनयविपरीतम्, अस्ति, तथाऽपि मदावेशः=ममावेशः, तु, विवेकम्= कर्त्तव्याकर्त्तव्यविचारम्, न प्रतीक्षते=न पश्यति।

**समासविग्रहाः–** अभिमानस्य परवशः अभिमानपरवशः (ष.त.)। राजनीत्याः विरुद्धम् राजनीतिविरुद्धम् (ष.त.)। असज्जं सज्जं कृत्वा इति सज्जीकृत्य (गतितत्पु)।

**व्याकरणम् –** कथयति – कथ+शतृ+ङि। आदिशत् – आङ्+दिश्+ लङ्+तिप्। सज्जीकृत्य – सज्ज्+च्वि+कृ+क्त्वा > ल्यप्। जीवन्तम् – जीव्+शतृ+अम्।

**विशेषः –** अत्र अपजलखानस्य अदूरदर्शिता द्योत्यते।

**सरलार्थः –** एतावत् सकष्टं श्रुत्वा "भगवन्! एवं स्याद्" इति उक्तवति तानरङ्गे अभिमानपरवशः स स्वसहचरान् पुनः आदिशत् भो भो योद्धारः! श्वः सूर्योदयात् पुर्वमेव भवन्तः पञ्चसहस्राणि अश्वारोहिणः दशसहस्राणि च पदातीन् च सज्जीकृत्य युद्धाय तत्पराः भवन्तु। सः वराकः शिवः मया गोपीनाथपण्डितमाध्यमेन आहूतोऽस्ति; तद् यदि सः विश्वासं कृत्वा आगच्छेत् तदा तु तं बद्ध्वा जीवन्तमेव नेष्यामः, नो चेत् सदुर्गम् एनं धूलिसात् करिष्यामः। यद्यपि एवं स्पष्टतया कथनं राजनीतिविरुद्धमस्ति पुनरपि मम आवेशः कर्त्तव्याकर्त्तव्यविचारं न गणयति।

**मूलम् – तदवधार्य समस्तक–कूर्चान्दोलनम्–"यदाज्ञाप्यते" "यदाज्ञाप्यते" इति वाचां धारासम्पातैरिव स्नापयत्सु पारिषदेषु, "गोपनीयोऽयं वृत्तान्तः कथं स्पष्टं कथ्यते?" इति दुर्मनायमानेष्विव च अकस्मादेव प्रविश्य सूदेनोक्तम–"श्रीमन्! व्यत्येति भोजनसमयः"। तत् श्रुत्वा "आ! एवं किलैतत्" इति सोत्प्रासं सविस्मयं सकूर्चोद्धूननं सोपबर्हताडनमुच्चार्य सपद्युत्थाय, 'पुनरागम्यताम्' इति तानरङ्गं विसृज्य सेनापतिरन्तः प्रविवेश। तानरङ्गश्च यथागतं निववृते।**

**इतस्तु प्रतापदुर्गे विहिताहारव्यापारे रजतपर्यङ्किकामेकाधिष्ठिते किञ्चित् तन्द्रापरवशे इव गोपीनाथे, शिववीरः शनैरुपसृत्य प्रणम्य, उपाविशदवोचच्च– 'अहो!भाग्यमस्माकं यदालयं युष्मादृशा भूदेवाः स्वचरणरजोभिःपावयन्ति' इति।**

**प्रसङ्गः –** अत्र तानरङ्गस्य अपजलखानशिविरात् प्रत्यागमनं शिववीरस्य च गोपीनाथ पण्डितदर्शनाय गमनं चेति वर्ण्यते–

**व्याख्या –** तदवधार्य=तदाकर्ण्य, समस्तककूर्चान्दोलनम्= सशिरश्श्मश्रुकम्पम्, यदाज्ञाप्यते=यदादिश्यते, यदाज्ञाप्यते, इति=इत्थम्, वाचां=वचसां, धारासम्पातैः=तीव्रवृष्टिभिः, इव, पारिषदेषु=सभासदेषु, स्नापयत्सु= स्नानं कारयत्सु, "अयम्=एषः, गोपनीयवृत्तान्तः=रहस्यात्मकं वृत्तम्, कथम्, स्पष्टम्=प्रकटरूपेण, कथ्यते=उच्यते?" इति=एवम्, दुर्मनायमानेषु= विमनायमानेषु, इव, च, अकस्मादेव=सहसा एव, प्रविश्य=आगत्य, सूदेन= पाचकेन, उक्तम्=कथितम् – "श्रीमन्!=भगवन्! भोजनसमयः=भोजनकालः व्यत्येति= उत्क्रामति,"। तत् श्रुत्वा=तदाकर्ण्य, "आ!=आ इति स्मरणार्थेऽव्ययम्, एवं किलैतत्"="किं नन्वेवम्?", इति, सोत्प्रासम्= सस्मितम्, सविस्मयम्= साश्चर्यम्, सकूर्चोद्धननम्= सश्मश्रुकम्पनम्, सोपबर्हताडनम्= उपधानताडनपुरस्सरम्, सपदि=शीघ्रम्, उत्थाय=उत्थानं कृत्वा, "पुनः=भूयः, आगम्यताम्=आगच्छतु" इति तानरङ्गम=गायकम्, विसृज्य=प्रस्थाप्य, सेनापतिः=अपजलखानः, अन्तः=अभ्यन्तरम्, प्रविवेश=प्राविशत्। तानरङ्गः=गायकः, च, यथागतम्=यथायातम्, निववृते=प्रत्यावर्तत।

इतः तु, प्रतापदुर्गे=एतदाख्यदुर्गे, विहिताहरव्यापारे=सम्पादित– भोजनकृत्ये, एकाम्, रजतपर्यङ्किकाम्=रुप्यपर्यङ्किकाम्, अधिष्ठिते=विराजमाने, किञ्चित्=ईषत् तन्द्रापरवशे=निद्रापराधीने, इव, गोपीनाथे=पण्डितराजे, (सति) शिववीरः=शिवः, शनैः=मन्दम्, उपसृत्य=उपेत्य, प्रणम्य=नत्वा, उपाविशत्=उपविष्टोऽभूत्, अवोचत्=अब्रवीत्, च, " अहो!=सम्बोधनसूचकमव्ययम्, अस्माकम्=मादृशानाम्, भाग्यम्=सौभाग्यम्, यत्, युष्मादृशाः=भवादृशाः, भूदेवाः=ब्राह्मणाः, स्वचरणरजोभिः=निजपादधूलिभिः, (मम) आलयम्=गृहम्, पावयन्ति=पुनन्ति इति।

**समासविग्रहाः –** मस्तककूर्चयोः आन्दोलनम् मस्तककूर्चान्दोलनम् (ष.त.) तेन सहितम्। कूर्चस्य उद्धूननम् कूर्चोद्धूननम् (ष.त.), तेन सहितम्। उपबर्हे ताडनम् उपबर्हताडनम् (ष.त.) तेन सहितम्। आहारस्य व्यापारः (ष.त.) विहितः आहारव्यापारः येन सः विहिताहारव्यापारः (बहु.), तस्मिन्।

**व्याकरणम् –** अवधार्य – अव+धृ+णिच्+क्त्वा > ल्यप्। स्नापयत्सु= स्ना+णिच्+पुक्+शतृ+सुप्। गोपनीयः – गुप्+अनीयर+सु। दुर्मनायमानेषु – अदुर्मनसो दुर्मनसो भवन्ति इति दुर्मनायमानाः, तेषु, दुर्+मनस्+क्यङ्+शानच्+सुप्। व्यत्येति – वि+अति+इण्+तिप्। अधिष्ठिते – अधि+स्था+क्त+ङि। उपसृत्य – उप+सृ+क्त्वा > ल्यप्।

**विशेषः –** अत्रोत्प्रेक्षाचमत्कृतिर्दृश्यते।

**सरलार्थः –** इदं श्रुत्वा शिरः कूर्चं च आन्दोलयन्तः – 'यदादिश्यते' इति इति ब्रूवन्तः केचन सहचराः वाचां धारासम्पातैः (तम्) स्नापयन्तः इव, (केचन च) "अयं गोपनीयो वृतान्तः कथं स्पष्टं कथ्यते?" इति दुर्मनायमानाः इव अभूवन्, तदैव सूदः प्रविश्य अवदत् – श्रीमन्! भोजनकालः व्यतिक्रामति" इति। तदाकर्ण्य किञ्चिद् विहस्य सविस्मयं कूर्चमान्दोलयन् उपधानञ्च हस्तेन ताडयित्वा" अरे। किमेतत् अस्ति? इत्युक्त्वा सपदि एव उत्थाय "पुनरागम्यताम्' इति उक्त्वा तानरङ्गं विसृज्य सेनापतिः अन्तः प्राविशत्; तानरङ्गश्च यथागतं प्रत्यावर्तत।

इतस्तु प्रतापदुर्गे गोपीनाथः भोजनानन्तरम् एकस्यां राजतपर्यङ्किकायाम् उपविष्टः किञ्चिद् अलस इव अभूत्, तदैव शिववीरः शनैः तम् उपेत्य प्रणम्य उपविश्य अवोचत्" अहो! अस्माकं सौभाग्यम् अस्ति यन्मम गृहं भवादृशाः ब्राह्मणाः स्वचरणरजोभिः पावयन्ति इति।

**मूलम् – अथ तयोरेवमभूवन्नालापाः।**

**गोपीनाथः – राजन्! कोऽत्र संदेहः? सर्वथा भाग्यवानसि, पर साम्प्रतं नाहं पण्डितत्वेन कवित्वेन वा समायातोऽस्मि, किन्तु यवनराजदूतत्वेन। तत् श्रूयतां यदहं निवेदयामि।**

**शिववीरः – शिव! शिव! खलु खलु खल्विदमुक्त्वा, येषां श्रीमतां चरणेनाऽङ्कितं विष्णोरपि वक्षःस्थलमैश्वर्यमुद्रयेव मुद्रितं विभाति, न तेषां बाह्मण–कुल– कमल–दिवाकराणां यवन–कैङ्कर्यकलङ्क–पङ्को युज्यते, यं शृण्वतोऽपि मम स्फुटत इव कर्णौ। तथाऽपि कुलीना निरभिमाना भवन्ति–इति आनीतश्चेत् कश्चित् सन्देशः, तदेष आज्ञाप्यतां श्रीमच्चरण–कमलचञ्चरीकः।**

**गोपीनाथः – वीर! कलिरेष–कालः, यवनाऽऽक्रान्तोऽयं भारतभूभागः, तन्नाऽस्माकं तथा तानि तेजांसि, यथा वर्णयसि। साम्प्रतं तु विजयपुराधीश–वितीर्णां वृत्तिं भुञ्जे इति तदाज्ञामेव परिपालयामि। तत् श्रूयतां तदादेशः!**

**शिववीरः – आर्य! अवदधामि।**

**प्रसङ्गः –** अत्र कविः गोपीनाथपण्डित–शिववीरयोः वार्तालापं वर्णयति–

**व्याख्या –** अथ=अनन्तरम्, तयोः=गोपीनाथ–शिवयोः, एवम्= वक्ष्यमाणप्रकारेण, आलापाः=संवादाः, अभूवन्=अभवन्। गोपीनाथः – राजन्!=भगवन्! अत्र=अस्मिन् विषये, कः संदेहः=कः संशयः (अस्ति) नास्ति कोऽपीत्यर्थः। सर्वथा=सर्वप्रकारेण, भाग्यवान् असि=भाग्यशाली वर्तसे, परम्=किन्तु, साम्प्रतम्=अधुना,

अहम्=गोपीनाथः, पण्डितत्वेन=पण्डितरूपेण, वा=अथवा, कवित्वेन=कविरूपेण, न=नैव, समायातः अस्मि= समागतोऽस्मि, किन्तु, यवनराजदूतत्वेन= विजयपुराधीश–संदेशहरत्वेन, (आगतोऽस्मि)। तत्=तस्मात्, श्रूयताम्=आकर्ण्यताम्, यत्=यत् किमपि, अहम्, निवेदयामि= कथयामि। शिववीरः – शिव! शिव!= खेदसूचकमव्ययम्, इदं खलु उक्त्वा=नेदं वाच्यं भवता, खलु, खलु, येषां श्रीमताम्=येषां भगवताम् (ब्राह्मणानाम्), चरणेन=पादेन, अङ्कितम्=चिह्नितम्, विष्णोरपि=हरेः अपि, वक्षःस्थलम्=उरः, ऐश्वर्यमुद्रया= ऐश्वर्यचिह्नेन, मुद्रितम्=चिह्नितम् इव विभाति=प्रतीयते, तेषाम्=प्रसिद्धानाम्, ब्राह्मणकुलकमलदिवाकराणाम्= विप्रवंशपंकजसूर्याणाम्, यवनकैङ्कर्यकलङ्क–पङ्कः= म्लेच्छसेवालाञ्छनमालिन्यम्, न=नैव युज्यते= शोभते यम्, शृण्वतः अपि=आकर्णयतः अपि, मम=शिवराजस्य, कर्णौ=श्रवणे, स्फुटतः इव=विदीर्णौ इव भवतः। तथापि= पुनरपि, कुलीनाः=अभिजाताः, निरभिमानाः=गर्वरहिताः, भवन्ति, इति, चेत्=यदि, कश्चित्=कोऽपि, सन्देशः=प्रवृत्तिः, आनीतः=ऊढः (अस्ति) तत्=तदा, श्रीमच्चरणकमलचञ्चरीकः=भवदंघ्रिपंकजभ्रमरः (अयं शिवः) आज्ञाप्यताम्= आदिश्यताम्। गोपीनाथः – वीर!=शूर! एष=अयम्, कलिकालः=कलियुगम् (अस्ति), अयम्=एषः भारतभूभागः= भारतवर्षभूप्रदेशः, यवनाक्रान्तः= म्लेच्छपीडितः, (अस्ति), तत्=तस्मात्, अस्माकम्=गोपीनाथादीनाम्, तथा=तादृशानि, तेजांसि=तपांसि, न=न सन्ति, यथा=येन प्रकारेण, वर्णयसि=कथयसि। साम्प्रतम्=अधुना, तु, विजयपुराधीशवितीर्णाम्=विजयपुरनरेशदत्ताम्, वृत्तिम्=भृतिम्, भुञ्जे=भुनज्मि, इति=अस्मात्, तदाज्ञाम् एव=तदादेशमेव, परिपालयामि=अनुसरामि। तत्=तस्मात् तदादेशः=तदाज्ञा, श्रूयताम्=आकर्ण्यताम्। शिववीरः – आर्य!=पूज्य!, अवदधामि= सावधानोऽस्मि।

**समासविग्रहाः –** ब्राह्माणानां कुलम् ब्राह्मणकुलम् (ष.त.), तदेव कमलम् (कर्म.), तस्य दिवाकराः (ष.त.), तेषाम्। यवनानां कैङ्कर्यम् यवनकैङ्कर्यम्, तस्मात् कलङ्कम् (ष.त.) तदेव पङ्कः (कर्म.)। विजयपुराधीशेन वितीर्णाम् (तृ.त.)।

**व्याकरणम् –** आलापाः – आङ्+लप्+घञ्+जस्। पण्डितत्वेन पण्डा+इतच्+त्व +टा। समायातः – सम्+आङ्+या+क्त+सु। उक्त्वा – वच्+क्त्वा। श्रीमताम् – श्री+मतुप्+ आम्। कैङ्कर्य – किङ्कर+ष्यञ्। शृण्वतः – श्रु+क्तवतु+ङस्। आज्ञाप्यताम् – आङ्+ज्ञा+णिच्+पुक्+यक्+लोट्+त। वितीर्णाम् – वि+तृ+क्त+टाप्+अम्।

**विशेषः –** 'ऐश्वर्यमुद्रयेव मुद्रितम्' इत्यत्र उत्प्रेक्षालंकारः, 'ब्राह्मण– कुलकमलदिवाकराणाम्', "यवनकैङ्कर्यकलङ्कपङ्कः" 'श्रीमच्चरणकमलचञ्चरीकः' इत्यत्र च रूपकालङ्कारः। अत्र शिववचनात् यवनसेवया जीविकां यापयन्तो ब्राह्मणाः धिक्कृताः सन्ति। गोपीनाथवचनात् तदीयं दैन्यं व्यज्यते।

**सरलार्थः –** ततः तयोर्मध्ये एवं संवादोऽभूत्। गोपीनाथः अवदत् – राजन्! अत्र कोऽपि सन्देहो नास्ति। भवान् सर्वतः भाग्यवान् अस्ति; परम् अधुना अहम् पण्डितरूपेण कविरूपेण वा न आगतोऽस्मि, अपितु यवनराजदूतरूपेण आगतोऽस्मि। अतः शृणोतु, यदहं वदामि। शिववीरः अवदत् – शिव! शिव! नेदं वाच्यम्; येषां श्रीमतां ब्राह्मणानां चरणेन अङ्कितं भगवतो विष्णोः वक्षःस्थलमपि ऐश्वर्यमुद्रया अङ्कितमिव भाति, तेषां ब्राह्मणकुलकमलदिवाकराणां (भवताम्) यवनसेवाकलङ्कपङ्को न युज्यते, यं शृण्वतो मम कर्णौ स्फुटत इव। तथापि कुलीनाः अभिमानरहिताः भवन्ति; अतः यदि कश्चन सन्देशः आनीतोऽस्ति, तदा अयं श्रीमतां चरणकमलचञ्चरीकः आदेष्टव्यः। तदा गोपीनाथः अवदत् – वीर! अयं कलिकालो वर्तते, इदं भारतं यवनाक्रान्तं वर्तते; अतोऽस्माकं तादृशं तेजो नास्ति, यथा भवान् वर्णयति। साम्प्रतं तु विजयपुराधीशदत्तां जीविकां भुनज्मि अतः तदादेशं पालयिष्यामि। अतस्तदादेशं शृणोतु। तदा शिववीरः कथयति–आर्य! सावधानोऽस्मि।

**मूलम् – गोपीनाथः – कथयति विजयपुरेश्वरो यद्–"वीर! परित्यज नवामिमां चञ्चलतामस्माभिः सह युद्धस्य, त्वदपेक्षयाऽत्यन्तमधिकं बलिनो वयम्, प्रवृद्धोऽत्र कोषः, महती सेना, बहूनि दुर्गाणि,**

**बहवश्च वीराः सन्ति। तच्छुभमात्मनः इच्छसि चेत्, त्यक्त्वा निखिलां चञ्चलताम्, शस्त्रं दूरतः परित्यज्य, करप्रदतामङ्गीकृत्य, समागच्छ मत्सभायाम्। मत्तः प्राप्तपदश्चिरं जीविष्यसि, अन्यथा तु सदुर्दशं निहितः कथावशेषः संवत्स्र्यसि। तत् केवलं त्वयि दययैव सन्देशं प्रेषयामि, अङ्गीकुरु। मा स्म वृद्धायाः प्रसविन्याः रजतश्वेतां पक्ष्मपङ्क्तिमश्रु–प्रवाह–दुर्दिने पातय"–इति।**

**प्रसङ्गः –** अत्र गोपीनाथपण्डितः शिववीरं विजयपुराधीशस्य संदेशं श्रावयति –

**व्याख्या –** गोपीनाथः–विजयपुरेश्वरः=विजयपुराधीशः, कथयति=वदति, यत्–"वीर!=शूर! अस्माभिः=विजयपुराधीशेन, सह=सार्धम्, युद्धस्य=संग्रामस्य इमाम्=एताम्, नवाम्=अभिनवाम्, चञ्चलताम्=चपलताम्, परित्यज=मुञ्च, त्वदपेक्षया=भवत्तुलनया, वयम्, अत्यन्तमधिकम्=अत्यधिकं, बलिनः=शक्तिशालिनः (स्मः), अत्र=विजयपुरे, कोषः=धनम्, प्रवृद्धः=अतिविपुलम् (अस्ति), महती सेना=विशालं सैन्यम्, बहूनि=अनेकानि, दुर्ग्गाणि=कोट्टाः, बहवः=असंख्याः, वीराः=शूराः, च, सन्ति=विद्यन्ते। तत्=तदा, यदि=चेत्, आत्मनः=स्वस्य, शुभम्= कल्याणम्, इच्छसि=वाञ्छसि, (तदा) निखिलाम्=सर्वाम्, चञ्चलताम्=चपलताम्, त्यक्त्वा=विहाय, शस्त्रम्=आयुधम्, दूरतः=दूरात्, परित्यज्य=त्यक्त्वा करप्रदत्ताम्=करदानम्, अङ्गीकृत्य= स्वीकृत्य, मत्सभायाम्=मम संसदि, समागच्छ=आयाहि, मत्तः=विजयपुराधीशात्, प्राप्तपदः=लब्धपदः, चिरम्=बहुकालम्, जीविष्यसि= जीवितो भविष्यसि, अन्यथा=नो चेत्, तु, सदुर्दशम्=दुर्दशापूर्वकम्, निहतः=मारितः, कथावशेषः=कथनमात्रशेषः, संवत्स्यसि=भविष्यसि। तत्=तस्मात्, केवलम्, त्वयि=भवति, दयया=कृपया, एव, सन्देशम्= सन्दिष्टम्, प्रेषयामि=प्रेषणं करोमि, अङ्गीकुरु=स्वीकुरु। वृद्धायाः=जरठायाः, प्रसविन्याः=जनन्याः, रजतश्वेताम्=रुप्यधवलाम्, पक्ष्मपङ्क्तम्= नेत्ररोमावलिम्, अश्रुप्रवाहदुर्दिने= नयनजलवर्षासु, मा स्म पातय=न क्षेपय, इति।

**समासविग्रहाः –** करस्य प्रदत्ता, ताम् (ष.त.)। मम सभायाम् मत्सभायाम् (ष.त.)। रजतमिव श्वेता रजतश्वेता (कर्म.) ताम्। पक्ष्मणोः पङ्क्तिः पक्ष्मपङ्क्तिः (ष.त.) ताम्। अश्रूणां प्रवाहः, तदेव दुर्दिनम्, तस्मिन् (कर्म.)।

**व्याकरणम् –** प्रवृद्धः – प्र+वृध्+क्त+सु। अङ्गीकृत्य – अनङ्गमङ्गं कृत्वा अङ्ग+च्वि+कृ+क्त्वा > ल्यप्। निहतः – नि+धा+क्त+सु। संवत्स्र्यसि – सम्+वृत्+लृट्+सिप्। पातय – पत्+णिच्+लोट्+सिप्।

**विशेषः –** अत्र 'रजतश्वेताम्' इत्यत्र लुप्तोपमा अस्ति, 'अश्रुप्रवाहदुर्दिने' इत्यत्र च रूपकम्। गद्यांशेऽस्मिन् संदेशानुसारिणी समासरहिता शैली आश्रिता अस्ति।

**सरलार्थः –** गोपीनाथपण्डितः – विजयपुरनरेशः कथयति यत् – "वीर! अस्माभिः सह युद्धस्य इमां नवां चञ्चलतां त्यज, (यतोहि) तव अपेक्षया वयं बलिनः स्मः, अत्र कोषः प्रवृद्धो वर्तते, महती सेना अस्ति, दुर्ग्गाणि वीराश्च बहव सन्ति। तस्मात् यदि आत्मनः कल्याणम् इच्छसि तदा निखिलां चपलतां विहाय शस्त्रं विहाय, करदानञ्च स्वीकृत्य मम सभायाम् समागच्छ। मम सकाशात् पदं प्राप्य चिरं जीविष्यसि, नो चेत् दुर्दशया सह मृत्युं गमिष्यसि। अतः केवलं दयया सन्देशं प्रेषयामि, स्वीकुरु। वृद्धाया जनन्याः श्वेतां पक्ष्मपंक्तिम् अश्रुप्रवाहधारासम्पाते न पातय अर्थात् स्वाचरणेन जननीं न रोदय इति।

**मूलम् – शिववीर :– भगवन् ! कथयेदेवं कश्चिद् यवनराजः, परं किं, भवानपि मामनुमन्यते–यद् ये अस्मदिष्टदेवमूर्तीर्भङ्क्त्वा, मन्दिराणि समुन्मूल्य, तीर्थस्थानानि पक्कणीकृत्य, पुराणानि पिष्ट्वा वेदपुस्तकानि विदार्य च, आर्यवंशीयान् बलाद् यवनीकुर्वन्ति; तेषामेव चरणयोरञ्जलिं बद्ध्वा लालाटिकतामङ्गीकुर्याम्? एवं चेद् धिङ् मां कुल–कलङ्कं क्लीबम्; यः प्राणभयेन सनातनधर्मद्वेषिणां दासेरकतां वहेत्। यदि चाऽहमाहवे म्रियेय, वध्येय, ताड्येय वा, तदैव धन्योऽहम्, धन्यौ च मम पितरौ। कथ्यतां भवादृशां विदुषामत्र का सम्मतिः?**

**गोपीनाथः – (विचार्य) राजन्! धर्मस्य तत्त्वं जानासि, तन्नाऽहं स्वसम्मतिं कामपि दिदर्शयिषामि।**

**महती ते प्रतिज्ञा, महत्तवोद्देश्यमिति प्रसीदामितमाम्। नारायणस्तव साहाय्यं विदधातु।**

**शिववीरः – करुणानिधान! नारायणः स्वयं प्रकटीभूय न प्रायेण साहाय्यं विदधाति, किन्तु भवादृश–महाशय–द्वारैव। तत् प्रतिज्ञायतां काऽपि सहायता।**

**गोपीनाथः – राजन्। कथ्यतां किमहं कुर्याम्, परं यथा न मामधर्मः स्पृशेत्, तथैव विधास्यामि।**

**शिववीरः – शान्तं पापम्। कोऽत्राधर्मः? केवलं श्वोऽस्मिन्नुद्यान– प्रान्तस्थ–पट–कुटीरे यवनसेनापतिः अपजलखानः आनेयः, यथा तेनैकाकि– नाऽहमेकाकी मिलित्वा किमप्यालपामि।**

**गोपीनाथः – तत् सम्भवति।**

**प्रसङ्गः –** अत्र गोपीनाथपण्डितमुखात् विजयपुराधीशसंदेशश्रवणानन्तरं शिववीरस्तमुत्तरयति –

**व्याख्या –** शिववीरः – भगवन्!=श्रीमन्! कश्चित्=कोऽपि, यवनराजः= यवनशासकः, एवम्=उक्तप्रकारेण, कथयेत्=वदेत्, परम्=किन्तु, किम्, भवान् अपि= गोपीनाथोऽपि, माम्=शिवम्, अनुमन्यते=अनुशास्ति, – यत्, ये=यवनाः, अस्मदिष्टदेवतामूर्तीः=अस्माकमभीष्टदेवप्रतिमाः, भङ्क्त्वा=त्रोटयित्वा, मन्दिराणि= देवालयान्, समुन्मूल्य=समुत्खाय, तीर्थस्थानानि=पुण्यस्थलानि, पक्कणीकृत्य= शबरवसतीः कृत्वा, पुराणानि=भागवतादीनि, पिष्ट्वा=चूर्णयित्वा, वेदपुस्तकानि= ऋग्वेदादीनि, विदार्य=छित्त्वा, च, आर्यवंशीयान्=सनातनधर्मानुयायिनः, बलाद्=बलपूर्वकम्, यवनीकुर्वन्ति=यवनान् विदधति, (किम्) तेषाम् एव=तादृशामेव यवनानाम्, चरणयोः=पादयोः, अञ्जलिं बद्ध्वा=करौ संयोज्य, लालाटिकताम्= दासताम्, अङ्गीकुर्याम्=स्वीकुर्याम्? चेद्=यदि, एवम्=इत्थम्, (भवेत्), कुलकलङ्कम्= वंशलाञ्छनम्, क्लीबम्=नपुंसकम्, माम्=शिवम्, धिक्=धिगस्तु, यः=यः शिवः, प्राणभयेन=जीवनभयात्, सनातनधर्मद्वेषिणाम्=वैदिकधर्मविरोधिनाम्, दासेरकताम्= दासताम्, वहेत्=स्वीकुर्यात्। यदि=चेत्, अहम्=शिवः, आहवे=युद्धे, म्रियेय=मृतो भवेयम् वध्येय=मारितो भवेयम्, ताड्येय=ताडितो भवेयम्, वा=अथवा, तदा, एव, अहम्, धन्यः=पुण्यवान् (भवेयम्) च, मम=शिवस्य, पितरौ=जननीजनकौ, धन्यौ=भाग्यशालिनौ (भवेताम्)। कथ्यताम्=उच्यताम्, भवादृशाम्=त्वादृशानाम्, विदुषाम्=प्रज्ञावताम्, अत्र=अस्मिन् विषये, का सम्मतिः=किं मन्तव्यम्, अस्ति?

गोपीनाथः – (विचार्य), राजन्!=नरेश! (त्वम्) धर्मस्य=सनातनधर्मस्य, तत्त्वम्=रहस्यम्, जानासि=वेत्सि, तत्=तस्मात्, अहम्=गोपीनाथः, (अत्र) कामपि सम्मतिम्=किमपि मार्गदर्शनम्, न=नैव, दिदर्शयिषामि=दर्शयितुमिच्छामि। ते=तव, प्रतिज्ञा=प्रतिज्ञानम्, महती=विशाला (वर्तते), तव=भवतः, उद्देश्यम्=लक्ष्यम्, महत्=महत्त्वपूर्णम्, इति=हेतोः, (अहम्) प्रसीदामितमाम्=अतिशयेन प्रसन्नोऽस्मि। नारायणः= भगवान् विष्णुः, तव=भवतः, साहाय्यम्=सहायताम्, विदधातु=करोतु।

शिववीरः– करुणानिधान=दयानिधे! नारायणः=भगवान् विष्णुः स्वयम्, प्रकटीयूय=उत्पन्नो भूत्वा, प्रायेण=प्रायशः, साहाय्यम्=सहायताम्, न, विदधाति=करोति, किन्तु=परन्तु, भवादृशमहाशयद्वारा एव= त्वादृशमहापुरुषमाध्यमेन एव, भवति। तत्=तस्मात्, काऽपि सहायता=किमपि साहाय्यम्, प्रतिज्ञायताम्=(भवान्) प्रतिजानातु। गोपीनाथः – राजन्!= शिवराज!, कथ्यताम्=उच्यताम्, अहम्=गोपीनाथः, किम्कुर्याम्=विदध्याम्, परम्=किन्तु, यथा=येन विधिना, माम्, अधर्मः=पापम्, न, स्पृशेत्=स्पृष्टं कुर्यात्, तथा एव=तेनैव प्रकारेण, विधास्यामि=करिष्यामि। शिववीरः,– पापम्=किल्विषम्, शान्तम्= शाम्यतु। अत्र=अस्मिन् कर्मणि, अधर्मः=पापम्, कः=कोऽस्ति? न कोपीत्यर्थः। केवलम्, श्वः=परेद्युः, अस्मिन्=एतस्मिन्, उद्यानप्रान्तस्थपटकुटीरे= उपवनैकभाग–स्थोपकार्यायाम्, यवनसेनापतिः= यवनसेनानायकः, अपजलखानः, आनेयः= आनेतव्यः, यथा=येन प्रकारेण, एकाकिना=एकलेन, तेन=यवनसेनापतिना, अहम्=शिवः, एकाकी=एकलः, मिलित्वा=संगतं विधाय, किमपि=किञ्चिदपि, आलपामि=संवादं करोमि। गोपीनाथः – तत्=यथोक्तम् तत्, सम्भवति=कर्तुं शक्यते।

**समासविग्रहाः –** इष्टश्चासौ देवः (कर्म.), अस्माकम् इष्टदेवः, तस्य मूर्तिः (ष.त), ताः। न पक्कणम् अपक्कणम्, अपक्कणं पक्कणमिव कृत्वा पक्कणीकृत्य (गतितत्पु.)। सनातनधर्मस्य द्वेषिणः सनातनधर्मद्वेषिणः

(ष.त.)। माता च पिता च इति पितरौ (एकशेषद्वन्द्वः)। उद्यानप्रान्ते तिष्ठतीति उद्यानप्रान्तस्थः (उपतत्पु.) स चासौ पटकुटीरः, तस्मिन् (कर्मधारय)।

**व्याकरणम् –** अनुमन्यते – अनु+मन्+लट्+त। भङ्क्त्वा – भञ्ज्+क्त्वा >ल्यप्। समुन्मूल्य=सम्+उत्+मूल्+क्त्वा > ल्यप्। पक्कणीकृत्य=पक्कण+च्वि+ कृ+ क्त्वा > ल्यप्। पिष्ट्वा=पिश्+क्त्वा। विदार्य – वि+दृ+क्त्वा > ल्यप्। बद्ध्वा – बध्+क्त्वा। म्रियेय – मृ+विधिलिङ्+इड्। वध्येय – हन् (वध्)+वि.लि.+इड् (कर्मणि)। ताड्येय – ताड्+णिच्+वि.लि.+इड् (कर्मणि)।

**विशेषः –** अस्मिन् गद्यांशे यावनात्याचाराणां चरमप्रकर्षः सूच्यते शिववीरश्च "धर्मं न त्येजज्जीवितस्यापि हेतो"– रित्युक्तिं चरितार्थयन् लक्ष्यते। 'ये अस्मदिष्टदेवमूर्तीर्भङ्क्त्वा" यवनीकुर्वन्ति' इत्यत्र दीपकालंकारः।

**सरलार्थः –** शिववीरः अवदत् – भगवन्! कश्चन यवनराजः एवं कथयेत्, परं किं भवानपि माम् एतदर्थमनुमन्यते यत् ये अस्माकम् इष्टदेवानां मूर्तीः त्रोटयित्वा, मन्दिराणि समुत्खाय, तीर्थस्थलानि च शबरनिवासस्थलानि विधाय, पुराणानि च चूर्णीकृत्य, वेदान् च विदार्य आर्यवंशीयान् बलपूर्वकं यवनान् कुर्वन्ति तेषामेव यवनानां चरणयोः अञ्जलिं बद्ध्वा किं दासतां स्वीकुर्याम्? यदि एवं क्रियते चेत् कुलकलङ्कं क्लीबं मां धिगस्तु, यः प्राणभयात् सनातनधर्मद्वेषिणां दासतां स्वीकुर्यात्। (अतोऽपेक्षया) यदि अहम् युद्धे मृतो मारितो वा भवेयम्, उत ताडितो भवेयम्; तदा अहं धन्योऽस्मि मम पितरौ चापि धन्यौ स्तः। (भवान्) कथयतु अस्मिन् विषये भवादृशां विदुषां का सम्मतिरस्ति। गोपीनाथः किञ्चित् कालं विचार्य अवदत्" राजन्! भवान् धर्मस्य तत्त्वं जानाति; तदहम् अत्र विषये न कामपि सम्मतिं दातुमिच्छामि। तव प्रतिज्ञा श्लाघनीया वर्तते, तव उद्देश्यं चापि प्रशस्यमस्ति; अतोऽहं त्वयि अतिशयेन प्रसन्नोऽस्मि। भगवान् नारायणः तव सहायतां कुर्यात्। शिववीरः अवदत्–दयानिधे! नारायणः स्वयं प्रकटीभूय प्रायः सहायतां न करोति, किन्तु भवादृशानां सज्जनानां माध्यमेन एव। तस्मात् कामपि सहायतां प्रतिजानातु भवान्। गोपीनाथोऽवदत् राजन्! कथयतु भवान्, अहं किं कुर्याम्; परं निर्दिशतु भवान्; यथा अधर्मः मां न स्पृशेत्; अहं तथैव विधास्यामि। शिववीरः अवदत् – पापं शाम्यतु। अत्र कोऽपि अधर्मः नास्ति। केवलं श्वः अस्मिन् उद्यानप्रान्ते विद्यमाने पटकुटीरे अपजलखानम् आनयतु भवान्; येन एकान्ते अहं तेन मिलित्वा किमपि आलपामि। गोपीनाथ आह इदं संभवति।

**मूलम् – ततः परं गोपीनाथेन सह शिववीरस्य बहुविधा आलापा अभूवन्, यैः शिववीरस्य उदारहृदयतां धार्मिकतां शूरताञ्चावगत्य गोपीनाथोऽतितरां पर्य्यतुष्यत्।**

**अथ स तमाशीर्भिरनुयोज्य यावत्प्रतिष्ठते, तावदुपातिष्ठत् ससहचरस्तानरङ्गः। गोपीनाथस्तु तमनवलोकयन्निव तस्मिन्नेव निशीथे दुर्ग्गादवातरत्। कपटगायको गौरसिंहस्तु शिववीरेण सह बहुश आलप्य, सेनाऽभिनिवेश–विषये च सम्मन्त्र्य, तदाज्ञातः स्ववासस्थानं जगाम।**

**शिववीरोऽप्यन्यसेनापतीन् यथोचितमादिश्य, स्वशयनागारं प्रविश्य होरात्रयं यावत्किञ्चन निद्रासुखमनुभूय, अल्पशेषायामेव रजन्यामुदतिष्ठत्।**

**शिववीरसेनास्तु यथासंकेतं प्रथममेव इतस्ततो दुर्गप्राचीरान्तरालेषु गहन–लता–जालेषु उच्चावच–भूभाग–व्यवधानेषु सज्जाः पर्यवातिष्ठन्त। बहवो अश्वारोहा यवन–पट–कुटीर–कदम्बकं परिक्रम्य ततः पश्चादागत्य, अवसरं प्रतिपालयन्ति स्म।**

**प्रसङ्गः –** अत्र शिववीरेण सह वार्तां विधाय गतवति गोपीनाथे तानरङ्गः शिवराजमुपैति इति वर्णयति –

**व्याख्या –** ततः परम्=तदनन्तरम्, गोपीनाथेन=पण्डितवर्येण, सह=साकम्, बहुविधाः=नानाविधाः, आलापाः=संवादाः, अभूवन्=संजाताः, यैः=आलापैः, शिववीरस्य=शिवस्य, उदारहृदयताम्=विशालहृदयताम्,

धार्मिकताम्=धर्मपरायणताम्, शूरताम्=वीरताम्, च, अवगत्य=विज्ञाय, गोपीनाथः, अतितराम्=अतिशयेन, पर्य्यतुष्यत्=सन्तुष्टोऽभूत्। अथ=अनन्तरम्, सः=गोपीनाथः, तम्=शिववीरम्, आशीर्भिः=शुभाशंसैः, अनुयोज्य=संयोज्य, यावत्=यावत्कालम्, प्रतिष्ठते=प्रस्थानं करोति, तावत्=तदैव, ससहचरः=सहचरेण सह, तानरङ्गः=गायकवेषो गौरसिंहः, उपातिष्ठत्=उपागच्छत्। गोपीनाथः, तु, तम्=तानरङ्गम्, अनवलोकयन्= अपश्यन्, इव, तस्मिन्नेव, निशीथे=अर्धरात्रौ, दुर्गात्=कोट्टात्, अवातरत्= अवारोहत्। कपटगायकः=छलेन गानकर्मरतः, गौरसिंहः, तु, शिववीरेण, सह=साकम्, बहुशः=बहुधा आलप्य=संवादं विधाय, सेनाऽभिनिवेशविषये= चमूयोजनाविषये, च, सम्मन्त्र्य=सम्यक् मन्त्रयित्वा, तदाज्ञातः=तदनुमतः, स्ववासस्थानम्= निजावासस्थलम्, जगाम=ययौ।

शिववीरः=शिवराजः, अपि, अन्यसेनापतीन्=अन्यसेनानायकान्, यथोचितम्=समुचितम्, आदिश्य=आज्ञाप्य, स्वशयनागारम्= निजशयनकक्षम्, प्रविश्य=प्रवेशं कृत्वा, होरात्रयम्=त्रिहोरापर्यन्तम्, यावत्, किञ्चन=ईषत्, निद्रासुखम्=स्वापानन्दम्, अनुभूय=लब्ध्वा, अल्पशेषायाम्=किञ्चिदवशिष्टायाम्, एव, रजन्याम्=रात्रौ, उदतिष्ठत्=उत्थितोऽभूत्। शिववीरसेनाः= शिववीरसैन्यानि, तु, प्रथमम् एव=पूर्वमेव, इतस्ततः=यत्र तत्र, दुर्गप्राचीरान्तरालेषु=कोट्टवेष्टनाय निर्मितभित्तिमध्यभागेषु, गहनलताजालेषु= संकीर्णवल्लीसमूहेषु, उच्चावचभूभाग– व्यवधानेषु=उन्नतावनतभूमिप्रदेशव्यवहितभागेषु, सज्जाः=सन्नद्धाः पर्यवातिष्ठन्त= परितः स्थिताः अजायन्त। बहवः=अनेके, अश्वारोहाः=सादिनः, यवनपटकुटीर– कदम्बकम्= यवनसेनोपकार्यासमूहम्, परिक्रम्य=परिभ्रम्य, ततः=तदनन्तरम्, पश्चादागत्य=प्रत्यागत्य, अवसरम्=समुचितं कालम्, प्रतिपालयन्ति स्म=प्रतीक्षन्ते स्म।

**समासविग्रहाः –** सहचरेण सहितः ससहचरः (बहु.) कपटेन गायकः कपटगायकः (तृ.त.)। सेनायाः अभिनिवेशः, तस्य विषयः (ष.त.), तस्मिन्। अल्पः शेषः यस्याः सा (बहु.), ताम्। उच्चाश्च अवचाश्च उच्चावचाः (द्वन्द्वः) ते च भूभागाः (कर्म.), तेषां व्यवधानानि (ष.त.) तेषु। गहनाश्च ताः लताः गहनलताः (कर्म.), तेषां जालानि (ष.त.) तेषु। यवनानां पटकुटीराः, तेषां कदम्बकम् (ष.त.)।

**व्याकरणम् –** आलापाः – आङ्+लप्+घञ्+जस्। शूरताम् – शूर+तल्+ टाप्+अम्। अवगत्य – अव+गम्+क्त्वा > ल्यप्। अनुयोज्य – अनु+युज्+क्त्वा > ल्यप्। प्रतिष्ठते – प्र+स्था+तट्+त। उपातिष्ठत् – उप+स्था+लङ्+तिप्। अनवलोकयन् – नञ्+अव+लोक्+णिच्+शतृ+सु। गायकः – गै+ण्वुल् > अक+सु। आलप्य – आ+लप्+क्त्वा > ल्यप्। अनुभूय – अनु+भू+क्त्वा > ल्यप्। उदतिष्ठत् – उद्+स्था+लङ्+तिप्। पर्यवातिष्ठन्त – परि+अव+स्था+लङ्+झ। प्रतिपालयन्ति – प्रति+पाल्+णिच्++लट्+झि।

**विशेषः –** अत्र गद्यांशे शिवसैनिकानां व्यूहरचनाकौशलं द्योत्यते।

**सरलार्थः –** ततः परं गोपीनाथेन सह शिववीरस्य बहुविधः संवादोऽभूत्; येन च शिववीरस्य उदारतां धार्मिकतां शौर्यं च ज्ञात्वा गोपीनाथः अत्यन्तं सन्तुष्टोऽभवत्।

ततश्चासौ तम् आशीर्भिः संयोज्य यावत् प्रतिष्ठते तावत् सहचरेण सह तानरंगः आगच्छति गोपीनाथस्तु तम् अपश्यन् इव तस्यामेव अर्धरात्रौ दुर्गाद् अवातरत्। कपटगायकः गौरसिंहस्तु शिववीरेण सह बहुधा संवादं विधाय, सेनासज्जाविषये च मन्त्रणां विधाय, तदाज्ञानुसारं स्ववासस्थानमगच्छत्।

शिववीरोऽपि अन्यान् सेनापतीन् समुचितम् आदिश्य स्वशयनभवनं प्रविश्य होरात्रयं यावत् किंचित् निद्रासुखम् अनुभूय अल्पशेषायामेव रात्रौ उदतिष्ठत्।

शिववीरसेनास्तु संकेतानुसारं पूर्वमेव इतस्ततः दुर्गप्राचीरमध्यभागेषु गहनेषु लतागुल्मेषु उच्चावचभूभागव्यवधानेषु च सज्जाः परितः स्थिताः अभूवन्। बहवः अश्वारोहाः यवनानां पटकुटीरसमूहं परिक्रम्य ततः प्रत्यागत्य अवसरं प्रतीक्षन्ते स्म।

**मूलम् – इतश्च सूर्यप्रभाभिररुणी–क्रियमाणे भूभागे अरुण–श्मश्रवोऽपि सेनाः सज्जीकृतवन्तः।**

**बहवो–''वयमद्य शिवमश्वयमेव विजेष्यामहे; परं तथाऽपि न जानीमहे किमिति कम्पत इव हृदयम्, अहो ! विलक्षणः प्रताप एतस्य, पवनेऽपि प्रवहति, पतत्रेऽपि पतति, पत्रेऽपि मर्मरीभवति, स एवाऽऽगत इत्यभिशङ्क्यतेऽस्माभिः। अहह!! विचित्रोऽयं वीरो, यो दुर्गप्राचीरमुल्लंघ्य, प्रहरिपरीवारमविगणय्य, लोहार्गलशृंखला– सहस्र–नद्धानि करि–कुम्भाघातसहानि द्वाराणि प्रविश्य, विकोशचन्द्रहासाऽसिधेनुका–रिष्टितोमर–शक्तित्रिशूल–मुद्गर–भुशुण्डी–कराणां रक्षकाणां मण्डलमवहेल्य, प्रियाभिः सह पर्य्यङ्केषु सुप्तानामपि प्रत्यर्थिनां वक्षःस्थलमारोहति, निद्रास्वपि तान् न जहाति, स्वप्नेष्वपि च विदारयति। कथमेतस्य चञ्चच्चन्द्रहास–चमत्कार–चाकचक्य– चिल्लीभूत–चक्षुष्काः समराङ्गणे स्थास्यामः ? इति चिन्ताचक्रमारूढा अपि कथं कथमपि कैश्चित् वीरवरैर्वर्धितोत्साहाः समरभूमिमवातरन्।**

**प्रसङ्गः –** अत्र शिवेन सह युद्धाय यवनसेनायाः सज्जां वर्णयति कविः–

**व्याख्या –** इतः, च, सूर्यप्रभाभिः=रविकान्तिभिः, अरुणीक्रियमाणे= रक्तीक्रियमाणे, भूभागे=भूमिप्रदेशे, अरुणश्मश्रवः=रक्तकूर्चकाः, अपि, सेनाः=सैन्यानि, सज्जीकृतवन्तः=सन्नद्धीकृतवन्तः।

बहवः=अनेके, ''वयम्=यवनसैनिकाः, अद्य=अस्मिन् दिने, शिवम्= शिववीरम्, अवश्यमेव=निश्चितमेव, विजेष्यामहे=पराजितं करिष्यामः, परम्, तथापि=पुनरपि, न=नैव, जानीमहे=जानीमः, किमिति=कथमिति, हृदयम्=मनः, कम्पते इव=वेपते इव, अहो! एतस्य=अस्य शिवस्य, प्रतापः=तेजः, विलक्षणः=अद्भुतः (वर्तते), पवने अपि=वायौ अपि, प्रवहति=चलति, पतत्रेऽपि=पक्षिणि अपि, पतति=उत्पतति, पत्रेऽपि=पर्णेऽपि, मर्मरीभवति=मर्मरिति शब्दं कुर्वति, स एव=शिव एव, आगतः=समागतः, इति=इत्थम्, अस्माभिः=यवनसैनिकैः, अभिशङ्क्यते= आशङ्क्यते। अहह! अयम्=एष शिवः, वीरः=शूरः, विचित्रः=अद्भुतः (अस्ति), यः=शिवः, दुर्गप्राचीरम्=दुर्गप्राकारम्, उल्लंघ्य=अतिक्रम्य, प्रहरिपरीवारम्=रक्षिवर्गम्, अविगणय्य=उपेक्ष्य, लोहार्गलश्रृंखलासहस्रनद्धानि=अयश्शृंखलासहस्रबद्धानि, करिकुम्भाघातसहानि=गजमस्तकप्रहारसहनक्षमाणि, द्वाराणि=द्वारि (द्वार्शब्दः), प्रविश्य=प्रवेशं कृत्वा, विकोशचन्द्रहासाऽसिधेनुकारिष्टि– तोमर–शक्ति–त्रिशूल–मुद्गर–भुशुण्डीकराणाम्=निष्कुक्षिखड्गक्षुद्रासि– रिष्टितोमर–शक्ति–त्रिशूल–मुद्गर– भुशुण्डीहस्तानाम्, रक्षकाणाम्=प्रहरिणाम्, मण्डलम्= समूहम्, अवहेल्य=अवहेलनां कृत्वा, प्रियाभिः=कान्ताभिः, सह=सार्धम्, पर्य्यङ्केषु=शय्यासु, सुप्तानाम्=शयानानाम्, अपि, प्रत्यर्थिनाम्=शत्रूणाम्, वक्षःस्थलम्=उरःस्थलम्, आरोहति=आक्रामति, निद्रासु अपि=स्वापेष्वपि, तान्=शत्रून्, न=नैव, जहाति=मुञ्चति, स्वप्नेषु अपि, च, विदारयति= विदीर्णान् करोति। एतस्य=शिवस्य, चञ्चच्चन्द्रहासचमत्कार–चाकचक्य चिल्लीभूतचक्षुष्काः= देदीप्यमानखड्गचमत्कृतिचाकचक्यनिमीलितनेत्राः, समराङ्गणे=युद्धक्षेत्रे, कथम्=केन विधिना, स्थास्यामः=स्थिताः भविष्यामः? इति, चिन्ताचक्रम् आरूढाः=चिन्ताग्रस्ताः, अपि, कथं कथमपि=यथा तथा, कैश्चित्, वीरवरैः=योद्धृश्रेष्ठैः, वर्धितोत्साहा=प्रेरिताः सन्तः, समरभूमिम्= रणाङ्गणम्, अवातरन्=अगच्छन्।

**समासविग्रहाः –** अरुणानि श्मश्रूणि येषां ते अरुणश्मश्रवः (बहु.)। लोहस्य अर्गलाः लोहार्गलाः, तासां शृङ्खलाः, तासां सहस्रम्, तेन नद्धानि (तत्पु.)। करिणां कुम्भाः, तेषाम् आघातः, सहन्ते इति सहानि, करिकुम्भाघातानाम् सहानि करिकुम्भाघातसहानि (ष.त.)। विगतः कोशो यस्य सः विकोशः (बहु.), स चासौ चन्द्रहासः, विकोशचन्द्रहासः (कर्म.), विकोशचन्द्रहासश्च असिधेनुका च रिष्टिश्च तोमरश्च शक्तिश्च त्रिशूलश्च मुद्गरश्च भुशुण्डी च (द्वन्द्व.), विकोशचन्द्र– हासासिधेनुकारिष्टितोमरशक्तित्रिशूल– मुद्गरभुशुण्ड्यः करेषु येषाम्, ते (बहु.)। चञ्चच्चन्द्रहासस्य चमत्कारः, तस्य चाकचक्यम्, तेन चिल्लीभूतानि चक्षूंषि येषां ते चञ्चच्चन्द्रहासचमत्कारचाकचक्यचिल्लीभूतचक्षुष्काः (बहु.)। वर्धितः उत्साहः येषाम् ते वर्धितोत्साहाः (बहु.)।

**व्याकरणम् –** विजेष्यामहे–वि+जि+लृट्+महिङ्। प्रवहति–प्र+वह्+ शतृ+ङि। पतति–पत्+शतृ+ङि। मर्मरीभवति–मर्मर+च्वि+भू+शतृ+ङि। उल्लङ्घ्य= उद्+लधि+क्त्वा > ल्यप्। नद्धानि–णह्+क्त+जस्। अवहेल्य–अव+हेल्+ क्त्वा>ल्यप्। आरूढाः–आङ्+रुह्+क्त+जस्।

**विशेषः –** ''कम्पत हृदयम्'' इत्यत्र उत्प्रेक्षालंकारः। 'पवनेऽपि..........इत्यभिशङ्क्यते' इत्यत्र भ्रान्तिमान् अलंकारः। 'निद्रास्वपि.........विदारयति' इत्यत्र विरोधाभासालंकारः। 'चञ्चच्चन्द्र–चक्षुष्काः' इत्यत्र वृत्त्यनुप्रासः।

**सरलार्थः –** इतस्तु सूर्यस्य प्रकाशेन अरुणीभूतायां भूम्यां रक्तश्मश्रवो यवना अपि स्वसैनिकान् सज्जीकृतवन्तः। बहवः यवनसैनिकास्तु–''अद्य वयं शिवम् अवश्यम् एव पराजितं करिष्यामः, परं न जानीमः अस्माकं हृदयं कथं कम्पते इव; अहो! अस्य प्रतापः विलक्षणः (अस्ति) (अत एव) पवने प्रवहति अपि, खगे उत्पतति अपि, पत्रे मर्मरीभवति अपि सः (शिव) एव आगतः' इति अस्माभिः आशङ्क्यते। ''अहह! विचित्रोऽयं वीरः; यः दुर्गप्राकारम् उल्लंघ्य प्रहरिगणम् उपेक्ष्य लोहार्गलशृंखलासहस्रबद्धानि करिकुम्भानामाघातान् सोढुं योग्यानि द्वाराणि प्रविश्य, कोशरहितखड्गछुरिकारिष्टि–तोमर–शक्ति–त्रिशूल–मुद्गर–भुशुण्डी–कराणां रक्षकाणां समूहम् अवहेल्य प्रियाभिः सह पर्य्यङ्केषु सुप्तानामपि शत्रूणां वक्षःस्थलम् आरोहति निद्रासु अपि तान् न जहाति, स्वप्नेषु अपि च विदारयति। एतस्य चञ्चलखड्गचमत्कारस्य चाकचक्येन चमत्कृतनेत्राः वयं कथं रणाङ्गणे स्थिताः भविष्यामः ? ''इत्येवं प्रकारेण चिन्ताग्रस्ता अपि यथा तथा कैश्चिद् श्रेष्ठवीरैः प्रेरिताः सन्तः युद्धभूमिम् अवातरन्।

**मूलम् – अथ कथंचित् प्रकाश–बहुले संवृत्ते नभःस्थले, परस्परं परिचीयमानासु आकृतिषु, कमलेष्विव विकचतामासादयत्सु वीरवदनेषु, भ्रमरालिष्विव परितः प्रस्फुरन्तीषु असि–पंक्तिषु, चाटकैर–चकचकायितेषु; कवचचमत्कारेषु गोपीनाथ– पण्डितो वारमेकं शिववीरदिशि परतश्च यवनसेनापति–दिशि गतागतं विधाय, सेनाद्वयस्य मध्य एव कस्मिंश्चित् पटकुटीरे अपजलखानमानेतुं प्रबबन्ध।**

**शिववीरोऽपि कौशेय–कञ्चुकस्याऽन्तर्लोह–वर्म परिधाय, सुवर्णसूत्र– ग्रथितोष्णीषस्याऽप्यधस्तादायसं शिरस्त्राणं संस्थाप्य, सिंहनख– नामकं शस्त्रविशेषं करयोरारोप्य, दृढबद्ध–कटिरपजलखान–साक्षात्काराय सज्जस्तिष्ठति स्म।**

**प्रसङ्गः –** अत्र गोपीनाथपण्डितः उभयोः सेनयोर्मध्ये पटकुटीरे अपजलखान शिववीरयोः सम्मेलनं कारयितुम् उपक्रमते–

**व्याख्या –** अथ= अनन्तरम्, कथंचित्=किञ्चित्, प्रकाशबहुले=आलोकपूर्णे, नभःस्थले=गगनतले, संवृत्ते=संजाते, परस्परम्=मिथः, परिचीयमानासु= ज्ञायमानासु, आकृतिषु=मुखमण्डलेषु, कमलेषु=पद्मेषु, इव=यथा, वीरवदनेषु=शूरमुखेषु, विकचताम्=विकासम् पक्षे प्रसन्नताम्, आसादयत्सु=प्राप्तवत्सु, भ्रमरालिषु=मधुकरश्रेणीषु, इव, परितः=सर्वतः, असिपंक्तिषु=खड्गचक्रेषु, प्रस्फुरन्तीषु=देदीप्यमानासु, चाटकैरचकचकायितेषु= 'चकचक' इति ध्वनिविशेषं कुर्वत्सु पक्षिविशेषेषु, कवचचमत्कारेषु=शब्दायमानेषु वर्मसु, गोपीनाथपण्डितः= एतदाख्यः पण्डितः, एकं वारम्=एकदा, शिववीरदिशि=शिववीरकाष्ठायाम्, परतः च=ततश्च, यवनसेनापतिदिशि– अपजलखानदिशायाम्, गतागतम्=गमनागमनम्, विधाय=कृत्वा, सेनाद्वयस्य=उभयोः सेनयोः, मध्ये एव=अन्तराले एव, कस्मिंश्चित् पटकुटीरे=एकस्यामुपकार्यायाम् अपजलखानम्= यवनसेनापतिम्, आनेतुम् प्रबबन्ध=आनयनाय व्यवस्थामकरोत्।

शिववीरः अपि, कौशेयकञ्चुकस्य=कौशेयचोलकस्य, अन्तः= अधस्तात्, लोहवर्म=अयःकवचम्, परिधाय=संधार्य, सुवर्णसूत्रग्रथितोष्णीषस्य= हिरण्यतन्तुछुरितशिरोवेष्टनस्य, अधस्तात्= नीचैः, आयसम्=लोहमयम्, शिरस्त्राणम्=मस्तकरक्षाकवचम्, संस्थाप्य=परिधाय, सिंहनखनामकम्= एतदाख्यम्, शस्त्रविशेषम्= आयुधविशेषम्, करयोः=हस्तयोः, आरोप्य=धृत्वा, दृढबद्धकटिः= सन्नद्धमध्यभागः, (सन्) अपजलखानसाक्षात्काराय=यवनसेनापतिना मिलितुम्, सज्जः=सावधानः, तिष्ठति स्म=प्रतीक्षते स्म।

**समासविग्रहाः –** कवचानां चमत्काराः, तेषु (ष.त.) यवनानां सेनापतिः यवनसेनापतिः, तस्य दिशि (ष.त.) सेनयोः द्वयम् सेनाद्वयम् (ष.त.), तस्य। गतञ्चागतञ्चेति तयो समाहारः गतागतम् (द्वन्द्वः)। दृढेन

बद्धा कटिःयस्य सः दृढबद्धकटिः (बहु.)। सुवर्णस्य सूत्राणि सुवर्णसूत्राणि (ष.त.), तैः ग्रथितः सुवर्णसूत्रग्रथितः (तृ.त.), स चासौ उष्णीषः (कर्म.), तस्य।

**व्याकरणम् –** संवृत्ते – सम्+वृत्+क्त+ङि। परिचीयमानासु – परि+चि+ शानच्+सुप्। आसादयत्सु – आङ्+सद्+णिच्+शतृ+सुप्। प्रस्फुरन्तीषु – प्र+स्फुर्+शतृ+ ङीप्+सुप्। विधाय – वि+धा+क्त्वा>ल्यप्। संस्थाप्य – सम्+स्था+णिच्+ क्त्वा > ल्यप्। बद्ध – बध्+क्त। सज्जः – षञ्ज्+क्त+सु।

**विशेषः** –'कमलेष्विव........... असिपंक्तिषु' इत्यत्रोपमालंकारः।

**सरलार्थः –** ततः आकाशे अत्यधिक प्रसृते प्रकाशे, परस्परं दृष्टिमुपगतासु मुखाकृतिषु, कमलेषु इव वीरवदनेषु प्रफुल्लतामुपगतेषु, भ्रमरपंक्तिषु इव खड्गपंक्तिषु परितः प्रस्फुरन्तीषु, चकचकायमानेषु चाटकैरपक्षिषु, शब्दायमानेषु कवचेषु (सत्सु) गोपीनाथपण्डितः एकवारं शिववीरस्य दिशायाम् ततश्च यवनसेनापतिदिशायां गतागतं विधाय उभयोः सेनयोर्मध्ये एकस्याम् उपकार्यायाम् अपजलखानम् आनेतुं व्यवस्थामकरोत्।

शिववीरः अपि कञ्चुकस्य अधस्तात् लोहकवचं परिधाय, सुवर्णसूत्रछुरितोष्णीषस्य अधः लोहमयं शिरस्त्राणं करयोः च, सिंहनखनामकं शस्त्रविशेषं धारयित्वा कटिं दृढं बद्ध्वा अपजलखानस्य साक्षात्काराय सज्जः तिष्ठति स्म।

**मूलम् – अपजलखानोऽपि च–''यदाऽहमेनं साक्षात्कृत्य करताडनमेकं कुर्य्याम्, तदैव तालिकाध्वनि–समकालमेव अमुकामुकैः श्येनैरिवाऽभिपत्य पाशैरेष बन्धनीयः, सेनया च क्षणात् तत्सेना झञ्झया घनघटेवापनेया''। इति संकेत्य, सूक्ष्म–वसन–परिधानः, वज्रक–जटितोष्णीषिकः, गलविलुलितपद्मराग–मालः; मुक्ता–गुच्छ–चोचुम्ब्यमान–भालः, निःश्वासप्रश्वास–परिमथित–मद्यगन्ध–परिपूरित– पार्श्व–देशान्तरालः, शोणश्मश्रुकूर्च– विजित–नूतन–प्रवालः, कञ्चुक–स्यूत–काञ्चन– कुसुम–जालः, विविधवर्ण–वर्णनीय–शिविकामारुह्य निर्दिष्टपटकुटीराभिमुखं प्रतस्थे।**

**इतस्तु कुरङ्गमिव तुरङ्गं नर्त्तयन् रश्मिग्राह–वेषेण गौरसिंहेनाऽनुगम्यमानः माल्यश्रीक–प्रभृतिभिर्वीरवरैर्युद्ध–सज्जैः सतर्कं निरीक्ष्यमाणः शिववीरोऽपि तस्यैव संकेतितस्य समागमस्थानस्य निकटे एव सव्यकरेण वल्गामाकृष्याऽश्वमवारुधत्।।**

**प्रसङ्गः –** अत्र अपजलखानः स्वसैनिकान् कूटयोजनां निर्दिश्य शिववीरेण सह साक्षात्काराय गच्छतिँ

**व्याख्या –** अपजलखानः=यवनसेनानायकः, अपि, च, –यदा=यस्मिन् काले, अहम्= अपजलखानः, एनम्=शिववीरम्, साक्षात्कृत्य=संमिल्य, एकम्, करताडनम्= करतलध्वनिम्, कुर्य्याम्=विदध्याम्, तदा एव=तदानीमेव, तालिकाध्वनि समकालम् एव=करतलध्वनिक्षणे एव, अमुकामुकैः=निर्दिष्टैः जनैः, श्येनैः= पत्त्रिभिः इव, अभिपत्य=आक्रम्य, एषः=अयं शिवः, पाशैः=रज्जुभिः, बन्धनीयः=बद्धःकरणीयः, सेनया=वाहिन्या, च, क्षणात्=शीघ्रमेव, झञ्झया= वात्यया, घनघटा=मेघमाला, इव, अपनेया= नाशितुं योग्या'', इति=इत्थम्, संकेत्य=निर्दिश्य, सूक्ष्मवसनपरिधानः= सूक्ष्मपटधारकः, वज्रकजटितोष्णीषिकः=हीरकखचितशिरोवेष्टनकः, गलविलूलितपद्मरागमालः= कण्ठशोभितशोणरत्नमाल्यः, मुक्तागुच्छचो– चुम्ब्यमानभालः= मौक्तिकस्तबकसंस्पृश्यमानललाटः, निःश्वास–प्रश्वास– परिमथित–मद्य–गन्ध–परिपूरित– पार्श्वदेशान्तरालः=निःश्वासोच्छ्वा– सालोडितमदिरावासभरितसमीपस्थभूभागः, शोणश्मश्रुकूर्चविजितनूतनप्रवालः= रक्तश्मश्रुकूर्चतिरस्कृतनवपत्रः, कञ्चुकस्यूतकाञ्चनकुसुमजालः= चोलकछूरित– स्वर्णिमपुष्पसमूहः, विविधवर्णवर्णनीयशिविकाम्=नानावर्णवर्ण्यमनुष्यवाह्ययानम्, आरुह्य= उपविश्य, निर्दिष्टपटकुटीराभिमुखम् =दर्शितोपकार्याभिमुखम्, प्रतस्थे=प्रचचाल।

इतः तु=अपरतः तु, कुरङ्गम्=मृगम्, इव, तुरङ्गम्=अश्वम्, नर्त्तयन्= नर्तनं कारयन्,

रश्मिग्राहवेषेण=वल्गाधारिवेषेण, गौरसिंहेन, अनुगम्यमानः= पश्चादनुसर्यमाणः, युद्धसज्जैः=संग्रामाय तत्परैः, माल्यश्रीकप्रभृतिभिः= माल्यश्रीकादिभिः, वीरवरैः=योद्धृश्रेष्ठैः, सतर्कम्=सावधानम्, निरीक्ष्यमाणः= अवलोक्यमानः, शिववीरः=शिवराजः, अपि, तस्य एव=पूर्वोक्तस्य एव, संकेतितस्य=निश्चितस्य, समागमस्थानस्य=सम्मेलनस्थलस्य, निकटे एव=समीपे एव, सव्यकरेण=वामहस्तेन, वल्गाम्=रश्मिम्, आकृष्य=आकर्षणं कृत्वा, अश्वम्=हयम्, अवारुधत्=अरुधत्।

**समासविग्रहाः** – तालिकायाः ध्वनिः, तस्य समकालम् तालिकाध्वनि– समकालम् (ष.त.)। सूक्ष्माणि च तानि वसनानि सूक्ष्मवसनानि (कर्म.), तेषां परिधानानि यस्य सः सूक्ष्मवसनपरिधानः (बहु.)। वज्रकैः जटितः उष्णीषः यस्य स वज्रकजटितोष्णीषिकः (बहु.)। पद्मरागमाला यस्य सः (बहु.)। मद्यस्य गन्धः मद्यगन्धः (ष.त.), निःश्वासाश्च प्रश्वासाश्च निःश्वासप्रश्वासाः (द्वन्द्वः), निःश्वासप्रश्वासैः परिमथितः निःश्वासप्रश्वासपरिमथितः (तृ.त.), स चासौ मद्यगन्धः (कर्मः), तेन परिपूरितः पार्श्वदेशान्तरालः येन सः (बहु.)। शोणश्मश्रुकूर्चाभ्यां विजितः नूतनप्रवालः येन सः (बहु.)। काञ्चनस्य इदम् काञ्चनम्, काञ्चनानि कुसुमानि काञ्चनकुसुमानि (कर्म.), तेषां जालम् काञ्चनकुसुमजालम् (ष.त.) कञ्चुके स्यूतं काञ्चनकुसुमजालम् यस्य सः (बहु.)।

**व्याकरणम्** – साक्षात्कृत्य – साक्षात्+कृ+क्त्वा > ल्यप्। अभिपत्य – अभि+पत्+क्त्वा>ल्यप्। बन्धनीयः – बन्ध्+अनीयर्+सु। अपनेया – अपनेतुं योग्या, अप+नी+यत्+टाप्। परिधानः – परि+धा+ल्युट्+सु। चोचुम्ब्यमानः – चुबि+यङ्+शानच्+सु। निःश्वास – निर्+श्वस्+घञ्। विजित – वि+जि+क्त। प्रतस्थे – प्र+स्था+लिट्+त। नर्त्तयन् – नृत्+णिच्+शतृ+सु। अनुगम्यमानः – अनु+गम्+शानच्+सु।

**विशेषः** – 'अमुकामुकैः श्येनैरिवाभिपत्य' 'सेनया च क्षणात्.........नेया' 'कुरङ्गमिव.........नर्त्तयन्' च इत्यत्र पूर्णोपमा अलंकारः। समासबाहुल्यादत्र पाञ्चालीरीतिरस्ति।

**सरलार्थः** – अपजलखानोऽपिच – "यथैव अहं तेन (शिवेन) मिलित्वा एकं करतलध्वनिं कुर्याम्, तदैव करतालिकाध्वनिना सार्धमेव श्येनैरिव अमुकामुकैः वीरैः सहसा आक्रम्य अस्य बन्धनं कार्यम्, सेना च तत्क्षणं झञ्झा घनघटामिव तत्सेनां नाशयतु इति निर्दिश्य सूक्ष्मवस्त्राणि दधानः, हीरकखचितोष्णीषं दधानः, कण्ठे धृतपद्मरागमणिमालः मुक्तास्तबकेन चोचुम्ब्यमानभालः, निःश्वासप्रश्वासाभ्यां निःसृतेन मद्यगन्धेन समीपस्थान् भूभागान् पूरयन्, रक्तश्मश्रुकूर्चाभ्यां तिरस्कृत– नवपल्लवः कञ्चुके स्यूतकाञ्चनकुसुमजालः विविधवर्णैः वर्णनीयां शिविकाम् आरुह्य निर्दिष्टपटकुटीरं प्रति चचाल। अपरतः हरिणमिव अश्वं नर्त्तयन्, सारथिवेषेण गौरसिंहेन अनुगम्यमानः युद्धाय तत्परैः माल्यश्रीकादिभिः वीरश्रेष्ठैः सावधानतया विलोक्यमानश्च शिववीरः अपि तस्य एव संकेतितस्य सम्मेलनस्थलस्य निकटे एव वामकरेण रश्मिमाकृष्य अश्वम् अरुधत्।

**मूलम् – ततस्तु, इतोऽश्वात् शिववीरः, ततस्तु शिविकातोऽपजलखानः अपि युगपदेवावातरताम्, परस्परं साक्षात्कृत्य च, उभावप्युत्सुकाभ्यां नयनाभ्याम्, सत्वराभ्यां पादाभ्याम्, स्वागताऽऽम्रेडनतत्परेण वदनेन, आश्लेषाय प्रसारिताभ्यां च हस्ताभ्यां कौशेयास्तरण–विरोचितायां बहिर्वेदिकायां धावमानौ परस्परमालिलिङ्गतुः।**

**शिववीरस्तु आलिङ्गन–च्छलेनैव स्वहस्ताभ्यां तस्य स्कन्धौ दृढं गृहीत्वा सिंहनखैर्जत्रुणी कन्धरा च व्यपाटयत्' रुधिरदिग्धं च तच्छरीरं कटि–प्रदेशे समुत्तोल्य भूपृष्ठेऽपोथयत्।**

**प्रसङ्गः** – अत्र आलिङ्गनव्याजेन शिववीरः अपजलखानं हन्ति –

**व्याख्या** – ततः तु=तदनन्तरं तु, इतः=एकतः, अश्वात्=हयात्, शिववीरः, ततः=अपरतः, तु, शिविकातः=मनुष्यवाह्ययानात्, अपजलखानः अपि, युगपत्=समम्, एव, अवातरताम्=अवारुहताम्, परस्परम्=मिथः, साक्षात्कृत्य=दृष्ट्वा, च, उभौ अपि=द्वावपि, उत्सुकाभ्याम्=उत्कण्ठिताभ्याम्, नयनाभ्याम्=नेत्राभ्याम्, सत्वराभ्याम्=तीव्राभ्याम्, पादाभ्याम्=चरणाभ्याम्, स्वागताम्रेडनतत्परेण= मुहुर्मुहुः स्वागतवचनपरेण, वदनेन=मुखेन, आश्लेषाय=आलिङ्गनाय, प्रसारिताभ्याम्= विस्तारिताभ्याम्, च,

हस्ताभ्याम्=कराभ्याम्, कौशेयास्तरण– विरोचितायाम्= कौशेयप्रच्छदसुशोभितायाम्, बहिर्वेदिकायाम्=बहिरङ्गणे, धावमानौ=वेगेन गच्छन्तौ, परस्परम्=अन्योन्यम्, आलिलिङ्गतुः=आलिङ्गनम् अकुरुताम्।

शिववीरः तु आलिङ्गनच्छलेन=आश्लेषव्याजेन, एव, स्वहस्ताभ्याम्= निजकराभ्याम्, तस्य=अपजलखानस्य, स्कन्धौ=अंसौ, दृढं=दृढतया गृहीत्वा=ग्रहणं कृत्वा, सिंहनखैः=व्याघ्रनखात्मकैः शस्त्रविशेषैः, जत्रुणी=अंसयोः सन्धी, कन्धराम्=ग्रीवाम्, च, व्यपाटयत्=व्यदारयत्, रुधिरदिग्धम्=रक्तपूर्णम् च, तच्छरीरम्=तद्देहम्, कटिप्रदेशे=शरीरमध्यभागे, समुत्तोल्य=उत्त्थाप्य, भूपृष्ठे=भूतले, अपोथयत्= अपातयत्।

**समासविग्रहाः –** सु आगतम् स्वागतम्, तस्य आम्रेडनम् स्वागताम्रेडनम्, तस्मिन् तत्परः (तत्पु.), तेन। कौशेयं च तद् आस्तरणम् कौशेयास्तरणम् (कर्म), तेन विरोचिता (तृ.त.), तस्याम्। आलिङ्गनस्य छलम् आलिङ्गनच्छलम् (ष.त.), तेन। रुधिरेण दिग्धम् रुधिरदिग्धम् (ष.त.)। तस्य शरीरम् तच्छरीरम् (ष.त.)।

**व्याकरणम् –** अवातरताम् – अव+तृ+लङ्+तस्। आश्लेषाय – आङ्+ श्लिष्+घञ्+ङे। धावमानौ – धाव्+शानच्+औ। व्यपाटयत् – वि+पट्+णिच्+ लङ्+तिप्। दिग्ध – दिह्+क्त। समुत्तोल्य – सम्+उत्+तुल्+णिच्+क्त्वा>ल्यप्। अपोथयत्=पुथ्+णिच्+लङ्+तिप्।

**सरलार्थः–** ततः एकतः अश्वात् शिववीरः अपरतः तु शिविकातः अपजलखानश्च युगपदेव अवातरताम् परस्परं च दृष्ट्वा, उभावपि उत्सुकाभ्याम् नयनाभ्याम् सत्वराभ्यां पादाभ्याम्, पौनःपुन्येन स्वागतकथनपरेण मुखेन आलिङ्गनार्थं प्रसारिताभ्यां हस्ताभ्याम् कौशेयप्रच्छदसुशोभिताम् बहिर्वेदिकायां धावमानौ परस्परम् आलिङ्गनम् अकुरुताम्।

शिववीरः तु आलिङ्गनव्याजेन एव स्वहस्ताभ्यां तस्य स्कन्धौ दृढं गृहीत्वा सिंहनखैः अंसयोः सन्धी कन्धरां च व्यदारयत्; रुधिरेण व्याप्तं तस्य शरीरञ्च भुवि अपातयत्।

**मूलम् – तत्क्षणादेव च शिववीरध्वजिन्यां महाध्वज एकः समुच्छ्रितः। तत्समकालमेव यवन–शिविरस्य पृष्ठस्थिता शिववीर–सेना शिविरमग्निसात्कृतवती, पुरःस्थितसेनासु च अकस्मादेव महाराष्ट्र–केसरिणः समपतन्। तेषां 'हरहर–महादेव' गर्जनपुरस्सरं छिन्धि–भिन्धि–मारय–विपोथय इति कोलाहलः, प्रत्यर्थिनां च 'खुदा–तोबा–अल्लादि' पारस्य–पदमयःकलकलो रोदसी समपूरयत्।**

**प्रसङ्गः –** अपजलखानवधानन्तरं शिवसेनायाः आक्रमणं ततश्चोभयोः सेनयोः कोलाहलश्चात्र वर्ण्यते –

**व्याख्या –** तत्क्षणादेव=तत्कालमेव च, शिववीरध्वजिन्याम्= शिववीरसेनायाम्, एकः, महाध्वजः=विशालपताका, समुच्छ्रितः=समुत्तोलितः। तत्समकालमेव= तदानीमेव, यवनशिविरस्य=यवनोपकार्यायाः, पृष्ठस्थिताः= पश्चाद्वर्त्तमानाः शिववीरसेना=शिवराजवाहिनी, शिविरम्=यवनोपकार्याम्, अग्निसात् कृतवती=अदहत्, पुरःस्थितसेनासु=पुरस्ताद्वर्तमानवाहिनीषु, च, अकस्मादेव=सहसैव, महाराष्ट्रकेसरिणः=महाराष्ट्रसिंहाः, समपतन्=आक्रमणम् अकुर्वन्। तेषाम्=महाराष्ट्राणाम्, 'हरहर–महादेव', गर्जनपुरस्सरम्=उच्चारणपूर्वकम्, छिन्धि=छेदनं कुरु, भिन्धि=भेदनं कुरु, मारय=संहर, विपोथय=पातय, इति=एवम्, कोलाहलः=कलकलः, प्रत्यर्थिनाम्=शत्रूणाम्, च खुदा–तोबा–अल्लादि' पारस्यपदमयः= भाषाविशेषशब्दपूर्णः, कलकलः=कोलाहलः रोदसी=द्यावापृथिवी, समपूरयत्=पूर्णमकरोत्।

**समासविग्रहाः –** शिववीरस्य ध्वजिनी शिववीरध्वजिनी (ष.त.), तस्याम्। यवनानां शिविरम् यवनशिविरम् (ष.त.), तस्य। पुरःस्थिता चासौ सेना पुरःस्थित सेना (कर्म.)। महाराष्ट्रस्य केसरिणः महाराष्ट्रकेसरिणः (ष.त.)।

**व्याकरणम् –** समुच्छ्रितः – सम्+उद्+श्रि+क्त+सु। स्थिता – स्था+क्त+टाप्। समपतन् – सम्+पत्+लङ्+झि। छिन्धि – छिद्+लोट्+सिप्। भिन्धि – भिद्+लोट्+सिप्। मारय – मृ+णिच्+लोट्+सिप्। विपोथय – वि+पुथ्+णिच्+लोट्+ सिप्। समपूरयत् – सम्+पूर्+णिच्+लङ्+तिप्।

**विशेषः –** अत्र शिवसैनिकानां तत्परत्वं सूच्यते।

**सरलार्थः –** तदानीमेव शिववीरसेनायाम् एकः महाध्वजः उत्तोलितः, तत्समकालमेव यवनशिविरस्य पश्चाद् वर्तमानाः शिवसैनिकाः यवनशिविरमदहन्; पुरः स्थितासु सेनासु च अकस्मादेव महाराष्ट्रसिंहाः आक्रमणं कृतवन्तः। तेषां 'हर हर महादेव' इति गर्जनपुरस्सरं छिन्धि भिन्धि मारय विपोथय इति कोलाहलः शत्रूणां च 'खुदा तोबा अल्लादि' फारसी शब्दमयः कलकलः दिवं भुवं च अपूरयत्।

**मूलम् – ततो यवन–सेनासु शतशः सादिनः, गगनं चोचुम्ब्यमानाः, कृत–दिगन्त प्रकाशाः कडकडा–ध्वनि–धर्षित–प्रान्त–प्रजाः उड्डीयमान–दन्दह्यमान– परस्सहस्र–पटखण्ड–विहित–हैम–विहङ्गम–विभ्रमाः ज्योतिरिङ्गणायित– परस्कोटि–स्फुलिङ्ग–रिङ्गित–पिङ्गीकृतप्रान्ताः दोधूयमान–धूम–घटा–पटल–परिपात्यमान–भसित–सितीकृतानोकहाः, सकलकलध्वनिपलायमानैः पतत्रिपटलैरिव सोसूच्यमानाः शिविरघस्मरा ज्वालामाला अवलोक्य, सहाहाकारं तदभिमुखं प्रयाताः अपरे च महाराष्ट्राऽसि–भुजङ्गिनीभिः दन्दश्यमानाः, केचन "त्रायस्व, त्रायस्व" इति साम्रेडं व्याहरमाणाः पलायमानाः, अन्ये धीरा वीराश्च–"तिष्ठत रे तिष्ठत धूर्तधुरीणाः! महाराष्ट्रहतकाः! किमिति चौरा इव लुण्ठका इव दस्यव इव च यवनसेनापतिमाक्राम्यथ? समागच्छत सम्मुखम्, यथा शाम्येदस्मच्चन्द्रहासानां चिरप्रवृद्धा महाराष्ट्ररुधिराऽऽस्वाद–तृषा' इति सक्ष्वेडं सङ्गर्ज्य, युद्धाय सज्जाः समतिष्ठन्त।**

**तेषां चाऽश्वानां सव्यापसव्यमार्गैः खुरक्षुण्णा व्यदीर्यत वसुधा। खड्ग–खटखटाशब्दैः सह च प्रादुरभूवन् स्फुलिङ्गा। रुधिरधाराभिः जपासुमन– स्समाच्छन्नमिवाभूद्रणाङ्गणम्।**

**प्रसङ्ग –** प्रारब्धे युद्धे यवनसेनायाः स्थितिं वर्णयति –

**व्याख्या –** ततः=तदनन्तरम्, यवनसेनासु=यवनवाहिनीषु, शतशः=शतानि, सादिनः=अश्वारोहाः, गगनम्=आकाशम्, चोचुम्ब्यमानाः=पुनः पुनः चुम्ब्यमानाः, कृतदिगन्तप्रकाशाः= द्योतिताशाः, कडकडाध्वनिधर्षितप्रान्तप्रजाः= कडकडेतिध्वनित्रासितसमीपस्थजनाः, उड्डीयमान–दन्दह्यमान परस्सहस्रपटखण्ड– विहितहैमविहङ्गमविभ्रमाः=उद्गच्छरिः गर्हितं दहद्भिश्च परस्सहस्रवस्त्रांशैः कृतस्वर्णिमपक्षिभ्रमाः, ज्योतिरिङ्गणायितपरस्कोटिस्फुलिङ्गरिङ्गित–पिङ्गीकृत– प्रान्ताः=खद्योतायित कोट्यधिकवह्निकणोद्गमनपिती– कृतप्रदेशाः, दोधूयमान–धूम–घटा–पटल– परिपात्यमान–भसित–सितीकृतानोकहाः= समुत्पतद्धूमपुञ्जविकीर्यमाणभस्मश्वेतीकृतवृक्षाः, सकलकलध्वनिपलायमानैः= सकोलाहलध्वनिधावनपरैः, पतत्रिपटलैः= पक्षिसमूहैः, इव, सोसूच्यमानाः= बोबुध्यमानाः, शिविरघस्मराः= पटकुटीरभक्षणपराः, ज्वालामालाः=ज्वालानां पंक्तीः, अवलोक्य=दृष्टवा, सहाहाकारम्=हाहाकारपूर्वकम्, तदभिमुखम्= शिविराभिमुखम्, प्रयाताः=गताः, अपरे=अन्ये, च, महाराष्ट्रासिभुजङ्गिनीभिः= महाराष्ट्र–सैनिकखड्गसर्पिणीभिः, दन्दश्यमानाः=गर्हितं दश्यमानाः, केचन=केऽपि, "त्रायस्व=रक्ष, त्रायस्व=रक्ष, इति=एवम्, साम्रेडम्=पुनः पुनः, व्याहरमाणाः=शब्दं कुर्वन्तः (क्रन्दन्तः) पलायमानाः=धावन्तः, अन्ये=अपरे, धीराः=धैर्यशालिनः, वीराः=शूराः, च, रे=हीनसम्बोधनम्, धूर्तधुरीणाः=वञ्चकधुरन्धराः।, तिष्ठत, तिष्ठत=स्थितिं कुरुत, महाराष्ट्रहतकाः!=दुष्टमहाराष्ट्राः! किमिति=कथम्, चौरा इव=तस्करा इव, लुण्ठका इव=लुण्ठनकर्मरता इव, दस्यव इव=बलाद् अपहर्तार इव, च, यवनसेनापतिम्=यवनसेनानायकम्, आक्राम्यथ=आक्रमणं कुरुथ? सम्मुखम्=प्रत्यक्षम्, समागच्छत=आगच्छत, यथा=येन, अस्मच्चन्द्रहासानाम्= अस्मत्खड्गानाम्, चिरप्रवृद्धा=चिरात् वृद्धिंगता, महाराष्ट्ररुधिरास्वादतृषा= महाराष्ट्ररक्तपानपिपासा, शाम्येत्=शान्ता भवेत्" इति=एवम्, सक्ष्वेडम्=ससिंहनादम्, सङ्गर्ज्य=गर्जनं कृत्वा, युद्धाय=रणाय, सज्जाः=तत्पराः, समतिष्ठन्त=समजायन्त।

तेषाम्=यवनसैनिकानाम्, अश्वानाम्=हयानाम्, सव्यापसव्यमार्गैः= वामदक्षिणपथैः, खुरक्षुण्णा=शफभिन्ना, वसुधा=भूमिः, व्यदीर्यत=विदीर्णा अभूत्। खड्गखटखटाशब्दैः=कृपाणानां खटखटेति

ध्वनिभिः, सह, स्फुलिङ्गाः= वह्निकणाः, प्रादुरभूवन्=समुत्पन्नाः। रुधिरधाराभिः=शोणितप्रवाहैः, जपासुमनस्समाछन्नम्= जवापुष्पाच्छादितम्, इव, रणाङ्गणम्=युद्धक्षेत्रम्, अभूत्=समजायत।

**समासविग्रहाः–** कडकडाध्वनिना धर्षिताः प्रजाः याभिः ताः कडकडाध्व– निधर्षितप्रजाः (बहु.)। उड्डीयमानाः दन्दह्यमानाश्च ते परस्सहस्रपटखण्डाः (कर्म.), हैमाश्च ते विहङ्गमाः, तेषां विभ्रमः हैमविहङ्गमविभ्रमः (तत्पु.) उड्डीयमान– दन्दह्यमान–परस्सहस्रपटखण्डैः विहितः हैमविहङ्गमविभ्रमः याभिः ताः (बहु.)। ज्योतिरिङ्गणायिताश्च ते परस्कोटिस्फुलिङ्गाः (कर्म.), तेषां रिङ्गितम् (ष.त.), तेन पिङ्गीकृताः प्रान्ताः याभिः ताः (बहु.)। दोधूयमानाश्च ताः धूमघटाः, तासां पटलम्, तेन परिपात्यमानं भसितम्, तैः सितीकृताः अनोकहाः याभिस्ताः (बहु.)। महाराष्ट्रे भवाः महाराष्ट्राः, तेषां रुधिरम्, तस्य आस्वादः, तस्य तृषा (ष.त.)।

**व्याकरणम् –** चोचुम्ब्यमानाः – चुबि+यङ्+लट्+शानच्+टाप्+शस्। उड्डीयमान –उद्+डीङ्+यक्+लट्+शानच्। दन्दह्यमान–दह्+यङ्+ लट्+शानच्। ज्योतिरिङ्गणः इव आचरति ज्योतिरिङ्गणायते – ज्योतिरिङ्गण+क्यच् +इट्+क्त। पिङ्गीकृताः – अपिङ्गाः पिङ्गाः कृताः इति, पिङ्ग+च्वि+कृ+ क्त+जस्। व्याहरमाणाः =वि+आङ्+हृ+शानच्+जस्। आस्वाद–आङ्+स्वद्+घञ्। सङ्गर्ज्य– सम्+गर्ज्+क्त्वा>ल्यप्। समतिष्ठन्त–सम्+स्था+लङ्+झ। व्यदीर्यत – वि+दृ+यक्+लङ्+त।

**विशेषः –** अत्र एकस्या एव ज्वालामालायाः बहुधोल्लेखाद् उल्लेखालंकारोऽस्ति। 'गगनं चोचुम्ब्यमानाः' इत्यत्र अतिशयोक्तिः, उड्डीयमान.........विभ्रमाः इत्यत्र भ्रान्तिमान्, 'ज्योतिरिङ्गणायित.' इत्यत्र लुप्तोपमा, 'पतत्रिपटलैरिव सोसूच्यमानाः' इत्यत्र उत्प्रेक्षा चौरा इव लुण्ठका इव दस्यव इव' 'जपासुमन.......रणाङ्गणम्' इत्यत्र च उपमा अलंकारः। सानुप्रासया पाञ्चालीरीत्या अत्र सामाजिकानां रौद्रो रसोऽभिज्यते।

**सरलार्थः –** ततो यवनसेनासु शतशः अश्वारोहाः, गगनं संस्पृश्यमानाः दिशः प्रकाशयित्रीः, कडकडेतिध्वनिना समीपस्थानां प्रजानां भीतिप्रदाः, उद्गच्छद्भिः दहद्भिश्च परस्सहस्रं पटखण्डैः स्वर्णिमपक्षिणां भ्रान्तिं जनयित्रीः, खद्योततुल्यपरस्कोटिस्फुलिङ्गानाम् उद्गमनेन प्रान्तभागं पीतं कुर्वतीः, उत्पतन्तीनां घनघटानां पटलेन परिपात्यमानेन भसितेन वृक्षान् सितीकुर्वतीः, कलकलध्वनिना सह पलायमानैः पक्षिभिः सूचयन्ती इव च शिविरं दग्धुं तत्पराः अग्नेः ज्वालाः दृष्ट्वा हाहाकारं कुर्वन्तः शिविरं प्रति अधावन्। अपरे च यवनसैनिकाः महाराष्ट्राणां खड्गसर्पिणीभिः गर्हितं दंश्यमानाः आसन्। केचन पुनः पुनः 'त्रायताम्' इति शब्दं कुर्वाणाः अधावन्। अन्ये केचन धैर्यवन्तः – "तिष्ठत रे तिष्ठत धूर्तधुरीणाः। महाराष्ट्रहतकाः! चौरा इव, लुण्ठका इव, दस्यव इव च यवनसेनापतिम् कथम् आक्रामथ। सम्मुखम् आगच्छत, येन अस्माकं खड्गानां चिरकालात् वृद्धिंगता महाराष्ट्राणां रुधिरास्वादपिपासा शान्ता भवेत् इति सिंहनादपूर्वकं गर्जनां विधाय युद्धाय तत्पराः अभूवन्। तेषामश्वानां दक्षिणवाममार्गाणामाश्रयेण खुरैः क्षुण्णा वसुधा विदीर्णा अभूत्। खड्गानां खटखटेति शब्दैः सह स्फुलिङ्गाः समुत्पन्नाः। रुधिरधाराभिः युद्धभूमिः जपाकुसुमैः आच्छन्ना इवाभूत्।

**मूलम् – तदवलोक्य गौरसिंहो मृतस्याऽपजलखानस्य शोणितशोणम् शोण शरीरं प्रलम्बवेणु–दण्डाग्रेषु बद्ध्वा समुत्तोल्य सर्वान् संदर्श्य सभेरीनादं घोषितवान् यद्– "दृश्यताम्, दृश्यतामितो हतोऽयं यवन–सेनापतिः, ततश्चाऽग्नि– सात्कृतानि ससकल–सामग्री–जातानि–शिविराणि परितश्च बहूनि विनाशितानि यवनवीर–कदम्बकानि, तत्किमिति अवशिष्टा यूयं मुधा बकगृध्र–श्रृगालानां भोज्याः संवर्तध्वे? शस्त्राणि त्यक्त्वा पलायध्वम् पलायध्वम्, यथा नेयं भूः कदुष्णैः भवतां सद्यश्छिन्न– कन्धरागलद्रुधिर–प्रवाहैर्भवद्रमणीनां च कज्जल–मलिनैर्बाष्प–पूरैरार्द्रा भवेद्" इति। तदवधार्य, दृष्ट्वा च रुधिरदग्धं क्रीडापुत्तलायितं स्वस्वामिशरीरं, सर्वे ते हतोत्साहा विसृज्य शस्त्राणि कान्दिशीका दिशो भेजुः।**

**ससेनः शिववीरश्च विजयशङ्खनादैः रोदसी सम्पूर्य रणाङ्गणशोधनाधिकारम् माल्यश्रीकाय समर्प्य, प्रतापदुर्गम् प्रविश्य मातुः चरणौ प्रणनाम।**

**प्रसङ्गः –** अत्र हतम् अपजलखानं दृष्ट्वा यवनसैनिका पलायन्ते शिववीरश्च मातरमुपेत्य प्रणमति –

**व्याख्या –** तदवलोक्य=तद्दृष्ट्वा, गौरसिंहः, मृतस्य=हतस्य, अपजलखानस्य, शोणितशोणम्=रुधिरप्लुतम्, शोणशरीरम्=रक्तदेहम्, प्रलम्बवेणुदण्डाग्रेषु=लम्बकीचकदण्डाग्रभागेषु, बद्ध्वा=संयोज्य, समुतोल्य=उत्तोल्य, सर्वान्=निखिलान्, संदर्श्य=दर्शयित्वा, सभेरीनादम्=मृदङ्गध्वनिपुरस्सरम्, घोषितवान्=अघोषयत्, यद्, इतः=अत्र, दृश्यताम्=अवलोक्यताम्, दृश्यताम्, अयम्=एषः, यवनसेनापतिः= यवनसेनानायकः, हतः=मारितः (अस्ति), ततः=अपरतः, ससकलसामग्रीजातानि=ससैन्योचितनिखिलद्रव्यजातानि, शिविराणि=उपकार्याः, अग्निसात्कृतानि=दग्धानि, परितः=समन्तात्, च, बहूनि=असंख्यानि, यवनवीरकदम्बकानि=यवनयोद्धृनिकराणि, विनाशितानि=विनाशं गमितानि, तत्=तस्मात्, अवशिष्टाः=शेषाः, यूयम्=भवन्तः, मुधा=व्यर्थम्, बकगृध्रशृगालानाम्= बकोट–दूरदृग्जम्बुकानाम् (बक इत्यत्र वृक पाठो युज्यते) भोज्याः=भोक्तुं योग्याः, किमिति=कथम्, संवर्तध्वे=भवथ? (अतः) शस्त्राणि= खड्गादीनि शस्त्राणि, त्यक्त्वा=विहाय, पलायध्वम्=धावत, पलायध्वम्, यथा=येन, इयं भूः=एषा भूमिः, भवताम्=युष्माकम्, कदुष्णैः=ओष्णैः, सद्यश्छिन्नकन्धरागलद्रुधिरप्रवाहैः =तत्क्षणकर्तितग्रीवाप्रवहद्रक्तधाराभिः, भवद्रमणीनाम्=भवतां स्त्रीणाम्, च, कज्जलमलिनैः=अञ्जनश्यामैः, वाष्पपूरैः=अश्रुप्रवाहैः, न=नैव, आर्द्रा=सिक्ता, भवेत्=जायेत" इति। तदवधार्य=तच्छ्रुत्वा, च रुधिरदग्धम्=रक्तप्लुतम्, क्रीडापुत्तलायितम्=क्रीडार्थं निर्मितपुत्तलिकामिव प्रतीयमानम्, स्वस्वामिशरीरम्=निजभर्तृदेहम्, दृष्ट्वा=अवलोक्य, ते सर्वे=निखिलाः यवनसैनिकाः, हतोत्साहाः=उत्साहरहिताः (सन्तः) शस्त्राणि=खड्गादीनि, विसृज्य=विहाय, कान्दिशीकाः=भीताः, दिशः=आशाः, भेजुः=प्रापुः।

ससेनः=सेनया सहितः, शिववीरः, च, विजयशङ्खनादैः=विजय सूचकाशङ्खध्वनिभिः, रोदसी=द्यावापृथिवी, सम्पूर्य=पूरयित्वा, माल्यश्रीकाय= एतन्नाम्ने शूराय, रणाङ्गणशोधनाधिकारम्= युद्धक्षेत्रपरिमार्जनकार्यम्, समर्प्य=प्रदाय, प्रतापदुर्गम्=एताख्यकोट्टम्, प्रविश्य=प्रवेशं विधाय, मातुः=जनन्याः, चरणौ=पादौ, प्रणनाम=नमश्चकार।

**समासविग्रहाः –** प्रलम्बाश्च ते वेणुदण्डाः (कर्म.) प्रलम्बवेणुदण्डाः, तेषाम् अग्रेषु (ष.त.)। छिन्नाश्च ताः कन्धराश्च छिन्नकन्धराः, रुधिराणां प्रवाहाः रुधिरप्रवाहाः, गलन्तश्च ते रुधिरप्रवाहाः गलद्रुधिरप्रवाहाः, छिन्नकन्धराभ्यः गलद्रुधिरप्रवाहाः, तैः (तत्पु.)। वाष्पाणां पूराः, तैः (ष.त.)। हतः उत्साहः येषां ते हतोत्साहाः (बहु.)। रणाङ्गणस्य शोधनम्, तस्य अधिकारः, तम् (ष.त.)।

**व्याकरणम् –** बद्ध्वा – बध्+क्त्वा। समुत्तोल्य – सम्+उद्+तुल्+ णिच्+क्त्वाझल्यप्। संदर्श्य – सम्+दृश्+णिच्+क्त्वाझल्यप्। घोषितवान् – घुष्+क्तवतु+सु। दृश्यताम् – दृश्+यक्+लोट्+त। हतः – हन्+क्त+सु। संवर्तध्वे – सम्+वृत्+लट्+ध्वम्। दिग्धम् – दिह्+क्त+अम्। प्रणनाम – प्र+नम्+लिट्+तिप्।

**विशेषः –** 'क्रीडापुत्तलायितम्' इत्यत्र लुप्तोपमालंकारः।

**सरलार्थः –** तदवलोक्य गौरसिंहः मृतस्य अपजलखानस्य रुधिरप्लुतं रक्तवर्णं शरीरं प्रलम्बवंशदण्डाग्रभागे बद्ध्वा, उत्थाप्य च सर्वान् दर्शयित्वा सभेरीनादं घोषितवान् यद् इतः दृश्यताम् दृश्यताम्, अयं यवनसेनापतिः हतोऽस्ति, अपरतश्च सम्पूर्णसामग्रीसहितानि शिविराणि अपि दग्धानि सन्ति, समन्तात् यवनवीरनिकराणि विनाशितानि सन्ति, अतः शेषाः यूयं कथं व्यर्थमेव बक–गृध्र–शृगालानां भोजनं भवथ? (अतः यूयम्) शस्त्राणि विहाय धावत, येन इयं भूमिः सद्यः छिन्नाभ्यः कन्धराभ्यः गलद्भिः रुधिरप्रवाहैः कज्जलमलीनैश्च भवद्रमणीनामश्रुप्रवाहैश्च आर्द्रा न भवेत् इति। तन्निशम्य रुधिरप्लुतं क्रीडापुत्तलिकेव प्रतीयमानं स्वस्वामिनः शरीरं च दृष्ट्वा सर्वे ते हतोत्साहाः (सन्तः) शस्त्राणि त्यक्त्वा भीताः विभिन्नाः दिशः प्रति अधावन्।

सेनया सहितः शिववीरश्च विजयसूचकेन शङ्खनादेन भूमिम् अन्तरिक्षं च पूरयित्वा, युद्धस्थलस्य परिमार्जनार्थं माल्यश्रीकम् आदिश्य च प्रतापदुर्गं प्रविश्य मातुः चरणौ प्रणनाम।